सरस्वतीभवन-ग्रन्थमाला
(१०५)

देवराजशर्मविरचितं

नानकचन्द्रोदयमहाकाव्यम्

सम्पादकः

पं० व्रजनाथझाः

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

SARASVATĪ BHAVANA GRANTHAMĀLĀ

(*Vol. 105*)

Chief Editor

DR. BHĀGĪRATHA PRASĀDA TRIPĀṬHĪ 'VĀGĪŚA ŚĀSTRĪ'

Director, Research Institute,

Sampurnanand Sanskrit Vishvavidyalaya,

Varanasi

NĀNAKACANDRODAYA MAHĀKĀVYAM

by

SHRĪ DEVARĀJA SARMĀ

Edited by

Pt. VRAJANĀTHA JHĀ

VARANASI

1977

Published by—
Director, Research Institute,
Sampurnanand Sanskrit Vishvavidyalaya,
Varanasi.

Available at—
Publication Section
Sampurnanand Sanskrit Vishvavidyalaya,
Varanasi-221002.

Printed : 500 Copies
Price : [redacted]. 300/-

Printed by—
G. S. Upadhyay
Manage
Sampurnanand Sanskrit Vishvavidyalaya Press
Varanas

सरस्वतीभवन-ग्रन्थमाला

(१०५)

मुख्यसम्पादकः

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

अनुसन्धानसंस्थाननिदेशकः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

2
74
74
74
222
180
223-80

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय

श्रुतम् मे गोपाय

देवराजशर्मप्रणीतं

नानकचन्द्रोदयमहाकाव्यम्

सम्पादकः

प० व्रजनाथझाः

शिक्षकचरः, अन्ताराष्ट्रियशिक्षणविभागे

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य

वाराणस्याम्

२०३४ तमे वैक्रमाब्दे　　१८९९ तमे शकाब्दे　　१९७७ तमे खैस्ताब्दे

प्रकाशकः,
निदेशकः, अनुसन्धानसंस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
वाराणसी ।

प्राप्तिस्थानम्—
प्रकाशनविभागः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी-२२१००२.

मुद्रितानि : ५०० प्रतिरूपाणि

मूल्यम् : [illegible] 300/

मुद्रकः—
घनश्याम उपाध्यायः
मुद्रणालयव्यवस्थापकः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,
वाराणसी ।

प्रास्ताविकम्

द्वादशख्रीस्तशताब्दादारभ्य मौहम्मदशासनाद् भारतीयसंस्कृतिः संक्रमण-भूमिमध्यास्ते स्म। भारतीयाः संक्रमणमिदमसहमानाः प्रतीपमाचरन्ति स्मेति प्राप्तेऽपि भूभागाधिकारे भारतीयजनहृदयशासनं कर्तुं न प्राभवन मौहम्मदाः। तदर्थं कापि सुदृढा दर्शनभूमिरपेक्ष्यते, यत्र स्थित्वा दर्शनान्तरीयप्रभावप्रभावितान् जनान् स्वकीयदर्शनं प्रति समाकष्टुं शक्नुयुः प्रतिपक्षिणः। मौहम्मदैः स्वकीयं सूफीदर्शनं प्रचारयितुं प्रक्रान्तम्, प्रादेशिकभाषया भारतीयकथाधारेण ग्रन्थोऽपि लिखितः सूफीदर्शनप्रचारधिया। केचन सूफीदर्शनसमाकृष्टचेतसो भारतीया जना धावितुमारब्धास्तस्यामेव दिशि। केचन किङ्कर्तव्यविमूढा अवस्थिताः। इत्थं शताब्दद्वयावधौ भारतीयजनताया दिङ्मूढता जाता।

अस्यामेव संक्रमणवेलायां ख्रीस्तचतुर्दशशताब्दे वाराणस्यां स्थितेन मौहम्मद-भारतीयसंस्कृतिसेतुभूतेन रामानन्देन समन्वयस्थापनाय महान् प्रयत्नः समास्थितः। प्रतिप्रदेशं महात्मभिर्देशकालस्थित्यनुसारेण समन्वयात्मकस्य भारतीयदर्शनस्य प्रचारः समारब्धः। पञ्चदशख्रीस्तशताब्दस्य तृतीये चरणे पाञ्चालप्रदेशीयशलातुरमण्डलान्तर्गतराम्रीनदतटवर्तिनि तलवण्डीनामके ग्रामे भारतीयजनाब्धिसुखदो नानकचन्द्रो जनिं लेभे। बहुदेवोपासनापरतया भारतीयानां जीवनैक्यं देशैक्यं च विघ्नाय कल्पेते स्म। मौहम्मदानाम् एकेश्वरवादस्तेषा-मैक्याय विजयाय च संपद्यते स्म। तदीयेन तेन विजयेन प्रथमतः सिन्धुपाञ्चाल-प्रदेशौ प्रभावितौ। परतश्च निखिलो भारतभूमिभागः।

रामानन्दशिष्यकबीरवत् कस्मिंश्चिदपि शिक्षासंस्थाने शिक्षणमनाप्यापि बाल्यत एवात्मदर्शनयोग्यतासम्पन्नतया नानकचन्द्रेण विशुद्धस्य औपनिषदस्यै-केश्वरवादसिद्धान्तस्य जागरणाय बहुदेवपूजा निन्दिता। भारतीयजना इव मौहम्मदा अपि तदीयकर्मकाण्डाय पर्यालोचिताः। विभिन्नधर्मसंघर्षोन्मूलनं तदीयं लक्ष्यमासीत्। नानकचन्द्रेण जातिकुलबन्धनानां नैरर्थक्यं प्रत्यपादि। परिणामतो मौहम्मदा अपि तदीयशिष्यतां प्रपन्नाः। ब्राह्मणा अपि तदनुयायिनः संवृत्ताः। गुरुनानकस्यान्यतमशिष्यो द्वारकादासो दीर्घजीवी भूत्वा केशकोशकङ्कतिकाः समर्पितवान् गुरुगोविन्दसिंहाय। द्वारकादासस्यैवान्यतमः शिष्यो वाराणसी-वास्तव्यः शाण्डिल्यगोत्रत्रिपाठिरघुपतिशर्मात्मजो देवराजशर्मा नानकचन्द्रोदय-महाकाव्यमरीरचत् सप्तदशे ख्रीस्तशताब्दे।

तदानीन्तनलोकभाषाग्रथितस्य गुरुनानकोपदेशस्यामरत्वाप्त्यै देवराज-शर्मणा संस्कृतगिरा सुगुम्फितं महाकाव्यमिदम्। इह गुरुनानकस्य सम्पूर्णं जीवनं

चित्रितम्, तदीयाश्च सर्वे सिद्धान्ताः काव्यभाषायां वर्णिताश्चेतांसि चमत्कुर्वते विचक्षणानाम्। गुरुनानकजीवनमधिकृत्य कस्याञ्चिदपि भाषायां रचितं महाकाव्यं न दृष्टिपथमुपगतम्। दृश्यन्तामिह महाकाव्ये देववाण्या कृताः शृङ्गाराः नानककालिक्याः संस्कृतेः। ललनीयं काव्यलालित्यम्, स्वाद्यन्तां सुभाषितानि, मननीयानि च प्रतिप्रस्तावं दार्शनिकतत्त्वानि।

नानकचन्द्रोदयनामकमिदं महाकाव्यं शतत्रयात्मकवर्षाणां भारतीयसंस्कृतेरैतिह्यस्य भूगोलस्य च परिचायकमनघं रत्नम्। इह कविना संस्कृतगिरा शास्त्रलोकव्यवहारेतिहासादिज्ञानगुम्फाः प्रतिपदं संनिवेशिताः। न केवलं संस्कृतजगत्, अपि तु सम्पूर्णभारतीयसंस्कृतिर्विद्योतिता महाकाव्यशशिकिरणकैः।

नानकचन्द्रोदये प्रतिप्रस्तावमादौ मङ्गलमाचरितं कविना। प्रथमप्रस्तावमन्तरा प्रतिप्रस्तावं वाग्देवता संस्तुता तेन। नानकशब्दस्य व्युत्पत्तिर्द्रष्टव्या (२, ५३)—

नास्त्यकं दुःखमेतस्येत्यनको नापरः पुमान्।
इति बुद्ध्वा हि विप्रेण तत्त्वेवन तदीरितम्॥ इति।

प्रथमे प्रस्तावे कविस्तपस्विचित्रणं साफल्येन समुपस्थापयति (१, २८)—

कृशैः शरीरैरकृशैस्तपोभिः
केशैः पिशङ्गैर्विशदैर्यशोभिः।
शुद्धैर्मनोभिर्मलिनैर्विभूत्या
गात्रैश्च यत्रावसना वसन्ति॥ इति।

केचन तपस्विनो धूमपाः, अन्ये खलूष्मपाः, इतरेऽश्मकुट्टाः, अपरे रदोलूखलाः, एके शिलाजीविनः, वायुतोयाशनाः, काष्ठमौनाश्रयाश्च सन्तीत्येतादृशं वर्णनं कृतं कविना (१,२९—३८)। बालसिन्धुस्वरूपवर्णनं मनोमुग्धकारि (१, १०४—१०७)।

महाकाव्येऽस्मिन् पदे पदे भारतीयसंस्कृतेर्गभीरसारः प्रकटीकरोति कवेरतुलं लब्धवर्णत्वम्, तथापि तात्कालिकानां धर्मध्वजिनामाडम्बरालोचनेन न मनागपि संकोचमञ्चितवान् कविः (३, २०; १६, ९४)—

डिण्डिमो निःस्पृहत्वस्य ज्ञानवैराग्ययोश्छटाः।
धर्माधर्मपरिष्कारः कुक्षिपूर्तेर्विजृम्भितम्॥

पुण्ड्रं तव स्वच्छतरं ललाटे
माला विशाला हृदि काष्ठमय्यः।
ते तूर्ध्ववस्त्राण्यतिनिर्मलानि
मलीमसं कर्म करोषि किं भोः॥ इति।

सन्तप्रशंसा त्वित्थं दर्शनीया (६, १३९)—

सन्तः स्वयं स्वस्य समाचरन्ति
यं भाग्यवन्तं जननी प्रसूते।
गङ्गाम्बु सन्तो मलयोद्भवश्च
वितन्वते स्वाश्रयमात्मतुल्यम् ॥ इति।

नानकमतेन महात्मलक्षणमिदम् (१०,३६) —

द्विजोऽन्त्यजो वा यवनो विजित्य मनो जगन्नश्वरमेव बुद्ध्वा।
जानाति यः प्रेमपदं तमीशं स वै महात्मा स च वन्दनीयः॥

गर्भावस्थामारभ्य नानकस्य सम्पूर्णं चरितमाधारीकृत्य महाकाव्यमिदं प्रवृत्तम्। २, ३५-४१ श्लोकान् यावत् सप्तसु श्लोकेषु गर्भावस्थावर्णनं रघुवंश-काव्यवर्णनेन तुलामर्हति। जन्मसमनन्तरमेव बालकस्य हासदर्शनेन तस्य महा-पुरुषत्वं वैराग्यं च व्यज्येते। पुत्रोत्पत्तिहर्षेण भृत्या नानकजनकस्य परिहितानि वसनाभरणानि जहुर्यथेच्छम्। इयं क्रिया कादम्बर्यादिग्रन्थेषु पुण्यवस्त्रार्थकेन पूर्णपात्रशब्देन स्मर्यते। इहाग्रे (८ १५१; १५२) स्पष्टं पूर्णपात्रशब्दः समुदलेखि कविना। नानकजन्मोत्सवानन्दे नानकजनकेन कालेन ब्राह्मणेभ्यो हेमवसनवेनवः समर्पिताः (२, ४८), षष्ठ्युत्सवश्च कृतः (२. ५०)। बालकस्य मुखचुम्बन-परम्परा भारतेऽर्वाचीनेह समुल्लिख्यते—'जननी चुचुम्ब तनयस्य मुखम्' (२, ९८) इति। प्राचीनभारते तु शिरस आघ्राणमेव मतं बालकानाम्। अतः परतो भारते परवर्तिभाषासु कर्मेदं शपथार्थकं संवृत्तं शब्दान्तरेण। नानकस्य बालसौन्दर्यवर्णनम् (२, ९५) अतीव मनोरमम्। महाकाव्यनायकस्य बाललीला सुरुचिरा (२ १०२-१०४)—

भवनादपनीय पञ्चवर्षो वसुवस्त्राभरणान्यसन्नमन्यत्।
विससर्ज स भिक्षुकेभ्य ईषत् पितरि क्रोधपरे परं रुरोद॥
स्वभार्यामवदत् कालो गृहवस्तु न रक्षसि।
तयोक्तं जनितश्चोरो मामुपालभसे कथम्॥
दैवज्ञमासाद्य जगाद कालो
विपर्ययो ज्यौतिषकोदितेषु।
यश्छत्रधारी तनयस्त्वयोक्तः
स चौर्यमभ्यस्यति बाल्य एव॥ इति।

ततश्च नानककृतगोचारणलीला (२, १०७), नानकस्योपरि फणीन्द्रच्छत्त्र-च्छायाकथा, नववर्षदेशीयस्य नानकस्य राजसम्मानः (२, ११७-१२८), क्षेत्र-सस्याऽऽरक्षणवेलायां जीवदया (३, २)। भाण्डक्रयाय पितुः सकाशाद् गृहीतस्य

धनस्य वितरणं निर्वाणिषु कृतवान् नानकः (३, १६)। मणिमयोर्मिकया सह कांस्यमयीं कर्करीं नानको भिक्षवे दत्तवान् इति प्रकुपितो जनकस्तस्य ज्योतिर्वेत्तारं ययौ—किमिति विपरीतलक्षणो नानक इति (३, ८०)। जयरामो नानकस्य सर्वज्ञतायां विश्वसिति स्म (३, १०७)—

जयरामस्ततः स्मेरः श्यालमालपदुन्मनाः।
न सास्ति भुवने विद्या विद्यास्त्वं यां न नानक ॥ इति।

यद्यपि वृत्तान्तरापेक्षया नानको नासीत् तथा वेदादिविद्याप्रवीणः, तथापि महाकाव्यस्यास्य वर्णनेन ज्ञायते तदीयं निगमागमज्ञातृत्वम् (३, ३)—

उपनीय गुरूनुपनीय सुतं
निगमाध्ययने नियुयोज पिता।
चतुरो निगमान् स्वयमेष पठन्न-
भवद् बहुवैदिकविस्मयकृत् ॥ इति।

भाषाप्रबन्धेन भगवद्यशोगानपूर्वकं मन्दमतीनामशक्तानां मोक्षमार्गप्राप्तिरुक्ता नानकेन (७,८३)—

अस्मिन् कलौ मन्दमतीनशक्तान् शास्त्रोक्तचर्यासु किलानुकम्प्य।
भाषाप्रबन्धैर्भगवद्यशांसि त्वं ग्राहयिष्यस्यथ मोक्षमार्गम् ॥

युगपुरुषो मतो नानकः स्वोपज्ञसम्प्रदायप्रवर्तकः। 'सुकृतिनां कलिकल्मषहानये क्षितितले किल नानकसम्भवः' (८, ११७), 'अहन्निराकारनामा' (९,९७), 'नानकोऽयं निराकार इति प्रादुरभूद् ध्वनिः' (७,८५), श्रीनानकनिराकारो गिरं श्रोतृमनोहराम् (८, ७८), मायामये हि संसारे प्रीत्यप्रीतिविवर्जितः, उदासी नानको नाम वेदितव्यस्त्वयाधुना' (८, ११५), 'नानकाग्रे निराकारो मयेति समुदीरितम्' (८, १६०). कर्ता परिस्फुरतु ते हृदये त्रिलोक्याः' (९, १०२), 'कर्ता कर्तेत्यालपद् धर्मसिंहः सत्यः कर्तेत्याह योगीश्वरः स्म' (९,१३९), 'कर्ता कर्तेति राजाऽकथयदकथयत् सत्यकर्तेति योगी' (९,१४३) इति नानकमतव्यञ्जका बहवः शब्दाः प्रयुक्ताः सन्ति। उदासिनां मतं वक्ष्यमाणयोः श्लोकयोः सुस्फुटम् (१७, ८२–८३)—

वर्णाश्रमाभिमानेन शून्याः सन्त उदासिनः।
ज्ञानान्तरापकर्तृभ्यः कर्मभ्यश्च बहिः स्थिताः ॥
अनुद्धतत्वं वैराग्यं ज्ञानसम्पादनश्रमः।
व्यवहार उदासित्वं मतमेतदुदासिनाम् ॥ इति।

पुनर्जन्मनि विश्वसिति स्म नानकः (९, ३१)—

आस्थाय पार्श्वे जनकस्य राज्ञ-
स्त्रयो वयं तेषु बभूव मत्स्यः।

एकः परौ द्वौ त्वमहं च तस्य
वहाम्यभिज्ञानमिदं गृहाण ॥ इति ।

नानकेन सिद्धानां योगिनामिव चमत्कारा अपि दर्शिता इति तदीया कीर्तिर्विष्वक् प्रसृताऽभूत्। कस्यचन म्लेच्छाधिपस्य रुग्णः पुत्रो नानकेन नीरुक्त्वमापादितः (७, १५४)—

सूनोस्तस्यारोग्यमासीदकस्मा-
ज्जाता कीर्तिर्योगिनोऽस्यावदाता ॥ इति ।

एवमेव तैलपकस्य मर्दनस्य पुनर्जीवनम् (८, १२८–१३१), राक्षसस्य मुक्तिः (८, १३४), बालुकातः पद्मरागस्य प्रादुर्भावनम् (८, १३७), मत्स्योद्धारः (९, ११–१३), ब्रह्मणा सार्द्धं संभाषणम् (९, १६–१९), जले स्थलवद् गमनम् (९, २०) इत्यादयो योगसिद्धयो वर्णिता नानकस्य। योगसिद्धिप्रभावितो देवगान्धारदेशीयो भूपो नानकस्य शिष्यतामङ्गीकृतवान् (९, १०४)। सिद्धः सिंहलराजोऽपि पराभूतो नानकं शरणं गत उवाच—'अयं यतिः कश्चिदपूर्व एव' (८, १०५–१०८) इति। दिनानां सप्तविंशतिं नानकः समाधिस्थितो बभूव (८, ११०)। सिंहलराजो नानकमपृच्छत् (८, १११)—

अपृच्छन्नृपो नानकं त्वं नु योगी
द्विजः क्षत्रियः सार्थवाहोऽथवाऽसि ।
उताहो भवान् सौम्य गोरक्षनाथो
धरामण्डपे भ्राम्यसि च्छन्नरूपः ॥ इति ।

कासाञ्चिदन्यासां सिद्धीनामित्थं निदर्शनम्—'श्रद्धा दधानोऽपि च योगसिद्धीः' (७, १४०), 'योगसिद्धीर्दधानः' (८, ९८), 'रुद्धद्वारे तदुद्याने दैवादागत्य नानकः, प्राविशत् तदभूत् तूर्णं नन्दनस्पर्द्धि नूतनम्' (८, ९९), 'कामकेलिकलाभिज्ञाः पुरस्तात् तस्य योगिनः, स्तम्भा इव जडीभूता रम्भासम्भाविताः स्त्रियः' (८, १०४) इति।

योगिशब्दप्रयोगो नानकं प्रति शतशो व्यवहृतो दृश्यते। ब्रह्मणा 'नानकयोगिन्' इति संबोधितो नानकः। एवमेव यतिः (८ १०५; ९, २८; ९, ८२; ९२), यतीन्द्रः (८, १५६), यतीश्वरः (८, ११८), योगीन्द्रः (९, ७२), योगिराजः (९, ९७), योगिवर्यः (७, ८९; ८, १४९; ९, १२) इत्यादिविशेषणैर्नानकस्य महिमा प्रकटीभवति।

सम्पूर्णे महाकाव्ये बहुत्र योगवर्णनानि कृतानि। शास्त्रोक्तैर्योगसिद्धान्तैः सह तेषां तुलनात्मकमनुशीलनम् अभिनवलाभाय सम्पत्स्यते। योगदर्शनस्य कतिचित् सूत्राणीह श्लोके संदृब्धानि समालोच्यन्ताम् (७, ११९)—

अभ्यासवैराग्यमहोद्यमेन महेश्वरस्य प्रणिधानतो वा।
द्रष्टुः स्वरूपे स्थितिरेव तस्य मुख्यं फलं सिद्धिगणास्तु गौणम् ॥ इति।

नानककृता महार्हा योगसाधनोपदेशाः केचन निदर्शनार्थं मननीयाः—'अक्लेशाज्जायते योगी' (८, १२४), 'योगश्चिदाभासचितोर्हि योगः' (१०, ७९), 'यः सिद्धयोगो बहुविष्णुरेव योगी स लीलाकलितेष्टदेहः, मुञ्चन् शरीरं समये न किञ्चित् फणीव निर्मोकमुपैति दुःखम्' (७, १२०), 'सिद्धीः कथंकारमुदीरयेयम्' (७, १२१), 'यो न शोके न विपदि न हर्षे न च संपदि, युक्तः स योगी जगति लीलाकलितविग्रहः' (७, १२५), 'अभ्यासेन विरागतश्च शनकैः शक्यं हि जेतुं मनः' (१६, १३२) इति।

प्रायो नानकस्य समाधिर्भवति स्म (९, १०७–८), 'भूमौ चतुर्थ्यामवतिष्ठमानोऽतिक्रान्तभाव्यो वशवायुचित्तः, स एकदा स्वासनमाश्रितः सन्नवाप निर्बीजसमाधिनिद्राम्' (७, ९१); 'सुषुम्णया प्राणसमीरमुच्चैर्निरुध्य नष्टत्रिपुटीविभागः, स तीव्रसंवेग उदीतमेकं पश्यन् परं ज्योतिरहो ननन्द' (७, ९२) इति।

दशमे प्रस्तावे मत्स्येन्द्रनाथगोरक्षनाथप्रश्नानामुत्तरव्याजेन योगवर्णनं संजातम् (१०, ८०–१२६)। भर्तृहरिगोपीचन्द्राभ्यां सहापि जाताया योगविषयिण्या वार्तायाः प्रसङ्ग एकादशो द्वादशश्च प्रस्तावौ योगदर्शनविषयकौ ग्रन्थस्य हृदयस्थानीयौ।

भक्तजनाज्ञानान्धकारापसारकत्वान्नानको गुरुर्मतः। इह ग्रन्थेऽष्टमप्रस्तावतो नानको गुरुत्वेन स्मृतः—'गतो गुरुर्नानक इत्युदीर्य' (८, १५), 'चलन्नित्यवदद् गुरुः' (८, १६); 'प्रससाद नानकगुरुः' (८, १६३), उपदिदेश गुरुर्भव वारिधिः' (८, १६३); 'तावत्कालं गुरुस्तस्थौ' (८, १६८), 'मामपृच्छद् गुरुस्ततः' (९, ७), 'गुरुर्निराकारकनानकोऽसि' (९, ९), 'श्रुत्युक्तिशास्त्रगहनाद् गुरुणाऽनुकम्प्य' (९, ३७), 'स्नातो गुरुस्तं स्नपयाम्बभूव' (९, ३८), 'प्रदद्यां गुरो' (९, ४२); 'अवदद् गुरुः' (९, ४८) 'गुरोर्गिरमग्रहीच्च' (९, ७९), गुरुः (९, ८०), 'गुरोः करुणया सिद्धिम्' (९, ८७) इति।

गुरुनानकदेवस्य कुले कृष्णभक्तिरासीत् प्रचलितेति ज्ञायते मातरं प्रति तस्यानेन वचनेन—'तस्मात् स्वपुत्रस्य विहाय सङ्गं त्वं देवकीपुत्रमुपाश्रयस्व' (८, ३८) इति। गुरुनानकस्य भक्तियोगे महान् विश्वासो विद्यते (१६, १३५; १७, २९)—

यज्ञास्तपांसि तीर्थानि श्रम एव हि केवलम्।
मुकुन्दचरणाम्भोजे नाविच्छिन्ना यतो रतिः॥

संहृत्य नानाविषयाभिषेभ्यो
मनो मुकुन्दस्य पदारविन्दे ।
निवेशितं प्रेम रसालसं चे-
ज्जीवः कृतार्थो न च शोचनीयः ॥ इति ।

इह स्पष्टं श्रीमद्भागवतप्रभावः परिलक्ष्यते । हरिभक्तिरतेषु निःस्पृहेषु तापसेषु कलेर्बलं न भवतीति नानकमतम् (९, १८)। मन्त्रजपनमपि तदनुमतम्—'तं मन्त्रं जप येन मुञ्चति भवो भूतोऽनुभूतव्ययः' (९, ७८) इति । ईशितुर्गुणगाने बद्धादरो नानकः—'मर्दनेनैवमुक्तस्तु नानको व्याजहार तम्, वीणामानय भोः सौम्य गुणान् गायत ईशितुः' (७, १८) इति । एवमेव 'ईशनाम मणिमेतदनर्घम्' (८, १५९), 'प्रवहणं हरिनाम समाश्रयंस्तर वितीर्णमकिञ्चनधीवरैः' इत्यादौ नानकमतं 'कलौ तद्धरिकीर्तनात्' इति सिद्धान्तवद् हरिनामसंकीर्तनं विद्यते । अतो यवन उवाच मर्दनं वीणां वादयन्तम्-'यच्छब्दतस्त्वस्य तवात्र सिद्धिः' (७, ३३) इति । मर्दनः स्वस्य द्वन्द्वसहत्वं याचितवान् नानकम्—'तन्मां द्वन्द्वसहं विदध्याः' (७, ११३) इति । नानकेन तु स तदर्थं महेशितृयाचनाय समादिष्टः (७, ११४)—

नानकोऽब्रूत याचस्व मर्दनेदं महेशितुः ।
स मेरुमणुतां नेतुमणुं शक्तश्च मेरुताम् ॥

भेदभक्तिरपि कृष्णस्य समुपदिष्टा नानकेन—'यदा मनस्ते सगुणेऽनुरक्तं तदा मयोक्तं हृदि भावयस्व, विहारशय्यासनभोजनेषु पुरः स्फुरन्तं हृदयाम्बुजे वा' (८, ५५) इति । इह श्रीमद्भगवद्गीताप्रभावः स्पष्टः । श्रीकृष्णभक्तिविषयकाः श्रीमद्भागवतसदृशाः केचन श्लोका विभाव्यन्ताम् (८; ५७-५८)—

बर्हावतंसमरविन्ददलायताक्षं पूर्णेन्दुसुन्दरमुखं तनुतुङ्गनासम् ।
विस्तीर्णवक्षसमुदारसुवृत्तबाहुं फल्गूदरं कनकगौरवराम्बरं च ॥
आकुञ्चितेषु चिकुरेषु गवां रजोभिर्वन्यस्रजा मधुरवेणुरवेण सायम् ।
गोपीमनांसि मदयन्तमनुव्रजन्तं धेनूर्व्रजस्य विशिखासु च वेत्रपाणिम् ॥ इति ।

उपासनादौ 'चैलाजिनादिरचिते स्थिर आसने सन्' (८, ६४), पार्ष्णिप्रपीडितगुदः पवनं निरुद्धम्' (८, ६५) इत्यादिक्रियाः कृत्वा वक्ष्यमाणाः शब्दाः स्मरणीयाः (८, ६६)—

श्रीचन्द्रशेखर सदाशिव पार्वतीश
सीतापते दशरथात्मज राम कृष्ण ।
गोवर्द्धनोद्धरण कंसहरेति शब्दः
कश्चित् स्मृतो भवति योगशताधिकान्ते ॥ इति ।

जागतिकानि नश्वराणि सुखानि हित्वा नानकेन चीरधारणं कृतं जगदीशितुर्भक्तिसाधकमिति नानकी नाश्रुप्रवाहमवरोद्धुमपारयत् (७, ४४)—

चीरधारिणमुदीक्ष्य नानकं
नीरनिर्झरमुवाह नेत्रयोः ॥ इति ।

नानकस्य सम्पूर्णं स्वरूपमित्थमवाप्यते (८, २१)—

न युज्यते नानक ते शरीरे
प्राचीनचीरस्य विधारणेयम् ।
निकामरूक्षैर्भसितैश्च लेपः
खेदावहः श्मश्रुजटाग्रहश्च ॥ इति ।

काञ्चनगर्भगौरस्य शरीरस्य यान्यङ्गानि स्निग्धसुगन्धशीतैरुद्वर्तनैः पोषितानि, विरूक्षैः क्षारैर्लेप्यन्ते स्म नानकेन (८, २८), तादृशं वपुश्च श्वापदमण्डलीषु स्थाप्यते स्मेत्यहो तदीयं जागतिकपदार्थवैराग्यम् ! लोकनिन्दा विगणिता तेन । लोकनिन्दां श्रुत्वा त्वं कुतो न बिभ्यसीति श्रुत्वा नानकेनोक्तम्—'लोकस्तु मत्सरी, स कमपि सर्वथा भद्रं नाह' (७, २१-२२)—

निन्दन्ति लोका नितरां भवन्तं
हसन्ति मां वैणिकदुर्दुरूढाः ।
वदन्ति विक्षिप्तमनुप्रवृत्त-
स्त्वं किन्न विक्षिप्ततरोऽसि मन्द ॥
निशम्य नानकोऽब्रूत व्रज वीणां समानय ।
लोकस्तु सर्वथा भद्रं न कमप्याह मत्सरी ॥ इति ।

गुरुनानकः सनातनधर्मस्य प्रामाण्यं व्याजहार—'स्वामी सर्वास्ववस्थासु पत्न्या परिजनेन च, सम्माननीयः सततमेष धर्मः सनातनः' (७, १४) इति । तस्य दार्शनिकः पक्षः सनातनधर्मानुमोदित एव— मूर्खो वा पण्डितो वापि पापो वा धार्मिकोऽपि वा, असिद्धोऽप्यथवा सिद्धः कालः कश्चिन्न मुञ्चति' (६,४१), 'एको जातो मृतश्चैकः सम्बन्धः केन कस्य वः' (६, ११७), 'क्षणे क्षणे भज्यमानां नावमेतां समाश्रिताः, मग्नाः सर्वेऽपि नियतमात्मानं नोद्धरन्ति चेत्' (६, १३१), 'संसाराम्बुनिधौ निमज्जति महामोहात् कुटुम्बैर्वृतः' (६, १४३) इति ।

अविद्यया समावृतो जीव एव ब्रह्मेति शाङ्करसिद्धान्तवत् सिद्धान्तो नानकस्य (१०, ४६) । अन्येऽपि तदीया दार्शनिकाः सिद्धान्ता इह भवद्भिर्मननीयाः— 'साम्यं गुणानां प्रकृतिः प्रकीर्तिता' (१०, ४७), 'अनाद्यविद्याकृतजीवभावः' (१०, ४८), 'अमात्यवश्यो राजेव स्त्रीवश्यश्च पुमानिव, अन्तःकरणतादात्म्याज्जीवो याति विडम्बनाम्' (१, ८७), 'न देहेन्द्रियप्राणबुद्ध्यादिरूपः, सदानन्दचैतन्य-

ोधोऽहमात्मा' (१, ८८), 'अहं निरंकारविदेव साधो' (१, ८९); नानक-
रिव्राजकसंवादे वेदान्तदर्शनं समुज्जृम्भितम् (३, ३५-३७)। भेदधियं विहाय
था भक्ता भगवन्तमीशं भजन्ति, तथा तथा संनिधिमीयमानस्तेषां स आत्मैव
वत्यखण्डः (८, ५४), रूपेऽस्मिन् धारणादार्ढ्यात् सूक्ष्मग्राहिणि मानसे, विलाप्य
कलं विश्वं ब्रह्मात्मानं विभावयेत्' (८, ६०) इति। वेदान्तसिद्धान्तनवनीत-
महाऽऽस्वाद्यताम् (८, ६१-६३; ७९)—

जगत्परब्रह्मविवर्त एतन् पृथङ् न तस्मात् पृथगीक्ष्यमाणम् ।
स्वापस्य विश्वस्य यथैव निद्रा माया तथास्य प्रतिभासहेतुः ॥
न बन्धमोक्षौ मयि निर्विकारे सदा सदानन्दचिदात्मरूपे।
अभ्यासदार्ढ्यादिति पक्वबोधः कृताकृते शोचति नैव साधुः ॥
यदस्ति भाति प्रियनामरूपस्वरूपमेतत् सततं प्रतीतम् ।
मायात्र मिथ्या किल नामरूपे ब्रह्मास्मि भाति प्रियमत्र सत्यम् ॥
विक्रीयेदं शरीरं मलमयमदृढं लभ्यते ब्रह्म येन
वाणिज्यं तन्मतं मे कृषिरपि निहिते तत्त्वमस्यादिबीजे।
चेतःक्षेत्रे समुक्ष्यामलमननजलैर्ज्ञानदिव्यान्नराशि-
र्यस्यां लभ्येत सैवोत्तमकृषिकजनैस्तन्यते नाम नान्या ॥ इति।

ऐतिहासिकेऽस्मिन् महाकाव्ये निबद्धानि सर्वाणि चरितानि खल्वैतिहासि-
ानि सन्ति। अष्टादशे प्रस्तावे मौहम्मदैः शासकैः सत्रा सञ्जातस्य सम्भाषणस्य
र्णनम्, विंशे प्रस्तावे जहाँगीरस्य, एकविंशे च दारासकूहस्य, औरंगजेबस्य च
र्णनमैतिहासिकं वैशिष्ट्यं बिभर्ति। इतिहासे तुलनात्मकस्यानुशीलनस्योपक्रमे
ढमुपकारकं सेत्स्यति काव्यमिदम्। अष्टादशसंख्यकानां शासकानां नामानि
६५-७१ श्लोकेषु द्रष्टव्यानि। यद्यपीहेतिहासक्रमादपसृत्य कतिपयानि वर्णनानि
न्ति, तथापि चतुर्दशखीस्तशताब्दाद् अष्टादशखीस्तशताब्दं यावद् व्यापिन्याः
कृतेरितिहासस्य च प्रामाणिको निधिरयं ग्रन्थः।

भौगोलिक्या दृशा भूयांसि महत्त्वानि सन्ति ग्रन्थस्यास्य। पदातिना
नकेन भारतस्य प्रदेशानां भारताद् बहिर्वर्तिनां देशानां च भूभागः पर्यटितः
म्बूदेशस्य विविधान् प्रदेशान् अभ्रमद् यतिः' (९; ८२) इति। तत्रत्यानां
नानां स्वभावस्य संस्कृतेश्च भूयान् परिचय इह लभ्यते। यद्यपि तस्मिन्नपि
ले विदेशगमनं निषिद्धमभूत्, तथापि नानकेन ब्रह्मस्वरूपेण सर्वाः सीमाः
मतिक्रान्ताः (१०,४)—

क्रोशाः सहस्रद्वयमस्ति सार्द्धमितस्तदार्या न दिशन्ति गन्तुम् ।
इत्थं यतीन्द्रोऽभिहितः स ऊचे सदागतिं शक्यति को निरोद्धुम् ॥ इति।

ततो नानकः 'सुमेरुयात्रामुत्सृज्य मक्काख्यपत्तनं ययौ' (१०,५५)
तत्रत्या जना मूर्तिश्चेत्थं निरूपिता नानकेन (१०, ७; ११)—

जपमालाकरा वृद्धाः श्मश्रुला हरिताम्बराः।
स्वशास्त्रपारदृश्वानो म्लेच्छाचार्या विलोकिताः॥
मूर्तिर्मया ग्रावमयी व्यलोकि।
शिवस्य सा मर्दन मूर्तिरस्ति॥ इति।

मदीना-नगरी गङ्गावत् पवित्रा मता नानकेन—'मदीनां नय मां बन्धो नदीनां जाह्नवीमिव' (१०, १९) इति। वङ्गदेशीयजनविषयकं सूक्ष्मं पर्यालोचनं तदीयमधीयताम् (८, ८५)—

नृणां मनांसि रूक्षाणि देहा एवेह चिक्कणाः।
शिखैव बृहती साधोर्दया तुच्छैव लक्ष्यते॥ इति।

तत्रत्या ग्रामास्तु (८,८३)—

ताम्बूलवल्लिपरिवेष्टितपूगसान्द्रा
रम्भादलैरुपचितैः परिवीज्यमानाः॥
एलाफलैः सुरभयो बहुनारिकेरा
ग्रामा मुदं विदधिरे यतिनोऽस्य रम्याः॥ इति।

सिंहलदेशस्येदं तदानीन्तनं वर्णनं परीक्षणीयं सुधीभिः (८,९६)—

मुक्ताफलानि विपुलानि महोज्ज्वलानि
दिग्दन्तिवंशजनुषः करिणो विशालाः।
अम्भोजसौरभजुषः प्रमदाः सुरूपा
द्वीपे महर्द्धिमति तत्र सुरो विशाखः॥ इति।

हिमालयवर्णनम् (१०,७३–७६), कामरूपस्य महिलानां च प्रवृत्तिनिरूपणम् (८, ९२) इह कृतम्। अन्येषां प्रदेशानां नामानीत्थम्—'उत्कलांश्च कलिङ्गांश्च सान्ध्रकर्णाटकेरलान्' उल्लङ्घ्य द्रविडान् योगी सिंहलद्वीपमागमत्' (८,९५) इति। आम्राम्रातक-पनस–लकुच–कदम्ब–धव–ताल–तमाल–शाल–प्लक्षाम्लिकाऽऽमलक–पिप्पल-जम्बु-वट-बिल्व-कुन्द-चम्पक–मल्लिका-वृन्दा-जपा–वकुल–देवदारुप्रभृतीनां पाञ्चालदेशजानां लतावृक्षादीनां च वर्णनं मनोहरम्। पञ्चाम्बुप्रदेशनामकरणं यासां नदीनां स्थित्या संवृत्तम्, तासां नामान्येकेनैव श्लोकेन प्रस्तौति कविः (९, ६०)—

इरावत्यथो चन्द्रभागा प्रसिद्धा
विपाशा वितस्ता शतद्रुश्च नद्यः।
तदन्तर्गतो भाति वाहीकदेशः
तमस्मद्गतेर्विन्ध्यपादानभूतम्॥ इति।

इह काव्ये कविना कला विविधानि ज्ञानानि च निबद्धानि सन्ति। ज्योतिष-विषयकं तदीयं ज्ञानम् (२, ५८–७८) उत्कृष्टम्। नानकीयजन्मपत्रिकारचना-प्रकारः (२, ८०), 'प्रायो ग्रहाणां युवयोर्न मैत्री' (३, ८९) इत्यादीनामनुशीलनं ज्ञानवर्द्धनाय सम्पत्स्यते।

अस्य महाकाव्यत्वविषये नाधिकं वक्तव्यम्। ऐतिहासिको नानको नायकः, ऐतिहासिकी कथा, प्रस्तावानामेकविंशतिः, विविधानिच्छन्दांसि, नीतिः, प्रातः-सन्ध्यानदनदीपर्वतर्त्वादिनिसर्गचित्रणानि, रसालङ्कारादिकं यथायथं सुगुम्फितम्। नायिकाविषयको निर्णयो लब्धवर्णानामधीनीक्रियते। बहुत्रोपमा ऐतिहासिक्यो मनोज्ञाः कवेर्विस्तृतं ज्ञानं सूचयन्ति 'हनुमानिवोर्मिकाम्' (७, ५६), 'सीतामिवान्वेष्टुमगाद् वनाद् वनम्' (७ ५६) 'सुदर्शनः कृष्णमिव प्रपेदे' (७, ७९), 'दोषाय विष्णोरिव सूकरत्वम्' (७, ८०). 'हरेरिवाभीरवधूविलासः' (७, ८०), 'फणीव निर्मोकमुपैति दुःखम्' (७, १२०), 'जैगीषव्य इव स्मरन्' (७, १३०), 'श्रीदाम्नः पृथुकमिवेश्वरः' (७, १३२), उदयाद्रेरिव रविर्न शोच्यः' (७, १३८). 'ग्राहेण हस्तीव' (८, १२), 'नदीनां जाह्नवीमिव' इति।

'स्वस्ति श्रीजयरामवर्मणि शुभाः कालप्रणीताशिषः' (३, ९२) इत्यादि-पत्रलेखनप्रकारः, नूतननूतनानि हृदयावर्जकानि च सुभाषितानि ग्रन्थस्यास्यापर-मन्यतमं वैशिष्ट्यम्। सत्स्वपि बहुषु सुभाषितेषु नूतनमेकमाभाणकं ग्रन्थस्यास्येह प्रस्तूयते पाठकानां विनोदाय—'न दासेरको यावदीक्षेत शैलं स्वतस्तुङ्गमन्यं न मन्येत तावत्' (८, ११२) इति।

कविना पूर्ववर्तिनां कवीनां काव्येभ्यः पुष्कलान्यनुहरणानि समाहृतानीह—'अयं किमग्निः प्रकटोऽग्निहोत्रिणाम्' (१, ३३), 'अमुं स दृष्ट्वा बहुधा व्यकल्पयत्' (१. ३३, तुल० शिशु०), 'चित्रार्पिताश्चित्रमिदं विलोक्य' (२, ४४, तुल० रघु०,), 'विभावसुर्वा किमु चित्रसेनः किं तुम्बुरुर्नानक एव वायम्' (७,८६) इत्यादीनि। महाभारतानुकृत्या 'ब्रह्मक्षत्रियसार्थवाहवृषला यस्योदनं साम्प्रतम्, मृत्युञ्जयनमद्रयश्च वटकाः पृथ्वीपृथुः शष्कुली' (९,७७) इत्यादिश्लोकः प्रस्तावानुरूपः। तुलसीदासस्य 'स्वान्तःसुखाय' इत्यनुकरणमपीह (४,९७) दृश्यते— 'स्वान्तःसुखाय खलु तत्त्वमिदं विचेयम्' इति।

केचन प्रयोगा इह व्याकरणदृशा चिन्त्या विद्वद्भिर्विमर्शनीयाः—'यात्रिभिः' (१, १७), 'स्वयात्रिप्रवरैः' (१, १९), वरयात्रिणाम् (५, १३२) इत्यत्र च 'यात्रिक-' इत्यनेन भाव्यम्। 'वासराणि हृदयं प्रसादयन्' (७, ४८), 'विगह्नते (७, ६७), इत्यत्र च मनीषिप्रवरैश्चिन्ता प्रवर्तनीया।

प्रसङ्गानुसारेण नूतननूतनाः शब्दा अपि यथास्थानं प्रयुक्ता ग्रन्थस्यास्य गौरववर्धनाः—'द्राक्षा-बादाम' (५, १४०), 'उपानयत् सर्षपशाकयुक्ताः सा वाजरीपिष्टकरोटिकास्ताः' (७ १३२), 'पन्था यथा रात्रिषु धर्मशालाम्' (८, ३६), संयावमोदकमहोत्तमकुण्डलिन्यः, सत्पूपपायससुशष्कुलिकारसालाः' (८, ७४) इति। 'मसजिद' इत्यर्थं 'वलजम्' इति शब्दप्रयोगो मननीयः। 'सुलतानपुर' इत्यर्थे सुरत्राणपुर-शब्दः (३, ९१) ध्वनिप्रकृत्यनुरूपः। विंशति-संख्याथ, 'नखसंख्या' शब्दोऽप्येवमेव (७, १०१) नूतनः।

यद्यपि संस्कृतगिरा निबद्धो नायमेकलः प्रयासो नानकसिद्धान्तसंबद्धः, अन्येऽपि द्वित्रा ग्रन्था देवभाषया प्रकाशिताः सन्ति—१. 'निराकारमीमांसा' स्वामिकेशवानन्दप्रणीता, २. 'वाहगुरुमन्त्रसिद्धिः' ईश्वरसिंहेन कलियुगोपाह्वेन रचिता, ३. पण्डितहरसिंहकृतं 'नानकपारिजातम्' चेति, तथापि महाकाव्यमिदं प्रशस्तं महनीयं कमनीयं च विराजते।

एतादृशस्य सुचिरात् प्रतीक्ष्यमाणस्य नानकजीवनचरितप्रकाशकस्यास्य ग्रन्थस्य सम्पादनमस्य विश्वविद्यालयस्याध्यापकेन पण्डितब्रजनाथझामहोदयेन सायासं कृतम्। हिन्दी-संस्कृताङ्गलभाषामय्यो विस्तृता भूमिका इह संयोजिता-स्तेन। किन्तु हन्त, स्वसम्पादितं ग्रन्थमिमं प्रकाशितं नाक्षिसाक्षात्कर्तुं सोऽतिष्ठ-दिह धरणीतले। शान्तिश्चिराय भूयात् तदात्मनः।

सरस्वतीभवनग्रन्थमालायां पञ्चोत्तरशतपुष्पतया ग्रन्थोऽयं प्रकाश्यते विश्वविद्यालयादस्माद् एतावच्चिरं क्वचिदप्यप्रकाशितः। इतः पूर्वं द्वादशकाव्य-ग्रन्थाः सरस्वतीभवनग्रन्थमालायां प्रकाशितचराः। ग्रन्थरत्नस्यास्य प्रकाशनेन समुद्भासितं स्यात् संस्कृतजगदिति दृढं विश्वसिति।

नवरात्रारम्भे
२०३४ विक्रमाब्दे गुरौ
(१३-१०-७७ खिस्ताब्दे)

भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'
निदेशकः
अनुसन्धानसंस्थानस्य

INTRODUCTION

The famous epic 'Nānaka Chandrodayam' edited here is based on two rare manuscripts namely the one from Saraswati Bhawan Library of the Varanaseya Sanskrit Vishwavidyalaya, Varanasi and the other from India Office Library, London. In order to indicate the different readings I have symbolized then as 'Ka' and 'Kha' respectively. Thus 'Ka' bears the catelogue No. 42913 (Sahitya Section) of the Saraswati Bhaw n Library and 'Kha' bears the catelogue No. E. 3965 **R. R.** 8. I of the India Office Library London.

The Mss 'Ka' consists of 21 cantos less the first seven shlokas that are missing so also it falls short of the usual benidictory verse. Similarly in Mss 'Kha' the first nineteen cantos are intact but the 20th and the 21st cantos are missing. The frontispiece of 'Kha' is as follows:— "द्वेराजकृत नानकग्रन्थस्य काव्य पत्र १३६ का १७२—East India Company." Below in the frontispiece is written 'presented by H T. Colebrook. Every leaf bears the marks Na- 1 and Na- 2 etc. 'Heramb' is written in every counter leaf on the right hand side below.

It may be relevant here to state that every portion taken from 'Ka' has been compared with that of 'Kha' and vice versa. In cases of doubtful versions in both of these I had no other course left than to make a feasible inference of my own as may be yielded by the context of the total text but at the same time I have given the 'Ka' and 'Kha' originals in foot notes. In both of these manuscripts a duplication of alphabets aud syllables are also found. As for Example —अत्तत था, अन्योन्यो and अथ अथ, परे परे etc. For each duplication the editor has placed the adequate reading.

The epic is a work of an old Scholar Pandit DewaRaj [1] **Sharma.** He was the son of Pandit Raghupati[2] Sharma Tripathi and was of Udasi faith of Sikhism. He used to live in Kashi as one of the Vishishta Acharyas of the faith. This epic of Pt. Dewaraj Sharma was latter [1]revised and rearranged by his nephew. Pandit

---

१. अथ देवराजकविना···4/20 (Nanak-cdandrodayam).

२. इति श्री शाण्डिल्यगोत्र त्रिपाठिरघुपतिशर्मतनूज ··· Nan.—21 canto at the and.

१. तदनु तदनुजात्मजेन बुध्या
परितः शोधितखण्डिता व्यधायि Nan. 21 canto.

Dewaraj and Pt. Gangaram enjoyed among the disciples of Guru Dwarkadas who is said to be a diciple of Guru Nanaka. The age of Guru Dwarka-Das[2] whiles he was teaching Dewaraj, has been assessed approximately at 250 years. He gave a recital of the Katha of Guru Nanaka to Gangaram and Dewaraj. In the time of Auranzeb's son Bahadurshah, Dwarka Das used to live in Nagpur. Guru Govind Singh and Bahadurshah are known as friends. The period of Guru Govind Singh is calculated to be from 1666 A. D. to 1708 A. D.

Once Raja Bhagmalla is said to have requested Pandit Gangaram to give a recital of Nanaka's Katha to which he acceded. Latter on Pandit Dewaraj Sharma made his own contribution to the Katha rendered it into verse form and gave it the form of the epic. Thus the Katha was put forward by Gangaram which was rendered into poetic form by Pt. Dewaraj Sharma.

The present epic is greatly significant especially in as much as it puts forward the Sikh thought propounded by Guru Nanak in the [3]Punjabi dialect and gives a clear and detailed [4]picture of Guru-Nanaka's life teachings and philosophy. Alongwith a thoughtful and lively discussion on Udasi faith in Sanskrit it presents an Uniform description of the Sikha religion etc. to the scholars of Sanskrit. Also it abounds in the conversations between Guru Nanak and Guru Gorakh Nath and his disciples and the other Acharyas. Its descriptions cover a detailed account of all places inside and outsitde of the country which Guru Nanaka had travelled.

The epic on the whole is in twenty one contos of which one to ninteen deal with Guru Nanaka's life and philosophy. The two ie., twentieth and twentyfirst present a brief life-sketch of the nine Guru. Each of the first nine cantos are captioned seperately and from this point of view it resembles the Uttara-Ramcharitam.

The title of the first conto is 'Balsindhu-Angad-Samvaad' It consists of one hundred and sixteen verses and marks tne beginning of the Katha which was presented before Raja Bhagmalla by Gangaram. The gist runs like this–

---

2. Nan.–206/21.
३. देश्यैः सुबोधमधुरैः ··· ··· Nan.–9/1
४. प्रादुर्भावा ··· ··· ··· ··· Nan.–2/1

Angad descended from Bahuj family. He used to ponder over the transitariness of life right from his childhood. Oneday he went to pay a visit to Jwaia Devi in forest. There he heard about Nanaka. He met him. Nanaka preached him on suth sudjects as life, 'illusion & world. One day Nanaka stood up and deserted the place. Angad started searching. While searching Nanaka, Angad reached in a village named 'Shadura". There he met Chanhrabhanu's son Balsindhu. when he heard the virtues and praises of Nanaka from him, he asked him to narrate the story of Nanaka to him.

The second canto named as Raj Vahuman' consists of 228 verses. It starts with the story of Nanaka. The Siva Ram Varma was the grand father of Nanaka & Kalverma his father. He was bleesed with a son and a daughter Who were named respectevely Nanaka and Nanaki. From his very boyhood Nanaka exhibited a philanthropic temperament & began to give alms to the needy & the poor. This made his father angry. In order to divert his attention & to keep life busy his father placed him in charge of cows to graze & rear. Once it so happened that while Nanaka was sleeping a cobra was seen to protect him against sun. Raja Bolar Rai was an eye witness of this event. The third canto consists 124 verses and is named as Adhikar Grahan. It gives further details of his life history. The anoyed father now sent him to the market to sell some earthen wares. There Nanaka happened to meet a saint. He gave all his money to the saint and came back empty handed. His father now being further enraged threatened him and turned him out of his house. when Raja Bolar Rai came to know of this fact he invited Nanaka and made him stay with him. In this same canto we see that Nanaki was married to Jai Ram Verma. We also see that Jaja Bolar Rai's applauding for his (Nanaka's) charitable disposition.

The fourth canto named as "Nrpa. Samprasad" consisting of 112 verses reveals how Raja Dhankhan (Nawab of sultanpur) employed him as an incharge of a stone house. There Nanaka donated to his full satisfaction. on complaint when the Raja made enquiries he found that he himself owed money to Nanaka. Now Jai Ram Verma busied himself in arranging Nanaka's marriage.

The fifth canto named as "Parinaya" & containing 174 verses describes seasons as well as Nanaka's marriage ceremoney. Nanaka did not appear happy on marrying sulakshani daughter of Moolchandra.

The sixth canto named as Vangamana consists of 148 verses and describes the birth of two sons of Nanaki.e. Shri Chand and Lakshmi Chand. A saint came to his house one day & asked Nanaka to take bath. Nanak went to the Veya river, but he did not come out of the river. Every body searched for him who was believed to have drowned in the river. The Raja geting this news checked the account maintained by Nanaka but found that the Raja himself owed money while Nanaka had appeared before Raja. Then Nanaka went to forest. To bring him back Mool (Nanak's father inlaw) personally went to him but he did not return. Moola declared him as insane and intended to give all his wealth to his daughter. But at last Nanaka enlightened & convinced everybody that early rides have no value that doing good to others is the only duty of man.

The seventh canto 'Sidhi Vimochan' consists of 154 verses & describes in detail the attempt of his father kalverma to bring back Nanaka from the forest for which Mardana was deputed. But he also did not succeed to pursuade Nanak. Nanaka rather asked him to purchase veena by taking money from Nanaki Mardana took money from Nanaki and purchased it from a seller namad Feru a merchant of Asikpur. There is also an anecdote relating to Feru & Nanaka's previous life. He then came to Raja Mullick who had always insulted the saints in his life & also insulted him. presumably as a result of this insult hurted on Nanak. The Raja's son fell ill. Ultimately Nanak asked him to release a member of saints from prision. So the Raja did and then his son soon recovered from his illness.

In the eight canto Bolar Raj is seen so much spell-bound by Nanak's teachings that he became a devotee. After this he went to Bang and Gaur. Ther from he went to Jyotisha-Pura (now known as kamakhya). There he defeated the young girl magicians who used to transform a young man to a sheep by their magic and they also accepted the discipleship of Guru Nanak. Later Nanak also converted Raja Siddhimanya kshitipal to his creed. After that travelling through 'Asparshnath island' he come to Salsaraya who also became his disciple. Then he started for Vishhar Nagar.

The ninth canto desribes his journey to Vishhara Desa. It is named "suwarnapur gamam" consisting of 149 verses. While going in the ocean he was honored and worshiped by Shuddhasen and Indrasen.

Then he went to Shilmila Island. Thereafter he preached the Raja Kamal Nayana the rular of The Vahika Des. Spending nineteen months and teavelling in various places of Jamboodweepa Nanak went to Gandhar. Ther he preached the Daitya Raja named Devaloot. Then he went to Praswa Nagar. This was followed by his visit to suvarnapur where Dharma Singh also became his disciple.

The tenth canto is captioned as "Sumeru Gaman" and consists of 126 verees. Though desiring to go to sumeru Nanaka changed his mind & went to Mekka & Maddina. It gives a description of Mlechhacharyas (Muslims saints) there of. Nanaka explained the teachings of the Koran to Mardan. He came back home consoling his sister, the Guru went to Himalayas. Here he had an exchange of ideas with Goraksha & his disciples. At last Gorakha was so much impressd with him that he declared him a "Yukta-Yogi".

The eleventh canto is named as "Bhartrihri-Adi-vijaya" It consists of 139 verses. It throws light on the discourse between Nanaka and Gorakha's disciple particulrly, Bhartrihari. Bhartrihari ultimately admited his defeat from Nanaka.

The twelfth canto is "siddha samvada" and consists of 213 verses. This relates to the defeat of all of the Goaksha's disciples. It discuseed Hatha-Yoga. In the end comes the Goraksha Nanaka discourse in which Gorakh comits the great stature of Nanak. Here is found a discription of chashaka (wine) & "Bhairavi-Chrkra" and the names of 9 Nathas 6 yatis and 84 Siddhas.

The thirteenth canto abounds in 157 verses & is named as "Bhagwat stuti". It gives the Nanaka's preachings to Duttatreys at Mount Byar and his descriptions and the utility & importance of the "Ajapa Japa". Also it describes Navadhā Bhakti & Vishnustotra. It relates the talks between him and Prahlad at Mount Analachit. Therefrom Nanaka goes to Dhruvalok. At this point Dhruvalok is described. And here from the Guru goes to Baikuntha (Vishnv's dhāma). A description of Vishnudham follows.

The fourtenth canto comprises of 342 verses and is named as "Bhoogoladi-varnan". Here Lord Vishnu himself inspires Nanak so propound and propagate the "udasi cult". Then the Guru comes down to earth passing through Dhruvlok & gives a description of the Bhoogol & khagol etc. of the three worlds.

The fifteenth canto is "Ram Charita". It consists of 168 verses. While en-route to Lanka the Guru narrated the said Ram Charit to Mardana. First, Nanaka came at Sainya mountin and discoursed with Kalyana & Seela sena. Then he went to Janaka. His coming back from him follows Sukha chapat episode. From there the Guru went to Matsya-Nagar and Lahri Nagar. His Journey to Lanka follows this. There he discoursed with Vibhishana.

The sixteenth canto is named as 'Gandhar Gaman'. It consists of 156 Verses. It relates to Mardana's death at Kharjoorpur. After the death of Mardan Guru came to Talbandika. There he went to Mardan's son named as Sahjada and made him his pupil. There from he went to Gandhar he mane the king of that city as his pupil and named him as Bali Candhar.

The seventeenth canto is titled as 'Kurukshetra yatra' which consists of 160 verses. Nanaka went to kekaya Nagar. He met Balgudrain. Thereform he came to Pakshaka his home then he went to kurukshetra.There the Yati was insulted by Sikandar's son The Yati wished him ill and cursed him.

The eighteenth canto is named as "Ajitadi Uddhar." It consists of 192 verses. Babar's army came to Sultanpur. Dhankhan was skilled. Babar became king by defeating Ahan Khan. A discourse between Babar and Nanak follows this. Babar was pleased by the idea of Nank and asked him propagate his cult to all over the world. The Guru came to Pakshak. There he stayed with sulakshani and named her as "Ramdasi" and propagated the Udasi-cult there.

The nineteenth canto bears the title 'Vishwavijaya' It consists of 254 verses The Yati went to Jalal. He querried about Gurumuka. Jalal came across the charms of Guru's Gurumukha while he was on voyage to Mekka He came back to pay a visit to Nanaka again and was enlightened by Nanaka's idea about Gurumukha, Then the Guru went to "Shekha-Fareed Pattan" and preached Varahim. He went to Talwandi and consoling Lal (his uncle) reached Pakshaka. There he thoroughly consoled sulakhaani and told that Angada will succeed him as Guru. Thus Balsindhu told Angada. In this way Nanak presented the Adwaita idea in a dialect as Vyas for the Vedas. After the death of Nanak his half dead as has body was burnt on pyre by Aryans and half of it was buried by Mohamdans.

The twentieth canto does not bear any particular name. It is written as "Angadadi Kathayam Vinshah Prastavah." It consists of 159 verses. Angada became the second Guru of Sikhs. He bestowed the Guruship to Amardas. Then Amardas's third son Arjundas succeeded his father and became the Guru. Jahangeer imprrisoned Arjuna. Then Hari Govinda was made Guru of Sikhs. JahanGeer and Hari Govinda fought against each other. However, Hari defeated Jahageer's army and established himself at Kartarpur. Then he entrusted the Guruship to his relative Hari Rai.

The twenty-first canto is simply titled as 'Angadadi Kathayam Ekvinshah Prastavah' and consists of 240 verses. Shahjahan handed over the kingdom to Dara Sakooh who was faithful to Hari Ram's teachings. But Aurangzeb killed Dara and fought agains Hari Ram. Hari Ram bestowed this Gusuship to his discriple Hari Krishna. Hari Krishna died. This disciples then made Teg Bahadur as their Guru. Teg Bahadur went to Pataliputra Via Kashi. Here he was blessed with a son and now named him as Govind Singh. Govinda worshipped the Goddess Chandika for five years to succeed in taking revange with Aurangzeb. Chandika gave him a sword. Aurangzeb's son Bahadur shah became his friend. The Guru went to Nagpur. There Dwarkadas a disciple of Guru Nanak gave Kesha, shastra and comb to Guru Govind. Now Guru attacked on the muslim army. while fighting in the battle field one muslim injured the Guru in his stomach. The Guru fell ill. While breathing his last the Guru bestowed the Guruship to Adigranth. So the holy Adigranth or Granth Sahib was named as Guru-Granth Sahib.

We have acquainted ourselves with the story of the epic spreading through its different cantos. The following account will now unfold the philosophy & preaching of Guru Nānaka.

The cantowise description of the above is as follows:—

From Sloka	65/1 to 96/1.
,,	76/2 to 89/2,
,,	64/6 to 69/6.
,,	130/6 to 144/6.
,,	118/7 to 128/7.
,,	35/8 to 38/8.
,,	50/8 to 66/8.
,,	71/17 to 104/17.
,,	60/18 to 68/18.

„ 107/18 to 123/18.
„ 126/18 to 132/18.

In the above theory he has pointed the one single path i. e. Udāsī cult leading to realization of God for the whole humanity. While talking with Bābara (see 60/18 to 123/18) and with Māla (see 107/19 to 1.3/18) Nānaka has said that God is one and without caste or creed. The same alpervading God is worshipped by different people under different names. This is what has been called as " नामरूपप्रपञ्च" in the theory of incarnations in Puranas.

Then in this epic we come accross the स्तोत्रs (songs of prayer) of Vishnu and Shiva respectively. There are four different songs dedicated to Vishnu. They are in verses from 20/1, 52/1, 134/13 and 157/16 of the Epic.

The songs dedicated to Shiva are from sloka 4 to 10 in canto 10. in canto 10. Then the 14th canto (see 13/4 to 74/14) containing instruction by Lord Vishnu to Nānaka. In these Shlokas Guru Nānak has been asked by Lord Vishnu to spread the religion named Udāsa as called by him. This religion is not restricted or limited to any particular caste of creed.

In this way Guru Nānaka advised by Lord Vishnu propounded the Sikha-Dharma. The word Sikh means a pupil. Nānaka was a Sikh (pupil) of Vishnu Himself. Therefore this Dharma is named as sikh Dharma. Nānaka called God as Vahu-Guru (The seed Mantra of Sikhs). Here the relation between the teacher and taught is significant. This relation came up to the 10th Guru The 10th Guru Govind Singh at the time of his death bestowed the Guruship upon the "Adigranth". Thus the "Adigranth" later on was called as "Guru Granth-Sāhib".

To lead life according to the word of Guru Granth Sāhib and to keep one self always engaged in learning are the essential things for Sikhs. This Sikh Dharma is of six types. (I) Udāsī (II) Nirmala (III) Nāma dhārī (IV) Sutharāsāhī (V) Sevā-panthī and (VI) Akālī. All these types follow the words of "Guru Granth Sāhib."

In all in this holy book, there are 384 sabad (words) and 15575. Band-Pada's in which:—

2949 are by Nānaka.
57 are by Angad Deva.
2522 are by Amar Dās,
1730 are by Rāma Tās.

6204 are by Arjan Deva.
196 are by Teg Bahadura.

The last pada of Teg Bahādur is supposed to have been composed by Guru Govind Singh. The rest three Gurus i. e. Hargovind Hara Rāi and Hari Krishna did not contribute to the Ādigranth. Besides this the Ādigranth contains the compositions of as many as thirty five prominent Indian saints including Jaydeva, Farid, Nāmdeva. Kabira and Raidās. This bears an ample proof of a religious movement in India culminating in the Panjab with Guru Nānak and his successors. This movement is known as Bhakti-movement. In this holy scripture the following dialects are used. The Eastern Apabhransha, Santawanī, Panjābī, Apabhransh, Marāthī, Hindī, Lehanda, Sindhī and some words from Arabic and Persian.

The Sikh religion as enunciated in the Ādigranth (Guru Grantha Sāhib) is based on the following concepts :—

1. The concept of God :—i. e. the only existent reality is God. The fact is corroborated in "whatever I see is Brahman';—Mahla 5.

2. Atributes of God is mentioned in the "Mula—Mantra" which is" Ik—Omkr Satnam Karta Purukh Nirbhay Nirvair Akalmurat Ajuni Saibhang Gurparsad".

3. Ths unity of God :—i. e. God is the only eternal entity that has created purusha s (Brahma, Vishnu, Mahesh) and Prakriti (Māyā) and three Gunas (Satya, Rajas and Tāmas). He is distinct trom Jīva.

4. The name of God :—The name is truth. He must be called sat or Truth. All other names except Satnam are Kirtam (Composed names).

5. God as creator :—The creator himself pervades his creation. He is—the primal cause. The creator and the creation though seemingly different, are one.

6. The concept of Jīva :—Jīva is a sort of miniature of Brahman. It is its own individuality. Brahman is infinite, Jīva is finite. Jiva transmigrats from one body to the other in accordance with its merits and demerits.

7. The coacept of Mayā :—As per the Ādigranth, Māyā is that power which takes us away from men.

8. The concept of creation :—The Kartā Purukh creates when ever is His will"—Rāga Māru (G. G. S.) "when it was His will He ereated the world."

9. Microcosmic theory :—Two hymns of the Ādigranth—one by saint Peepā and the other by saint Ben are sighificant regarding this theory. The Universe is the macrocosm and the body is the microcosm. The soul lives in the body and the higher soul lives in the universe. Since the soul and the Higher soul are the same in Essence and the Higher soul is reflected in the soul, similarly the universe is found in the body.—G. G. S. Rāg Dhanasari, Rāg Rāmkali.

10. The concept of Karma and Transmigration :—Karma means action. Fvery action is like the seed sown in the body which is a field of action. The soul (Purush) is a farmer. The Higher Karma is admired by Guru and the Lower Karma (Karm-Kanda) is rejected.

11. The concept of Hukm :—It means order or Judgement of God. In Muslim theology it includes the order of the prophet as well "By the Hukm the Jivas are created" Japuji.

12. The concept of Grace ;—Grace of Lord. "My Lord is one. rhere is none other. He is realized by His grace."

13. The concept of Ego :—Ahamkara. The Gurus declare that the path of ego is adverse to the path of devotion. The path of ego is the path of destruetion. It is said in the Asadivār Mahla—1.

14. The concept of mind and intellect ;—The mind and the intellect are the outer covering of the soul. Thus they have closer and deeper relaions with soul.

Accordiug to "Nānaks Chandrodayam" the repetition of name of God (Japa) has got a great significance in Sikh-Dharma. JAPA is of two types :—Lib-Japa and Ajapa-Japa. By Libjapa of God one becomes an affectionate of God and then by Ajapajapa one sees the invisible God visible before [1] him. The epic says that when the Hamsa (the shambhu in Susumna) Ceaselessly repeats the "So-Aham" then it is called "Ajapajapa" see Nānaka Chandrodayam 11/13 and 15/13.

---

1. सोऽहमित्यजयया स्मरणीयम् ।
विस्मृतस्य महसः खलु रूपम् ॥

× × ×

2. हंसो जपत्यविरतामजपामयत्नाद्
ध्येयं निरावरणमात्ममहो परोक्षम् ।

In the opinion of Guru Nanaka the Siddhi (fulfilment) is achieved by two ways—one by Jnanamarga and the other by Bhaktimarga. This is described in the epic 22/13 to 23/13.

It is taking these ideas into consideration that Guru Nanaka propounded the Udasi-Cult. This Mata (cult) is accepted by that person who does not follow casteism and is very faithful to the Shastra, Guru and Govind. A householder also can follow and accept this way of Dharma. To keep matted hairs and to wear only a peice of cloth etc. are no requisites of this Dharma. (See the epic 15/14 to 73/14).

Those who accept the Udāsi-Cult are of 4 typees- Kutichaka Bahūdaka, Hansa and Parama Hansa. Again these followers of four types are divided into three types—Jnānasanyāsi, Vedasanyāsi and Dharm aSanyāsi. These latter are again divided into five types-Udāsina, Sādhaka, Naisthika, Vanāsraya and Virakta. Thus they are of $4 \times 3 = 12 \times 5 = 60$ types.

From canto tenth to twelvth we see the discussions of Guru Nānaka with Guru Gorakhanātha and his pupils. The short summary of this descussion is given below—

Canto 10—śloka 19 to 125 discussion with Matsyendranātha about "Yoga—body".

Canto 11—śloka 2 to 23 and 77 to 89 with Bhartrihari about Yoga and Samādhi.

,,	,,	,,	66 to 75 with Gopichadra about 'Kapaladi-Mata'
,,	,,	,,	46 to 56 with Kanipha about God's existence.
,,	,,	,,	58 to 65 with Hanipha about the importance of Guru.
,,	,,	,,	90 to 104 with Bhutava about 'Chārvāka—Mata.'
,,	,,	,,	106 to 120 with Lahuriya about Bauddha—Mata.
,,	,,	,,	123 to 136 with Kangar about Bhakti—Mata.
,,	12	,,	2 to 20 with Sangar in miscellenious topics.
,,	,,	,,	30 to 40 with Mangalanātha about Vairāgya-Mata.
,,	,,	,,	43 to 59 with Shambhunātha about 'Prabhākara Mata'
,,	,,	,,	117 to 129 and 156 to 177 with Guru Gorakha Natha.

At last the Siddhas (Gorakha and his pupils) beleived Nānaka as "Yukta—Yogi".

Besides this here we come across the description of 9 names of Nātha's from 129/12, then 6 names of Yatis from 190/12 and 84 names of Sidhas from 193/12 to 207/12. Then Gorakha describes the drink (Shīdhu Chasaka) and also the Bhairavī Chakra in 14/12 to 18/12. Thus the cantos 10, 11 and 12 present a clear idea of the Yoga, Bhakti, Jnāna, Vairāgya and Hatha-Yoga.

In the 14th canto Guru Nānaka has elaborately described the position of the Earth, Hell and Heaven (a. e. Bhoogola and Khagola). In this way this epic presents a vivid picture of the natural geographical description of jambū-Island. This is described from 92/14 to 270/14. Again in the same canto we also find the description of the Hell and the torture of the Hell which a sinner has to meet in the Hell. According to this description there are as many as twenty eight Hells (see the epic 271/14 to 278/14 and from 1 79 to 319/14). Then from 311/14 to 311/14 describes the defferent types of sinners. Finally from 322/14 to the and of the canto the Heaven and its bounties are described.

Over and above these descriptions the book also comprises of the names of places visited by Guru Nanaka which are as many as fifty three in number. The proper names that have occured are hundred in number and the names of the pupils of Guru Nānaka are 25 in number.

दशमो गुरुर्गुरुगोविन्दसिंहः १६६६ ई० तः १७०८ ई० पर्यन्तं सिक्खाणां गुरुत्वमुवाह। अवरङ्गजेबस्य पुत्रो बहादुरशाहो गुरुगोविन्दसिंहस्य परां भक्तिमाचरत्। यत्रावरङ्गजीवो गुरुगोविन्दाश्रितान्तं द्रुह्यति स्म तत्र बहादुरशाहेनासौ-गुरुरत्यन्तमाद्रियते स्म। तस्मिन्नेव समये गुरोर्नानकस्यान्यतमः शिष्यो गुरुद्वारकादासनामोदासिमतमावहन्नागपुरप्रान्ते निवसति स्म। स चासौ वैष्णवः सार्धशतद्वयीसमवयाः मन्त्रसानधं[1] समासादितवानासीत्। तस्याभूवन्ननेके शिष्या येषु गङ्गारामो देवराजश्चान्यतमावभूताम्।

एकदा राजा भागमल्ल आह स्म गङ्गारामं नानकस्य कथां कथयितुम्। गङ्गारामो[1] नरपतिं तं गुरोर्नानकस्य देहत्यागपर्यन्तं सर्वां कथामकथयत्। तदनु देवराजोऽङ्गदादेः[2] पदलाभकथामब्रवीद्राजानम्। इमां च कथां कविरसौ महाकाव्येनापि तदनु[3] प्रास्तौत्। अथ ततस्तदनुजात्मजेनेयं कथा शोधितखण्डिता व्यधायि। ग्रन्थान्ते लिखितपद्येनेदं ज्ञायते यदसौ[4] शाण्डिल्यगोत्रीयस्त्रिपाठिरघुपतिशर्मतनूजो देवराजशर्मनामा महाकविरासीत्।

---

१ विसृष्टोऽपि यतीशेन तत्सेवायै स्थितोस्म्यहम्।
प्रासदन्मयि योगीन्द्रः सन्तो दीने दयालवः॥ —नानक च० २०४।१९

१. नानकचन्द्रो० २०६।२१

१. गङ्गारामस्तमूचे गुरुशरणयतेर्द्वारकादासनाम्नो।
वैशानामीश्वरस्य प्रथममकथयं तां कथां प्रश्नतोऽहम्।
तत्रासीद्देवराजः परमकवयिता धारणाशक्तिशाली।
स त्वां वक्षत्यशेषं यतिपतिचरितं चारुसंस्कृत्य वक्ता। —नानक च० ४।२१

२. अथ देवराज कविना कथित कथिताङ्गदस्य पदलाभकथा।
—नानक च० ४।२२

३. कथिता कविदेवराजनाम्ना
विगलकथा सुधिया च नानकीय।
तदनु तदनुजात्मजेन बुद्धचा
परितः शोधितखण्डिता व्यधायि॥ —नानक च०—२१

४. इति श्रीशाण्डिल्यवंशावतंस–त्रिपाठिरघुपतिशर्मतनूजदेवराजशर्मविरचिते नानकचन्द्रोदये।
नानक २१.

पाठभेदाः

नानकचन्द्रोदयाख्यं महाकाव्यमिदमितः पूर्वं नागतमासीत् प्रकाशम् । वाराणसेयसंस्कृतविश्वविद्यालयेनाहमाज्ञप्तः सम्पादनमस्य कर्तुमिति । तदेतत्सम्पादयितुमधिगतौ केवलं द्वावेव हस्तलेखौ (mss) मयेति । एकस्तु वाराणसेयसंस्कृतविश्वविद्यालयीयसरस्वतीभवनपुस्तकालयात् अपरः इङ्गलैण्डदेशस्य इण्डिया-आफिस पुस्तकालयात् । (India Office Library London) तयोः सरस्वतीभवनपुस्तकालयस्य हस्तलेखे (mss) २१ प्रस्तावाः सन्ति । परन्तु प्रथमप्रस्तावे प्रारम्भात्सप्तश्लोकाः न सन्ति येऽत्र I. O. पुस्तकालयस्य हस्तलेखाल्लिखिताः सन्ति । अतो हेतोर्मङ्गलश्लोकोऽपि नास्ति तथा चैतस्मात्पूर्वं ॐ श्रीगणेशाय नमः इत्यपि नास्ति यल्लण्डन-I. O. पुस्तकालयस्य हस्तलेखाल्लिखितमत्र वर्तते। सरस्वतीभवनपुस्तकालयस्य हस्तलेखस्य संख्या (सूची संख्या, Catelogue No.) साहित्यविषये ४२६१३ वर्तते। ग्रन्थमध्ये पाठभेदप्रवर्तनसमयेऽस्य नाम "A" इति (क) चिह्नकारेण कृतमस्ति सम्पादकेन।

लण्डनस्थ I. O. पुस्तकालयस्य हस्तलेखस्य प्रारम्भेऽधोनिर्दिष्टं पदमञ्चति लोचनपथम्--"देवराजकृतनानकग्रन्थस्य काव्य पत्र १३६" का १७२ तदनु "East India Compony" इत्यस्य मुहरचिह्नं वर्तते । ततः "Presented by H. T. Colebrook इति । प्रतिपर्णमत्र पृष्ठे ना० १, ना० २ इति रूपेण पृष्ठसंख्या लिखिता वर्तते तथा च सर्वेषां पत्राणां दक्षिणभागस्याधः "॥ हेरम्ब० ॥" इति लिखितं वर्तते । अस्य सूची संख्या १४४३ E. ३६६५ R. R. 8.1 वर्तते । अत्र केवलं १६ प्रस्तावाः सन्ति यत्राक्षराणि प्रायेण सुपठितव्यान्येव । कदाचित्कचिन्न केवलं कस्यचिदक्षरस्य द्विरुक्तिः कृता वर्तते यथा i अन्योन्यो...ii तद्यद्य...iii तत्तत्तथा...इत्यादि । हस्तलेखेस्मिन् प्रतिप्रस्तावं श्लोकानां संख्या सुव्यवस्थिता नास्ति यथा १०५ तः पश्चात् १३५, ततः पश्चात् १२०, परमिदमस्ति कादाचित्कम् । कुत्रचिन्न श्लोकस्य संख्या नैव प्रदत्ता वर्तते । परं पठने सरस्वतीभवनादयं हस्तलेखः श्रेयान् । I. O पुस्तकालयस्य हस्तलेखस्य नाम ग्रन्थमध्ये पाठभेदप्रवर्तनसमये "ख" इति कृतमस्ति ।

तदत्र प्रारम्भतः सप्तश्लोकपर्यन्तं "B" (ख) इत्यस्माद्ग्रन्थात्प्रेसकप्पिकायां लिखितमस्ति येषां शुद्धीकरणं पाठभेदप्रवर्तनञ्च "क" इत्यनेन कृतमस्ति तदूर्ध्वं

NB. इदमत्रावधेयं यदत्र महाकाव्ये प्रस्तावाः सन्ति नतु सर्गाः । प्रायेण उदासिमतप्रख्यापकानां ग्रन्थेषु प्रस्तावा एव स्युरिति ।

(i) सर्वत्र ग्रन्थे टिप्पण्यां "क" इत्यनेन सरस्वतीभवनस्य हस्तलेखो बोद्धव्यः ।

(ii) सर्वत्र ग्रन्थे टिप्पण्यां "ख" इत्यनेन इण्डिया आफिस पुस्तकालयस्य हस्तलेखो बोद्धव्यः ।

प्रथमप्रस्तावस्य अष्टमश्लोकात्पञ्चदशप्रस्तावपर्यन्तं श्लोकाः सरस्वतीभवनस्य हस्तलेखाप्रेसकप्पिकायां लिखिताः सन्ति येषां शुद्धीकरणं पाठभेदप्रदर्शनं च "ख" इत्यनेन सम्पादितमस्ति । ततः पश्चात्षोडशप्रस्तावादारभ्यैकोनविंशतिप्रस्तावपर्यन्तं श्लोकाः इण्डिया-आफिस-पुस्तकालयस्य हस्तलेखात्प्रेसकप्पिकायां लिखिताः सन्ति येषां शुद्धीकरणं पाठभेदप्रदर्शनं च "क" इत्यनेन विहितमस्ति । तदनु विंशतिप्रस्तावादेकविंशतिप्रस्तावान्तं यावत् सर्वाणि पद्यानि "क" इति लेखेनैव लिखितानि सन्ति । एषां शुद्धीकरणं पाठभेदप्रदर्शनं च स्वयं सम्पादकेन विहितमस्ति ।

अनयोः पाठयोर्मध्ये स एव पाठो मया मूलग्रन्थे प्रदत्तो यः श्रेयान्द्वयोरस्ति । कुत्रचित् "ख" इत्यस्य इतरत्र 'क' इत्यस्य अपरत्र नैव 'क' इत्यस्य नापि 'ख' इत्यस्यैव परन्तु सम्पादकज्ञानानुसारं कस्यचिदन्यस्यैव मूलग्रन्थे पाठो विहितोऽस्ति सम्पाकेन । परन्तु टिप्पण्यां यः पाठो न दत्तोऽस्ति मूले स पाठस्तौ वा पाठौ प्रदत्तौ स्तः ।

यथा "नास्त्यकः दुखमेतस्य' इति 'क' इत्यत्रास्ति "नास्त्यको दुःखमेतस्य" इति "ख" इत्यत्रास्ति तत्र सम्पादकेन "नास्त्यकं दुःखमेतस्य" इति पाठो मूले कृतः उपरितनञ्च पाठद्वयं टिप्पण्यां विहितमस्ति ।

यथाः—नास्त्यक—"क०"
नास्त्यको—"ख०" इति ।

प्रस्तावानां नामानि

१. बालसिंधवङ्गदसंवादः ।
२. राजबहुमानः ।
३. अधिकारग्रहणम् ।
४. नृपसम्प्रसादः ।
५. परिणयः ।
६. वनगमनम् ।
७. सिद्धविमोचनम् ।
८. सालसरायविमुक्तिः ।
९. सुवर्णपुरगमनम् ।
१०. सुमेरुगमनम् ।
११. भर्तृहर्य्यादिजयः ।
१२. सिद्धसंवादः ।
१३. भगवत्स्तुतिः ।
१४. भूगोलादिवर्णनम् ।
१५. रामचरितम् ।

१६. गान्धारगमनम् ।
१७. कुरुक्षेत्रयात्रा ।
१८. अजिताद्युद्धारः ।
१९. विश्वविजयः।
२०. अङ्गदादिकथायां विंशः प्रस्तावः ।
२१. अङ्गदादिकथायां एकविंशः प्रस्तावः ।

कथानकस्य माहात्म्यं महाकाव्येऽत्र ।

देश्यैः सुबोधमधुरैः परमात्मतत्त्वं
वाहीकवर्गमपि बोधयताञ्जसैव ।
द्वैतान्धकारमपनीयत नानकेन
सन्दर्शितस्तनुभृतामपवर्गमार्गः ॥ १ ॥

प्रादुर्भावावधिमधुरिमोङ्कारगुर्व्यः कथास्ताः
प्रस्तूयन्ते विमलयशसो नानकस्यानवद्या ।
याभिः शुद्धिं दधति मलिनाः स्वर्धुनीस्पर्धिनीभिः
सन्तोनन्तं हृदि शमसुखं कर्णकोणङ्गताभिः ॥ २ ॥

कलिमलिनमतीनां शोधयन्मानसानि
स्वयमुदयमुपेतः शास्त्रयोनिः स्वयम्भूः ।
अकिरदविषमां यो ज्ञानवैराग्यधारां
स जयति करुणाब्धिर्नानको योगिवर्यः ॥ ३ ॥

श्रीशब्दाम्बुधिसम्भवद्भ्रमतमो हृद्ज्ञानचन्द्रोदयो
विद्वद्वृन्दविवेकवैभवभवन्नोत्कर्षहर्षप्रदः ॥ ४ ॥

महाकाव्यमिदं संस्कृतभाषया देशभाषायां लिखितस्य नानकोपदेशस्य विदुषां मध्ये अपूर्वं महत्त्वं प्रददाति । सर्वप्रथमं तु संस्कृतभाषायामुदासिमतस्य प्रौढा विवेचना पण्डितानां समक्षमायाति तदनु नानकेन तच्छिष्यैश्च प्रचारितानां वेशभूषादीनां विवेचनमागच्छति। न केवलमेतदेवापि तु नानकस्य समस्तस्य जीवनस्य वृत्तम्, तस्योपदेशाः तस्य चमत्काराः, तस्य नानादेशाटनभ्रमणे नानास्थानानि च विदुषां समक्षमागच्छन्ति । अतः पश्चात्तस्य गोरक्षादिशिष्यैः सह शास्त्रार्थः, प्रश्नानां समाधानं, बाबरादिमुगलराजानां प्रश्नानां समाधानञ्चास्माकं पुरतः समापतन्ति । महाकाव्यस्यास्याध्ययनेन प्रायः सर्वेऽपि संस्कृतानुरागिणः शिष्यधर्मस्य विषये समेषां कौतूहलानां समाधानं हृदि विधाय तस्य महत्त्वं कथयिष्यन्तीति ।

कथानकम्

प्रथमः प्रस्तावः

श्री भागमल्लाभिधो नृपतिरुदासिवर्यविदितं काशीनिवासिनं गङ्गारामं नानककथां कथयितुमकथयत्। गङ्गारामश्च राजाज्ञां शिरसि निधाय धर्मदासं, हरिदासं, नानकं, सुरतरामं च प्रणम्य कथां कथयितुमारेभे।

बाहुजकुले एकस्मिन्नङ्गदोऽजायत। स च बाल्यादेव जीवनस्य तत्त्वं चिन्तयति स्म। एकदा स ज्वालादेवतां द्रष्टुमगमद्वनम्। तस्मिन्सुन्दरे वने ददर्श स देवदारुतरोरधोपविष्टमेकं तापसम्। तापसोऽपृच्छत्कस्त्वं किञ्चेच्छसीति। अङ्गदः स्वं परिचयं निगद्य कथं भवबन्धनेन मायया मोहेन च संपृक्तानां जनानामुद्धारः स्यादिति विषयेप्रश्नमपृच्छत्तापसम्। स च तापसो नानकएवासीन्नान्यः। नानकोऽङ्गदं मायाया ब्रह्मणो जगतश्च स्वरूपं च वर्णयामास। वर्णयित्वा च तमुपदिदेश। उपदिश्य च कथितवान् यद् गुरोर्वचनं सर्वदा परिपालनीयम्। अयमेव भविष्यति मम सद्दक्षस्य गुरोरुपदेशः। अङ्गदः शिरसोपदेशमुवाह। एकदा नानको यदृच्छयोत्थाय ततोन्यत्रागच्छत्। अङ्गदो दुःखितो जातः। बभ्राम च तीर्थेषु। तत्रासीत् षडुर नामा कश्चिद् ग्रामः। तत्राङ्गदः कश्चिदेतादृक्षं जनमन्वेषयति स्म योऽजानत नानकमपश्यच्च तमिति। अनन्तरं तत्रागतः कश्चित्तापसः। अङ्गदस्तं समभ्यर्च्य प्राह स्म तस्य परिचयम्। सोऽवदद्वत्स आसीत् चतुर्थवर्णे जातः चन्द्रभानुसुतो बालसिन्धुः। नानकस्तमुपदिश्य कृतार्थमकरोत्तमिति। श्रुत्वाङ्गदः प्रसन्नो जातः। प्रार्थयामास च तं नानकस्य कथां कथितुम्। ततो बालसिन्धुस्तं नानकस्य कथां कथयितुमारेभे॥

द्वितीयः प्रस्तावः

आसीत् शिवरामभक्तः शिवरामवर्मा। तस्याभवत् पुत्रः कालो नाम। कालः पुत्रलाभार्थं जपहोमादिकं कारितवान्। नानकी तस्य पुत्री जाता नानकश्च पुत्रो बभूव। पुत्रजन्म श्रुत्वा हरिदयालुर्ज्योतिविद् तत्रागतः। स च पुत्रस्य जन्मकुण्डलीं निर्ममौ। जन्मकुण्डलीवर्णनं श्रुत्वाङ्गदः बालसिन्धुं गुरोर्जन्मकुण्डलीमानेतुं प्रार्थयामास। बालसिन्धुस्तदा दिवंगतस्य कालस्य भ्रातुर्लालस्य गृहं गत्वाऽऽनयज्जन्मकुण्डलीम्। प्रदाय चाङ्गदं तां पुनर्बालः कथां कथयितुमारेभे। नानकोऽवर्धत शनैः शनैः। तस्य मनो गृहकार्ये न लग्नमासीत्। भिक्षार्थिने स धनमदात्। पिता दानव्यसनमेतस्य दृष्ट्वाऽकुप्यतास्मै। अतस्तं गाश्चारयितुं वनं प्रैषयत्। तत्रैकदा वने स सुष्वाप।

आतपे पीडितं शयानं बालं फणीन्द्रः स्वफणैराच्छादयामास। तस्मिन्नेव समये नृपतिबोलाररायस्तेनैव पथा गच्छति स्म। राज्ञा फणीन्द्रवारितातपो नानको दृष्टः। राजा काँश्चित्प्रश्नानपृच्छत्तम्। नानकः स्वालौकिकप्रतिभया तेषामुत्तरं ददौ। राजा प्रसन्नः संजातः। अथ च सर्वाभ्यः प्रजाभ्यो नानकस्य प्रतिभां शक्तिञ्च न्यवेदयद्राजा।

—०—

तृतीयः प्रस्तावः

कृषिकर्मणि अकुशलः सन् निगमाद्यध्ययने विस्मयकृदभवन्नानकः। स च पण्डितमतं म्लेच्छमतं च निनिन्द। कुपितः पिता नानकं बालसिन्धुना सह भाण्डविक्रयं कर्तुमादिशत्तस्य मनः परिवर्तनं कर्तुम्। भ्रमता नानकेन विपिने साधुरेको दृष्टः। तेन सह संजातः संलापः। साधुः "विश्वम्भरस्य प्रीत्यै तपस्यां तनोमि' इति नानकमब्रवीत्। "बहुरूपधारिभिरर्थार्थिभिर्दूरोहं सिंहासने साम्राज्यं भुञ्जे" इत्यासीत्तस्य तपस्विनो वाक्यान्तरम्। तत् श्रुत्वा नानको जगन्मायां चिन्तयन्बालं बहु निनिन्द। स्वयं भाण्डक्रयणाय यद्धनमासीत्तत्साधवे ददौ। तापसेन पृष्टः स स्वं निराकार इति पदेन सम्बोधयामास तथा च निराकारपदस्य व्याख्यामपि कृतवान्—

द्वापरे निर्द्वापरोहं निराकारमचिन्तयम्
कलौ जातः कारणेन तामेव प्रथितिं गतः।

ततः स स्वगृहं प्रति समायातः। सरसस्तीरे स्थितं तं भर्त्सयितुं कालस्तत्र गतः। गत्वा पुत्रं चपेटामुद्यम्य 'व्रज' इत्युक्तवान्। बोलारराय: कालस्य भर्त्सनां श्रुत्वा दुःखितो जातः। राजा नानकं स्वगृहे आनीतवान्। एकदा जयरामवर्मा राज्ञः करं ग्रहीतुं बोलाररायेण सह नगरं निरीक्षितुं बभ्राम। स च कालस्य गृहमागत्य कालपुत्रीं नानकीं कामस्य कनककार्मुकवल्लीमिव दृष्ट्वा तां परिणेतुं बोलाररायं प्रार्थितवान्। बोलारराय: कालं स्वगृहमाहूय नानक्याः जयरामेण सह विवाहायाऽब्रवीत्। कालः स्वीचकार। विवाहः सम्पन्नोऽभूत्। वरयात्रिकाः सन्तुष्टाः संजाताः। नानकी पत्युर्गृहे गता। इतः कालः पुनर्नानकस्य दानव्यसनं दृष्ट्वा भर्त्सयामास नानकम्।

—०—

चतुर्थः प्रस्तावः

क्रुद्धः पिता नानकं जयरामस्य गृहं प्रेषितवान्। नानकी जयरामश्च तस्य स्वागतमकुरुताम्। लेखने नानकमतिनिपुणं ज्ञात्वा धनखानस्तं स्वलेखकपदे नियुक्तवान्। धनखानस्याधिकारिपदे नियुक्तो नानकः स्वातन्त्र्येण धनस्य दानमकरोत्।

तस्यौदार्यं निशम्य ये दानग्रहणार्थं नानकं प्राप्तास्तेषां मनोरथमपूरयन्नानकः। तस्य यशश्चतुर्दिक्षु प्रसृतम्। कश्चिद्यवनो राजानमाह यन्नानको बहुव्ययं करोतीति। नानकीमपि कश्चिदाह यद्बहोरर्थव्ययस्य हेतोरेकदा राजा नानकं दण्डयिष्यतीति। नानकी नानकमाहूतवती। नानको मासमात्रं तत्र स्थित्वा पुनर्गतवान् स्वपदे कार्यं कर्तुमिति। राज्ञो लेखका आयव्ययौ संशोध्य न कामपि तत्राशुद्धिं प्राप्तवन्तः। पुनर्बीजाधिकारं ज्ञात्वा नानको याचकेभ्यो दानं ददौ। बलवानपि मन्मथः लोहपिञ्जरनिवेशित· केशरीव तस्य शरीरे समतिष्ठत। बहोः कालात् पश्चात् कालः समागतः पुत्रं द्रष्टुम्। पुत्रं स धनार्जनमपृच्छत्। धनं दाने गतमिति पुत्रोऽब्रवीत्। पुनर्लेखकैरायव्यय-संशोधने कृते नानकस्यैव राजपार्श्वे धनं निरगात्। कालः स्वगृहमागत्य प्रैषयद् बालसिन्धुं नानकं प्रति कानिचिदुपदेशवचनानि श्रावयितुम्।

नानकं स्वसुहृदं कथयेथाः
न व्ययं परधनस्य स कुर्यात्॥

इतो जयरामो नानकस्य विवादाय यत्नमकरोत्। नानकः स्वीचकार विवाहम्। सर्वे वरपक्षीयाः कन्यापक्षीयाश्च प्रसन्ना बभूवुः।

राजैकदा नानकेन सह वार्तालापमकरोत्। तस्य वैदुष्यपूर्णां वार्तां श्रुत्वा यवना मत्सरिणो जाताः। ततो यवनानां वचनं श्रुत्वा राजा पुनर्लेखकान् नानकेन कृतस्य व्ययस्य विवरणं ज्ञातुं नियोजितवान्। लेखा संजाता व्ययस्य। परन्त्वन्ते नानकस्यैव धनं राजपार्श्वे समतिष्ठत। इति ज्ञात्वा धनखानस्तं प्रसादवस्त्रैरलञ्चकार।

—०—

पञ्चमः प्रस्तावः

वर्षर्तुरभूत्सुखदः समयः करपीडनस्य नानक–सुलक्षण्योः। वरयात्रा चलिता। वरयात्रावर्णनम्।

"चित्राकारः सक्तचित्तेक्षणत्वा-
ल्लौकैः लोकोऽलोक्यत॥"

इतो हितोरधावो वरमानेतुं गतः। मूलो गृहकार्यं चचार। नानाविधाश्व-हस्तिवेणुवीणाभेरीमृदङ्गादिवर्णनम्। वरो वेदिं गतः। विवाहोऽभूत्। वरो लाजा-नग्नौ प्राददात्। सप्तपदी अभूत्। भोज्यमभूत् "राजन्ययूनामतृपन्मनांसि"। ततः संसदि वारमुख्या अनृत्यन्। सर्वं दृष्ट्वा नानकः सिस्मिये। ततो जयरामो यात्रां ययाचे। चन्दो राज्ञी, मूलोऽजितोरधावादय आशीर्वादं दत्वा विससर्जुर्वरवधूः। इत्थं नानकः स्वगृहमागतः।

—०—

षष्ठः प्रस्तावः

नानकं सुलक्षणी न रेमे। चन्दो राज्ञी समागता। चन्दोराज्ञी सुलक्षणीमुपालभ्य नानक्या अङ्के निक्षिप्य गता। नानकी प्राहैकदाऽनुजम्।

"जानन्ति सन्तो वनिता लतेव
विनावलम्बं कथमेव तिष्ठेत्।

इति नानक्या उपालम्भं श्रुत्वा नानकः सुलक्षणीम् अरीरमत्। सुलक्षणी गर्भवती बभूव। नानकस्य ३२मे वर्षे श्रीचन्द्रनामा प्रथमः पुत्रो जातः। पुनर्गर्भं दधौ सुलक्षणी। इत्थं द्वितीयोऽपि पुत्रो जातः। तस्य नाम लक्ष्मीचन्द्र इत्यकारि। एकदा कश्चित्प्रजितो नानकं प्रातःस्नानं कर्तुमकथयत्। सचेत्थं श्रुत्वा 'वेआ' नाम्नि ह्रदे स्नानं कर्तुं ययौ। तत्राहर्मुखे वेआं कृतनिमज्जनो नोन्ममज्ज नानकः। सर्वे चिखिदिरे। न प्राप्तो नानकः। अनन्तरं धनखानो राजा दुष्टैः प्रेरितः नानकेन कृतस्य व्ययस्य परीक्षां कर्तुमूचे जयरामम्। सर्वे राजानं निनिन्दुः। सहसा नानको राजानं प्रति गतः। पुनर्नानकस्यैव राजपार्श्वे धनं निरगात्।

इतो नानकः "स्वार्थपूर्णे धनमाहात्म्ययुक्ते जगति कथं कोऽपि रमेत' इति शोचन् वने स्थितिं व्यरच्यत। श्यामेन सह मूलस्तत्र गतः। इतो मूलः प्रत्यावृत्य धनखानं प्रति गत्वा नानकेनार्जितं धनं स्वदुहित्रे दातुं प्रार्थयत्। राज्ञा नानक आहूतः।

नानकः प्रव्रजितेभ्यो धनं दातुमकथयत्। नानकं विक्षिप्तं मत्वा तुरुष्कमन्त्रविद आयाताः। नानकस्तानुपदिदेश। नानको म्लेच्छदेवमपि प्रणनाम। लोकास्तं म्लेच्छं मेनिरे। राजाज्ञया नानको यथासुखं विचरितुमादिष्टः।

नानकः स्वगृहमागतः। तत्रतः पुनर्वनं यातुमैच्छत्। नानकी तं निवारयितुं न शेके। चन्दोराज्ञी क्रोधमूर्च्छिता जाता। नानकः सर्वान्पाण्डित्यपूर्णवचनैरुपदिश्य संबोध्य च प्रवाज।

—०—

सप्तमः प्रस्तावः

वने एकत्रैव न स्थितो नानकः। कालः प्राहिणोन्मर्दनं नानकं पुनरानेतुं वीणावादनं च श्रावयितुम्। नानकस्य यथामति कार्यमाचरिष्यामीति प्रतिज्ञाय मर्दनः प्राप नानकं तरोर्मूलमलंकरिष्णुम्। नानकस्तं वनवासस्य सचिवममन्यत प्राह स्म च तं वीणामानेतुम्। यवनेन केनचित् वीणां प्राप्यऽवादयद्वीणाम्। श्रुत्वा च तां वनजन्तवोऽपि मोहं गताः। नानको मर्दनं वीणाक्रयणाय नानक्या द्रव्यमानेतुं जगाद। मर्दन आनयद् द्रव्यम्। "तत्र आसिकपुरे फेरुनामा वैणिको वसति तत्र गत्वा वीणा-

मानये”ति नानकाज्ञां शिरसि निधाय गतो मर्दनः। फेरुः सप्तमुद्रायां प्राददात् वीणाम्। स्वयमप्यागतो नानकं द्रष्टुम्।

फेरुः पूर्वजन्मवृत्तान्तं श्रावयति गुरुं यत्तावुभावपि पूर्वजन्मनि ज्ञानपुरनामके ग्रामे आस्ताम्। तयोः पिता प्राणनाथ आसीत्। तस्य द्वौ सुतौ सुता चैका। नानकस्य नाम सुन्दरः फेरोर्नाम प्रेमासीत्। एकदा पिता मुरारिगुणवर्णने स्वार्थहानिं दृष्ट्वा विवासयामासावाम्। ततस्तयोर्गीतिः सर्वस्य तोषकरी जाता। तपस्वी च कश्चन प्रसन्नःसन् इमां विपञ्चीं तस्मै प्रादात्। सेयं विपञ्चीति। अत्र फेरुः कथयति यदसौ नानको भाषाप्रबन्धैरनुकम्प्य मोक्षमार्गं ग्राहयिष्यति। नानकस्तं वीणां वादयितुं कथयति। वीणायाः “नानकोयं निराकार” इति ध्वनिर्निरगात्। ततो नानकः फेरुमाशीर्वादमकथयत् “फेरो तत्त्वज्ञता तेऽस्तु”।

एकदा श्वाससमाश्रितो नानको निर्जीवसमाधिनिन्द्रामवाप। योगसाधने संलग्नः स परज्योतिः पश्यन्ननन्द। विंशतिदिनानि यावत् समाधावतिष्ठत। तदनु तौ लालं गतौ। तत्र सर्षपशाकयुक्ता बाजरी पिष्टरोहिका खादिता। ततस्तलवण्डिकां गतौ। तत्र भूदेवभोजनदिने मलिको यतिमाजुहाव। राज्ञा प्रदत्ता रोटिका रक्तप्लुता अवलोकिताः। मलिकस्य पुत्रा रुग्णा अभूवन्। तदा स नानकं प्रार्थयामास। नानकः सिद्धनिवहं भोजयितुं जगाद। भोजिताः सिद्धाः। मलिकपुत्रः नीरुजो जातः।

—०—

अष्टमः प्रस्तावः

जरापरीतस्य बोलाररायस्य हृदि नानकदर्शनेच्छा जाता। बालो राज्ञो मनोरथं पूरयितुमुवाच। यतिं तत्र गच्छन्तं दृष्ट्वा सर्वे रुरुदुः। मातैकपुत्राऽब्रवीत्

“पुरो बहिर्वत्स कुटीं विधाय
द्रक्ष्याम्यहं त्वामपरे यथैव।”

पुत्रो मातरं जीवनदर्शनमाह—

“समीपसंस्थेपि मृते तनूजे
शक्नोति कर्तुं जननी किमस्य?”

विश्वं धर्मशालां ज्ञात्वा पुत्रस्य सङ्गं विहाय देवकीपुत्रमुपाश्रयस्व ततः स गतवान् बोलाररायं प्रति। स तत्र तं (नानकं) भवपाशमुक्तये विषयैर्बहिः स्थातुमकथयत्। विभुर्निजसेवकानां छन्दानुवर्ती। उपास्यबुध्याऽऽत्मधियाऽथवा स्मृतो विभुः शर्मकरोत्येव। इत्थं नानकस्तं प्रणम्य स्वकीयकृतकृत्यतां च मन्यमानो बंगान् गौरांश्च गतवान्। तत्र बङ्गीयसाधोर्वर्णनम्—

'शिखैव बृहती साधो दया तुच्छैव लक्ष्यते'। ततः स ज्योतिषपुरं जगाम। तत्र प्रमदया मर्दनो मेषः कृतः। परं गुरुणा मर्दनो मनुजः कृतः, प्रमदाश्च मेष्यः कृताः। तत्र सिद्धिमन्यः क्षितिपालः यतेश्चरणयोः पतितः। तत्र द्वौ वर्षौ पञ्च मासांश्च व्यतीत्य अस्पर्शनायस्य द्वीपं जगाम योगी। तत्र कश्चिद्राक्षसो मर्दनं कटाहेऽपचत्। ज्ञात्वा गुरुस्तत्र गतः। तं क्रोडनामानं राक्षसं बहुभिर्वचनैरुपदिदेश। क्रोडो भक्तो जातः।

तदनु मार्गे गच्छता तेन पद्मरागः प्राप्तः। तस्य मूल्यं ज्ञातुं मर्दनः साल-सरायपार्श्वं गतः। सालसस्तं ग्रहीतुम् अधरकेण सह यतेः समीपमागतः। गुरुस्त-मुपदिदेश। सोऽपि भक्तो जातः। तदा गुरुर्विषहरदेशं गतः।

—०—

नवमः प्रस्तावः

समुद्रोऽपूजयन्नानकम्। ३५×५ क्रोशपरिमितो मीनो नानकं नीत्वा चलितः। सेतुतुल्यो मीनोऽब्रवीन्नानकं यत् स त्रेतायां नानकस्य मित्रमासीत्। दिनान्ते स मीनो मृतो दिव्यगतिं च प्राप। एवं पञ्चदशदिनानि यावत् स्थलवज्जले एव जगाम यतिः। तदागच्छद्विषहरदेशम्। तत्र शुद्धसेनेन्द्रसेनाभ्यां पूजितः प्रार्थितश्च शिलमिलद्वीपे जगाम योगी। तत्र केचिद् धनुर्धरा आगताः। ते आसन् शिलमिल-द्वीपे वाहीकदेशस्य राज्ञो कमलनयनस्य गुरू राजानमुपदिशति स्मः—

“तं मन्त्रं जप येन मुञ्चति भवो भूतोऽनुभूतव्यथः”।

इत्थं १६ मासान् व्यतीत्य जम्बूद्वीपस्य विविधान् प्रदेशान् दृष्ट्वा समर्दनो गुरुर्गान्धारं ययौ। तत्र दैत्यसैन्यो राजा देवलूत आसीत्। स च त्रीन्दैत्यान् यतिमानेतुं प्रैषयत्। त उलूका इव अन्धा जाताः। यदा दुष्टबुद्धिनामा इतो नानकं दुष्टबुद्ध्या निनाय तदा सर्वेऽपि तेऽन्धाः संजाताः। तदा स देवलूतो यतिनः शिष्यो-भूत्। गन्धारे नवमासपर्यन्तं स्थित्वा प्रसरनामकं नगरं ययौ गुरुः। तत्र फलानि खादन् ४ मासान् १३ दिनानि यापयित्वा सुवर्णपुरं जगाम। मर्दनस्तत्र यथेच्छं विना पणेनाकृष्टपच्यमन्नं भुक्त्वा, तुलां तोलनपाषाणं च सुवर्णमयं दृष्ट्वाऽपृच्छत्। धर्मसिंहः कर्तेति ब्रुवन् जगाद “वसन्ति सन्तो यवना न सन्ति” इति। इत्थं कर्त्तु-महत्त्वं प्रतिपाद्य सुमेरुं ययौ यतिः॥

—०—

दशमः प्रस्तावः

सुमेरुं व्रजन् मक्कां ययौ यतिः समर्दनः। तत्र जपमालाकरा वृद्धाः श्मश्रुला

हरिताम्बरा स्वशास्त्रपारदृश्वानो म्लेच्छाचार्या विलोकिताः। तत्र परैरदृष्टमाश्मनं शिवलिङ्गं नानको ददर्श। एकदा स्वकारहुसेननाम्ना यवनेन मूर्तिमपनेतमिच्छताऽन्धत्वं प्राप्तः। तदा पुनः पूजनात्प्रसन्नः शिवो वरं ददौ यद्यो मदीयां मूर्तिं पश्येत्सोऽन्धो भविष्यत्येवेति। परन्तु निर्भेदबोधेन दर्शनान्न भविष्यति कोऽप्यन्धः। तत्र बद्धेक्षणा जना स्नपयन्ति शिवलिङ्गं परं न जानन्ति किं तदिति। मक्कातो मदीनां गतः। तत्रैको यवनाचार्यो यवनदेवस्याभिमुखमङ्घ्री कृत्वा शयानं नानकमाह पादौ निवारयितुम्। नानकोऽब्रूत-यदि वाञ्छसि निवारयितुं तदा पादौ विकृष्य परतः कुरु। परं तेन तथा कर्तुं नाशक्यत।

तदा नानक ऊषरे वारिवाह इव अमृतसारमकिरत्-

"द्विजोऽन्त्यजो वा यवनो विजित्य
मनो जगन्नश्वरमेव बुद्ध्या।
जानाति यः प्रेमपरं तमीशं
स वै महात्मा स च नन्दनीयः" ॥

तदा गुरुर्मर्दनं कोरानविषयेऽकथयत् यद् महंमदस्य वचनानि 'जबराइल' इति प्रसिद्धिभाजा लिखितानि भूत्वा कोरान इत्यभूत्।

सहसा स्वसारं स्मरन्तीं ज्ञात्वा योगी तत्रतः घटिकैकयैव २७०० क्रोशपरिमितं सुरत्राणपुरं समायातः। पुनश्च तामाश्वास्य ततोऽपि दूरं गतः। समागतो हिमालये। तत्रागतं नानकं वीक्ष्य गोरक्षो तं निवर्तयितुं योगीन्द्रान् जगाद। श्रुत्वा मत्स्येन्द्रः समागतः। मत्स्येन्द्रस्य शरीररचना विषये प्रश्नस्योत्तरमददाद् गुरुः। श्रुत्वा मत्स्येन्द्रो गुरुं गत्वा न्यवेदयद्यन्नानको युक्तयोगीति।

—०—

एकादशः प्रस्तावः

भर्तृहरिः समागतः उत्तरं प्राप्य गतश्च। गोपीचन्द्रः समागतः सोऽप्युत्तरं श्रुत्वा गतः। ततः कनीफा एवं हनीफाः समागतौ। तावप्युत्तरं गृहीत्वा गतौ। ततो भूतवा आगतः स च चार्वाकमते प्रश्नं करोति। गुरुस्तद् खण्डयति। ततो लहुरीया आगतः। सच बौद्धमतं क्षिपति। गुरुरुत्तरं ददाति। ततः कङ्करः समागतः तं च गुरुर्भक्तेर्महिमानं वर्णयति॥

—०—

द्वादशःप्रस्तावः

सङ्करः समागतः। प्रथममास्तिकरीत्या तदनु नास्तिकरीत्या प्रश्नानकरोत्।

उत्तरं श्रुत्वा गच्छति तस्मिन् मङ्गलनाथः समागतः । स नानकस्य विचारैः सन्तुष्टः प्राह स्म गोरक्षं यत्स समबोधो न भवितुमर्हति भवच्छिष्यः । शम्भूनाथो हठयोगे प्रश्नं करोति । नानकः प्राह "ज्ञानेन प्रयोजनं न कर्मणेति" । गोरक्षस्य सर्वे शिष्या नानकं वर्णितवन्तः । नानको गोरक्षं प्रति गतः । संजातः परस्परं सुखदः संलापः । "विवादस्तत्त्वबोधाय न विरोधाय योगिनाम्" । गोरक्षो नानकं चषकं पातुं ददाति । यो भैरवदेवशेषसुरां पिबति स पीत्वा पतित्वा च भैरवीचक्रे न बिभ्यति कालतोऽपि । तत्र प्राचलन् विचाराः घुघ्घुनाथ-धरिनाथ-उर्मनाथ-धर्मनाथ-धगरनाथै-र्नानकस्य । अन्ते सर्वे नानकमहत्त्वं प्राख्यापितवन्तः । नानको मर्दनं ८४ सिद्धानां नामानि कथयति ।

—०—

त्रयोदशः प्रस्तावः

व्यारगिरौ जगाम योगी । तत्र अजगरोपमो दत्तात्रेयः शयान आसीत् । दत्त-नानकसंवादः । अजपाजपस्य महिमा । विष्णुरूपवर्णनम् । नवधाभक्तिवर्णनम् । विष्णुस्तोत्रम् । तदनु विरोचनतातः पक्षिणां प्रभुः अनलाचितनाम्नि पर्वते मानुषी गिरमवोचत् । नानक आह "ईशितारं द्रष्टुमागतः" । तत्र शिखरे प्रह्लाद आसीत् । तेन संलप्य ध्रुवलोकं ययौ समर्दनो यतिः । ध्रुववर्णनम् । तदा मर्दनं तत्रैव त्यक्त्वा वैकुण्ठं ययौ गुरुः । ३२ कोटिक्रोशपरिमितविस्तृतं १६ कोटिक्रोश-परिमित उन्नतं विष्णोर्धामवर्णनम् । भागवतस्तुतिः ।

—०—

चतुर्दशः प्रस्तावः

स्तुतिं श्रुत्वा त्रिलोकीयतिरुपदिशति नानकमुदासं नाम संन्यासम् । पुरुषो-त्तमस्योपदेशं श्रुत्वा तं च शिरसि निधायाजगाम पुनर्ध्रुवलोकं यतिः । ध्रुवस्तत्रत्यं वस्तुवर्णनं कर्तुं विष्णोः स्वरूपं च निरूपयितुं कथयति । यतिः सर्वं वर्णयित्वा क्षितिलोकमागमत् । मर्दनस्तदा गुरुं भूगोलस्य खगोलस्य च स्थितिं प्रपच्छ । नानकः सर्वं भूगोलं खगोलं नरकं, नरकयातनां, स्वर्गलाभोपायं च वर्णयामास ।

—०—

पञ्चदशः प्रस्तावः

यतिः शिवस्तुतिं कुर्वन्नवततार पृथिव्याम् । ततो यतिः सैन्यशैलमागच्छत् । यत्र मुनयो निलीय तपश्चरन्ति स्म । तत्र शीलसेनस्य शिष्यः कल्याणः प्रतिवसति स्म ।

यः त्रेतायां यतेर्धर्मभ्रातासीत्। शीलसेनः कर्ता कर्तेति जपन्नासीत्। नानकोऽब्रवीच्छीलसेनं यत्तस्य गुरुर्वरुणो विद्यादाता च जनकः। ततो यतिरीक्षणशैलीं जपतो जनकस्य समीपं गतवान्। शुकश्चासीत्तस्य शिष्यः। जनकादाज्ञां गृहीत्वा गच्छतो नानकस्य समक्षमागतः स्नातः कश्चित् स चासीत्पुरा तस्य भृत्यः सुखचपतनामा। तदा गुरुर्मत्स्यनगरं लहरीनगरं सुरताख्यं च नगरं ययौ। ततो लङ्कां ययौ गुरुः। विभीषणस्तस्योपचर्यां कृतवान्। ततो रामचरितवर्णनम्।

—०—

षोडशः प्रस्तावः

गुरुर्मर्दनमाहागत्य लङ्कातो मार्गे यत्स पञ्चमे दिने मरिष्यति। खर्जूरपुरे बालः दिनस्य शेषे मर्दनस्य श्वासं गणयितुमारभे। नवमे श्वासे विरते मर्दनो ममार। योगीशं ववन्दे। ततः सेतुबन्धं रामेशं दृष्ट्वा गुरुर्मर्दनस्य पुत्रं ग्रहीतुं तलवण्डिकामागतः। तत्र तेन श्रुतं यद् बोलाररायो मृतवान्। तदा मर्दनस्य पुत्रः सद्जादः सद्योगी जातो योगिनः। पुनर्लुभस्य देशं गत्वा यतिः सद्जादमब्रवीद् ग्रामं गन्तुमिति। स तत्र लुण्ठकेन धृतो ताडितश्च। सस्मार नानकं सद्जादः। नानकस्तत्र गत्वा सज्जनवामकं दुर्जनचौरमुपदिदेश। स च चौरः शिष्यो जातः। पुनः स खर्जूरपुरमागतः। सद्जादं तत्रैव त्यक्त्वा गुरुर्गान्धारं जगाम। तत्र विष्णुमित्रनामा मुद्गलस्तस्य शिष्यो जातः। तस्य नाम बलीगान्धार इत्यकरोद् गुरुः। तत्र समागतः सफरो नाम यवनो विदरनगरात्। स नानकस्य परीक्षां विदधदपृच्छत्प्रश्नान्। उत्तरं श्रुत्वा सोऽपि शिष्यो जातः। यतिः बलिगान्धारं तत्रैव स्थातुं लोकोपकारं च कर्तुं समाज्ञापयत्।

"तत्रैव तिष्ठ मनुजोद्धरणाय धीरं ?"।

—०—

सप्तदशः प्रस्तावः

यतिः केकयनगरेऽगमत्। तत्रैको यवनः सबालं यतिं मानचन्द्रखानचन्द्रौ प्रति निनाय। मानचन्द्रस्य सत्कारं प्राप्य तं बहुभिर्वचनैरुपदिदेश। तदा महापुरुषतां गते मानचन्द्रे योगी बौद्धक्षपणमेकमुपदिदेश। तदा स पर्वते समागतः। अत्र बालगुद्रायीनामा धर्मात्मा पथिकान् सेवते स्म। नानकश्च तत्र नीतः। बालगुद्रायिमते विभवस्त्वतिथिसत्कारायैव प्रदत्तोऽस्ति।

तदा तत्रतो योगी लालस्य गृहमागतः। लालः उदासिमतस्य विषये प्रश्नं पप्रच्छ। नानकस्तन्मतं तस्य भेदान् कथं केन वा गृह्यत इति सर्वमवर्णयत्। ततो लालगृहात्

पक्षकं ययौ यतिः । तत्र श्वसुरेण प्रदत्तं वस्त्वगृहीत्वैव तं बहुभिर्वचनैरुपदिदेश। तत्रतो गुरुः कुरुक्षेत्रं जगाम । एकदा गुरुरजस्य मांसमपचन्निशि । पृष्टश्च स विश्वामित्रस्योदाहरणं जगाद । इत्थं धर्षिता अन्ये संन्यासिनोऽसूयां वहन्त अहंखानं राजानं समाययुः । श्रीकन्दरस्य पुत्रोऽहंखानः कुरुक्षेत्रस्य राजाऽसीत् । विवृद्धमन्युरहंखानः सर्वान् प्रव्रजितान् खारीमितं गोधूमं पेष्टुमाज्ञापयामास । परं नानकशक्त्या गोधूमा स्वयं भ्रमता घरट्टेन पिष्टाऽभूवन् । तदा सर्वे नानकं मोक्तुं प्रार्थयामासुः । स मुमोच यतीन्द्रम् । यतीन्द्रस्तस्मै शापं ददौ । यद्यवनराजोऽयं सप्तमासैर्दिनैः सप्तभिरेव दैवात् स्मरणशेषां हि दशामासादयिष्यति इति । ये जनार्दनं न स्मरन्ति तानापदः परिभवन्ति ।

—०—

अष्टादशः प्रस्तावः

शापात्पञ्चमे मासि बाबरस्य सेना सुरत्राणपुरमागता । तत्र धनखानं हत्वा सप्तमे मासे इन्द्रप्रस्थमागता । बाबरो राजा बभूव । एकदा बाबरस्य भोजने कृमयो दृष्टाः । स सूदान् भर्त्सयामास । तेषु मीरविलावाख्यः कश्चिदाह यत्तन्नानकस्य बन्धनस्य फलम् । नानको बाबरस्य समीपमानीतः । स बाबरस्य प्रश्नस्योत्तरं ददौ । बाबरो नानकं चषकं पातुमकथयत् । नानको बाबरं ज्ञानचषकपानं प्रत्यपादयत् । ततो यतिरब्रवीद्यत् यः कश्चित्कोरानं वेदं वा भजेत स तस्य बल्लभः । आर्यैर्यो हरिः सेव्यते स एव विभिन्ननाम्ना तुरुष्कैरपि । अरागेण हरेर्भक्तिः न सर्वमुक्तिप्रदा । न कश्चिज्जन्मनाऽपराध्यति, इति श्रुत्वा बाबरस्तस्मै दिग्विजयाय न्यवेदयत् । ततो नानकः पक्षकमागतवान् । तत्राजितोरधावस्य भोजनं योगी स्वीचकार । मूलचन्द्रगृहादागतं भोजनं न स्वीचकार । मूलो निनिन्द यतिम् । चन्दीरानी निनिन्द यतिम् । सुलक्षणी विललाप । यतिः सुलक्षणीं 'रामदासि' इति पदेन संबोध्य स्वेनैव सार्धं कञ्चित्कालं यावत्स्थातुमकथयत् । व्यूढोरधावो ध्वस्तसमस्तमोहो जातो गुरुवचनं श्रुत्वा । तदा मालनामा म्लेच्छोऽपि यतेर्भक्तो जातः । तदा उवार खानः समागतः । स चाप्युपदेशं श्रुत्वा भक्तः संजातः । तदा आदरमानः चुक्रोश । तमपि गुरुरुपदिदेशामृतवचनैः । अहन्ताममते विहाय यथा यथा देवं वेत्ति कश्चित्तथातथा स क्षीणमलो जायते ।

न विस्मरन्ति ये विष्णुं
क्षणमप्यनुरागिणः ।
क्षणार्धमपि तान्देवो
वशीभूतो न विस्मरेत् ॥

—०—

एकोनविंशः प्रस्तावः

यतिर्जलालं द्रष्टुमैच्छत्। तत्र जगाम। मार्गे जलालस्य शिष्यं सरसि स्नान्तं दृष्ट्वा तं गुरोर्गुरुमुखस्य च महिमानमवर्णयत्। स च शिष्यो जलालमब्रवीत्। जलाल-नानक वार्ता। जलालो गुरुमुखविषये किमपि कथितुमशक्तो तज्ज्ञातुं मक्का-मगात्। जलालो जलधेः पारं गतः। तत्र चकितोऽभूद् दिव्यपुरुषदर्शनेन। नभस्तो भोज्यानि समागतानि। परं तेन न लब्धम्। प्रातरुत्थाय जलालो पोतमेकं सागरे निमज्जन्तमपश्यत्। तत्र तेनेश्वरो निन्दितः। तस्यार्तनादं श्रुत्वा पोतो रक्षितः! तदा-ब्रवीत्तत्र्यो गुरुर्जलालं यत्केन महतापराधेन भोजनं न लब्धम्। स आह "निमज्जति पोते मया महेशः अनिन्दि इति"।

स आह ईशस्याज्ञां विना तृणमपि न स्पन्दते। यदा गुरुः प्रसन्नो जातस्तदा तस्य निकटे भोजनमागतम्। गुरुमुखविषये च तेनोत्तरं श्रुतम्। तदा जलालो नानकं प्रत्यागतवान्। जलालमुखात्तत्रत्यं वृत्तान्तं श्रुत्वा नानकस्तत्र गन्तुमैच्छत्। यतो हि तत्र नारदस्य शिष्याः काञ्चन पुण्यभाजं कदाचित्स्वतनुः प्रदर्शयन्ति। ततो नानको बालेन सह शेषफरीदपत्तनं ययौ। तत्र वराहिमो नानाविधं प्रश्नमकरोत्। नानकस्तं बहुभिरुपदेशैरुपदिदेश। तदा भगवत्स्तुतिं कृत्वा सबालो नानकस्तलवंडीं गतः। तत्र पितृव्यमाश्वस्य समागतः पक्षकम्। तत्र सेवापरां सुलक्षणीमब्रवीद्योगी यत् लहनान्यनामा अङ्गदो मम पदेस्थास्यतीति इमामेव कथां श्रावयितुं बालोऽब्रवीद-ङ्गदं यत् गत्वा स्वीकुरु गुरुपदम्। तस्य कथं संजातो गुरुणा सत्सङ्ग इति प्रश्नस्योत्तरं प्रादादङ्गदो यत् ज्वालां विलोकयितुमागतेन तेन गुरुः प्राप्तः। स नानकं गतः।

एकदा नानको वस्त्राच्छादितां लप्सिकां भक्षयितुमादिदेश। तस्य अपरे शिष्याः सुतौ च न जघसुः। अङ्गदो जघास। तदा स सुलक्षणीमकथयदङ्गद एव मम पदे स्थास्यति।

इत्थं यथा व्यासो वेदं विभक्तवान् तथैव नानको देश्यैः पदैरद्वैततत्त्वं विदधे। अश्वत्थपत्रेषु कराकृतिरिव क्षितौ नानककृतिः। नानकः स्वमतमविरोधेन प्रचलत् दृष्ट्वा तुष्टः सन् प्राणानुत्ससर्ज। श्रीचन्द्रस्य विलापं श्रुत्वोपदिश्य तं पुनर्मृतः। तदौर्ध्वदैहिककार्ये आर्य-यवनयोर्विवादो जात इति श्रुत्वा पुनरागतो नानकः। "अर्धम् आर्या दहन्तु अर्धं यवना निखनन्तु" इत्यब्रवीत्। एकदा ज्यायान् भ्राता-ऽनुजमाह न खाद मासमिति। श्रुत्वेदं लक्ष्मीचन्द्रः "शासने नस्थास्यामी" त्युक्त्वा पुत्रं भार्यां च रथमारोप्य गगनं गतः। परं श्रीचन्द्रस्तद्धस्तात्पौत्रमानिनाय। स एवाभूद् धर्मचन्द्रो नानकस्य पौत्रः।

—:o:—

विंशः प्रस्तावः

अङ्गदो यदा द्वितीयो गुरुरभवत्तदा कश्चित्तस्य द्रोहमकरोत् परन्तु तथाना-भूत्। अङ्गदोऽब्रवीद् यद् यद्यत्र स मम विरोधी संन्यासी कुप्यते तदाऽवश्यमेव वृष्टिर्भविष्यतीति। इत्थमङ्गदस्तत्रामरदासनामकं कुविन्दं त स्थापयित्वा स्वयं गत-वान्। अमरदासस्य पुत्री भानी बभूव। तस्या विवाहः रामदासेन सह जातः। रामो-ऽमृतसरसि तीर्थे वसन् हरेः शरणं गतः।

तस्य त्रयः पुत्रा बभूवुः। पृथिवीचन्द्रो महादेवोर्जुनश्च। पितुर्वचनानुसारमर्जुनो गुरुत्वं प्राप्तवान्। स लाहोरं गतः। तत्र चन्द्रलालः कश्चिदद्रुह्यताजुनाय। जहाँगिरस्तं बबन्ध। अर्जुनानुसारं शिष्याः हरिगोविन्दं गुरुत्वेभिषिञ्चन्त। अर्जुनस्येच्छामृत्यु-र्जाता। हरिगोविन्दो जहाँगिरं गत्वा तस्मै च धनानि प्रदायाब्रवीच्चन्द्रलालं बद्धुम्। हरिगोविन्दश्च लालं महति इक्षुयन्त्रे प्रपीडयामास। जहाँगिरः पुनर्द्रव्यमयाचत। न ददौ हरिः। हरिं बबन्ध। युद्धमभूत्। यवनसेनां निपात्य गुरुः कर्तृपुरे न्यवसितु-मारभत। तत्रासीत् कश्चिद्विधिचन्द्रः। स च यवनकारागाराद्धयमानीय गुरवे प्राददात्। एकदा हरिगोविन्दस्य पुत्रो गुरुदत्तो मृगभ्रमाद्गामवधीत्। पिता कुपितोऽब्रवीत्।

"त्यजाम्यहं त्वामहमेव वा त्वया विसर्जितः" इति श्रुत्वा गुरुदत्तो दिवं गतः। पिता विलप्य गुरुदत्तपुत्राय हरिरायाय स्वपदं ददौ। कदाचिच्छाहजहाँ वारणकुम्भ-मुक्ता, मासप्रमितं लवङ्गं हरीतकीया चेतरी इति वास्तुत्रयं ग्रहीतुं हरिरायपार्श्वे दूतं प्रैषयत्। सच तद्वस्तुत्रयं तस्मै ददौ। नृपो बहु प्रशशंस हरिरायम्।

—०—

एकविंशः प्रस्तावः

मीरशाहः अवरङ्गजेब-सोदरं दारासकूहं हरिरायं वर्णितवान्। शाहजहाँ दारासकूहाय राज्यं ददौ। दारासकूहो हरिरायमामन्त्र्य तस्मादुपदेशं प्राप। अवरङ्ग-जेबो दारासकूहमवधीत्। निहत्य च पत्रमलिखद् हरिरायम्। स तत्र न गतवान्। ततोवरङ्गजेबसैन्यानि हरिरायमानेतुमागतानि। परं नाशक्नुवन्। पुनश्छलेनामन्त्रयामास। हरिरायः स्वपुत्रं रामरायं प्रेषितवान्। अवरङ्गजेबः सविषं वस्त्रं रामरायाय प्राददात्। परं तस्य न किञ्चिदभवत्। अन्येद्यू रामरायं वसनेन संछादिते कूपे न्यवेशयत्। परं तस्य न किञ्चिदभवत्। ततो राजा तस्मै म्लेच्छभोजनं प्रदत्तवान्। तदन्नं पुष्पं संजातम्। इत्थमवरङ्गजेबो रामरायस्य महद् वैशिष्ट्यं ज्ञात्वा तं प्रशसंस।

एकदा हरिरायो रामरायं पत्रमलिखत् यत् कथमसौ सिद्धिं प्रदर्शयति यवनसभायाम्। इत्थं रामरायं पिता तत्याज। ततो हरिकृष्णनामकं शिष्यमभिषिषेच। ततो हरिकृष्णो गुरुः संजातः। रामरायो हरिकृष्णं स्वगृहं निनाय। हरिकृष्णः शीतलाप्रकोपेन मृतः। ततः शिष्यैः तेगबहादुरो गुरुर्ज्ञातः। परं तेगबहादुरस्य द्रव्यागमनं सेहे अवरङ्गजेवः। तेगबहादुरः काशीं समागतः। तत्रतः पाटलिपुत्रं गतः तत्र सुलग्ने सुदिने तस्य गोविन्दसिंहनामा पुत्रो जातः। गुरुगोविन्दो गुरुर्जातः शिष्याणाम्। इतो बद्धस्तेगबहादुरः कारागारे कमपि राजानमाहूय तं च ज्ञानमुपदिश्य स्वशिरः छेत्तुमकथयत्। राजा तथाऽकरोत्।

गोविन्दो तिष्ठन्नानन्दपुरे पितुर्निर्यातनं कर्तुं पञ्चवर्षाणि देव्याः पुरस्ताद्धोमं कृतवान्। चण्डिका प्रकटीभूय तस्मै खड्गं ददौ। ये च कुण्डजलमपिबन् ते सिंहदर्पाः सञ्जाताः। ततोवरङ्गजेवसैन्यैर्जातं युद्धम्। गोविन्दः सहासः शरदि तिष्ठन् सामन्तानां शिरांशि चिच्छेद। बहादुरशाहो गुरोर्भक्तिमाचरत्। गुरुर्नागपुरे द्वारकादाससन्निधे गतः। द्वारकादासो गुरवे केशान् शस्त्राणि च ददौ। पुनर्गुरुः सिंहसैन्येन सह योद्धं गतः। तत्र केनचित् म्लेच्छेण यस्य पितुर्वधं कृतमासीद्गुरुणा, युद्धं संजातम्। स च म्लेच्छो गुरोः कुक्षिमसिधेनुकयाऽभ्यहन्। तेन गुरोः शरीरे व्रणः संजातः। तदा व्रणदोषात्स दिवं गतः। गुरुर्मृत्युकाले नन्दलालमभाषत भवतां ग्रन्थ एव गुरुः नान्यः इति।

—:०:—

तत्तत्स्थानानां नामानि विवरणं च यत्र नानको गतवानासीत्

(अत्र प्रस्तावक्रमेण नामानि लिख्यन्ते न तु अक्षरक्रमेण)

स्थाननामानि—काव्यादुद्धरणानि विवरणानि च ।

१. जयतिवारः—"सौभाग्ययुग् जयतिवार इति प्रसिद्धः" – ना० च० २।३
इदं ग्रामनाम । "जैतवार" इति प्रसिद्धः ।

२. तलवण्डी — "तलवण्डीति नगरी विख्याता भुवि विश्रुता"—ना० च० १।१०७
नानकस्य जन्मस्थानम् ।

३. सुरत्राणपुरम्—ना०च० ३।६४
नानक्याः पत्युर्ग्रामः ।

४. पक्षकः—"पक्षके पुरवरे कृतवासो"—ना० च० ४।६६
नानकस्य श्वसुरालयः ।

५. आसिकपुरम्—ना० च० ७।५३
यत्र वैणिकः फेरुरासीत् ।

६. भारते (जम्बूद्वीपे)—'जम्बूद्वीपस्य विविधान्प्रदेशानभ्रमद्यतिः"
—ना० च० ९।८२
तत्र बङ्गः, उत्कलः, कलिङ्गः, आन्ध्रः, कर्णाटः, केरलः, द्रविडः, सिंहलश्च योगिना दृष्टाः ।

७. ज्योतिषपुरम्—सम्प्रति आसामप्रान्ते "कामरूप्या" इति प्रसिद्धः । "प्राग्ज्योतिषं पुरमगात्"—८।९१

८. अस्पर्शनाथस्य द्वीपः—यत्र क्रोडनामा राक्षसो मर्दनमपचत् । गुरुश्च तं ररक्ष ।
ना० च० १२०।८

९. विश्वम्भरपुरम्—अत्रासीद्रत्नपरीक्षकः । "मर्दनस्तु तदादाय विश्वम्भरपुराभिधे"
ना० च० ८।१३९

१०. विषहरदेशः—शुद्धसेनस्य राज्ञः । "विषहरं देशं स्वैरगतिर्ययौ" ना० च० ८।१६८

११. झिलमिलद्वीपः—"द्वीपं झिलमिलाभिधम्"—ना० च० ६।४८

१२. ब्रह्मपुरम्--"पुरं ब्रह्मपुरं धर्मवचनो भूपतिर्द्विजः"--ना० च० ६।४८
१३. वाहीकदेशः--पञ्जाबस्य पञ्चनदानां मध्ये ।--ना० च० ९।६०
१४. देवगन्धारः--"योगी देवगान्धारसंज्ञकम्" -ना० च० ६।८६
१५. अमरनगरम्--"निर्विण्णानां नगरमटवीत्यालपद्योगिवर्यः"--६।६६
१६. प्रसरनगरम्--'"प्रसराख्यं नगरं ययौ यतीन्द्रः ।"--ना० च० ६।११०
१७. सुवर्णपुरम्--सुवर्णपुरमित्यभिधेयम्"--ना० च० ६।१२३
१८. सुमेरुः--"प्रत्यर्घ्य तस्मै स ययौ सुमेरुम् ।" ना० च० ६।१४९
१९. मक्का--"मक्केति यद् यवनजातिषु सुप्रसिद्धम्"-ना० च० १०।३
२०. मदीना--"मदीनां नय मां वन्द्यां नदीनां जाह्नवीमिव"-ना० च० १०।१९
२१. मेरुगिरिः--मेरौ नव पुराणि । मनोवती, अमरावती, तेजोवती, संयमनी, कृशाङ्गना, श्रद्धावती, गन्धवती, महोदया, यशोवती च। "उदीरितो मे स गिरिं जगाम "-ना० च० १०।६४
२२. हिमाद्रिः--"गन्धर्वसिद्धाध्युषितो हिमाद्रिः"-ना० च० १०।७४
२३. व्यारगिरिः--"ततो व्यारगिरिं प्राप्ता"-ना० च० १३।२
२४. लङ्का--ना० च० १५।५१
२५. दरवेलापुरम्--"दरवलाभिधं पुरम्"-ना० च० १६।९
२६. खर्जूरपुरम्--"स्वः खर्जूरपुरे खलु"--ना० च० १६।१०
२७. सेतुबन्धरामेश्वरम्--ना० च० १६।१८
२८. पवनचालित नाम पर्वतः--ना० च० १३।५४
२९. ध्रुवलोकः--"ध्रुवमगमदसौ योगतो योगिराजः" ना० च० १३।१०४
३०. वैकुण्ठम्--"वैकुण्ठमावासमकुण्ठशक्तिः" -ना० च० १३।११३
३१. कैलासः--"कैलासमिन्दुधवलं यतिमाससाद"-ना० च० १५।२
३१. उदारगिरिः--ना० च० १५।१२
३२. शैल्यसन्यम्--ना० च० १५।१६
३३. मत्स्यनगरम्-ना० च० १५।४९
३४. लहरीनगरम्-ना० च० १५।४९
३५. सुरतीनगरम्-ना० च० १५।४६
३६. अचलवटालः-ना० च० १६।४०
३७. लुभदेशः-ना० च० १६।६७
३८. गान्धारः-ना० च० १६।१०५
३९. बालनाथपर्वतः-ना० च० १७।४९
४०. कुरुक्षेत्रम्-ना० च० १६।११७

४१. द्वीपेषु प्लक्षद्वीपः, शाल्मलीद्वीपः, क्रौञ्चद्वीपः, शाकद्वीपः, दधिद्वीपः, पुष्कर-द्वीपश्च ।

४२. मद्रदेशः—"गतो मद्रदेशं विशेषेण शिष्यैः" – ना० च० २०।२६ अत्र रामदासो गतवानासीत् ।

४३. लाहौरः–ना० च० २०।३६

४४. कर्तृपुरम्—ना० च० २०।७६

"सार्धं गुरुः कर्तृपुरं ससार" २०।७६

४५. आगरा—२०।६१

४६. कलहूरः–"शतद्रुतीरे कलहूरदेशः"–ना० च० २०।८६

४७. वकालः–ना० च० २१।८६

४८. काशी–"तीर्थान्यटित्वाथ जगाम काशी" – २१।११०

४९. पाटलिपुत्रम्–२१।१११

५०. इन्द्रप्रस्थम्–ना० च० २१।२०३

५१. मथुरा–ना० च० २१।२०३

५२. नागपुरम्–ना० च० २१।२०५

५३. वेआ–नदीनाम यस्यामहर्मुखे कृतभज्जनो नानको नोन्ममज्ज । गतश्च तत्रतो वनम् ॥ "वेआं कृतनिमज्जनः"–ना० च०६।३४

—:०:—

महाकाव्ये समागतानां नाम्नां परिचयः

१. अङ्गदः–नानकस्य सर्वप्रियः शिष्यः शिष्याणां द्वितीयो गुरुः ।
२. अधरकः–सालसरायस्य भृत्यः ।
३. अहंखानः–बाबरस्य भृत्यः ।
४. अहंसेनः— ,,
५. अमरदासः—शिष्याणां तृतीयो गुरुः ।
६. अर्जुनः– ,, पञ्चमो गुरुः ।
७. अवरङ्गजीवः–मुगलराजः ।
८. अजितोरधावः–मूलचन्द्रस्य (नानकश्वसुरस्य) पुत्रः ।
९. आदरमानः–नानकस्यान्यतमः शिष्यः ।
१०. उवारे खानः–नानकस्यान्तिमः शिष्यः ।
११. कालवर्मा (प्र० कालूचन्द्र वर्मा)–नानकस्य पिता ।
१२. कमलनयनः—सुवर्णपुरस्य राजा ।
१३. कृष्णः—नानकमातुलः ।
१४. क्रोडः—तन्नामा राक्षसः ।
१५. कनीफाः—गोरक्षशिष्यः ।
१६. कङ्करः— ,,
१७. कल्याणः–शीलसेनस्य शिष्यः ।
१८. खेलः–केयकनगरस्य युवराजः ।
१९. गङ्गारामः–उदासिवर्यविदितः, काशिकपण्डितः ।
२०. गुरुदत्तः–हरिगोविन्दस्य पुत्रः ।
२१. गोविन्दसिंहः–दशमो गुरुः शिष्याणाम् ।
२२. गोरक्षनाथः–मणिशैले नाथानां गुरुः ।
२३. गोपीचन्द्रः–गोरक्षशिष्यः ।
२४. घुघ्घुनाथः–गोरक्षशिष्यः ।
२५. चन्द्रलालः–म्लेच्छसखो योऽर्जुनं बद्धुमासीदुद्यतः ।
२६. जहाँगिरः–मुगलराजः ।
२७. जलालः–म्लेच्छाचार्यः ।
२८. जयरामवर्मा–नानक्याः पतिः ।
२९. जुज्झावरसिंहः–गुरुगोविन्दस्य सेनानी ।

३०. तेगबहादुरः–नवमोगुरुः शिष्याणाम् ।
३१. तृप्तादेवी–नानकमाता ।
३२. दत्तात्रेयः–व्यारगिरौ अजगरोपमो मुनिः ।
३३. दारासकूहः–शाहजहाँपुत्रः ।
३४. द्वारकादासः–नानकशिष्यः । सार्धशतद्वयीसमवयाः गोविन्दं केशान् शास्त्राणि च ददौ । अस्यैव शिष्यो देवराजो महाकाव्यस्यास्य रचयिता ।
३५. दुष्टबुद्धिः–देवलूतस्य दूतो योऽन्धोजातः ।
३६. देवलूतः–गन्धारे दैत्यसैन्यराजः ।
३७. धनखानः–राजा यो नानकाय द्रुह्यति स्म ।
३८. धर्मवचनः–शिलमिलद्वीपे राजा ।
३९. धर्मनाथः–गोरक्षशिष्यः ।
४०. नानकः–गुरुनानकः ।
४१. नानकी–नानकभगिनी ।
४२. परशुरामः–क्षितिपालस्य मंत्री ।
४३. प्रह्लादः–व्यारगिरावेवापरो ऋषिः ।
४४. प्राणनाथः–गोरक्षशिष्यः ।
४५. पृथिवीचन्द्रः–गुरु-अर्जुनस्य भ्राता ।
४६. फेरुः–आसिकपुरवासी वणिकः ।
४७. बालसिन्धुः–नानकस्य सखा, भक्तः सहवासी, ग्रामीणश्च ।
४८. बाबरः–मुद्गलराजः ।
४९. बालवराहिमः–विराहिमस्य शिष्यः ।
५०. बहादुरशाहः–औरङ्गजेबस्य पुत्रः ।
५१. बालगुद्रायी–गिरौ पथिक-सेवकः ।
५२. भागमल्लः–राजा, उदासिमतावलम्बी ।
५३. भूतवाः–गोरक्षशिष्यः ।
५४. मर्दनः–वणिको नानकसखा, सहयोगी च ।
५५. मूलचन्द्रः–नानकश्वसुरः ।
५६. मलिकः–म्लेच्छराजः ।
५७. मत्स्येन्द्रः–गोरक्षशिष्यः ।
५८. मङ्गलः– ,,
५९. मानचन्द्रः–केकयनगरराजः ।
६०. मालः–शिष्यो नानकस्य ।
६१. मीरगदासेनः–बाबरस्य भृत्यः ।

६२. मीरमदः-- जहाँगिरस्य सेनापतिः ।
६३. मीरशाहः---औरङ्गजेबभृत्यः ।
६४. रामदासः---चतुर्थो गुरुः शिष्याणाम् ।
६५. रामरायः---हरिरामस्य पुत्रः ।
६६. लालवर्मा---नानकपितृव्यः ।
६७. लक्ष्मीचन्द्रः---नानकपुत्रः ।
६८. लहुरीयाः---गोरक्षशिष्यः ।
६९. विरोचनतातः---पक्षिणां प्रभुः यो मानुषीं गिरमवोचत् ।
७०. विष्णुमित्रः---गन्धारे मुद्गलः ।
७१. विमलज्योतिः---नानक-सहयोगो त्रेतायामासीत् नानकस्य भृत्यः ।
७२. व्यूढोरधावः---शिष्यो नानकस्य ।
७३. विराहिमः---शेखफरीदपत्तने योगी ।
७४ विधिचन्द्रः---चौरो यः शिष्यत्वं गतः ।
७५. शिवरामवर्मा---नानकपितामहः ।
७६. श्रीचन्द्रः---नानकस्य प्रथमः पुत्रः ।
७७. श्यामः- -मूलचन्द्रस्यानुचरः ।
७८. शुद्धसेनः---विषहरदेशस्य राजा ।
७९. शम्भुनाथः---गोरक्षशिष्यः ।
८०. शीलसेनः---तपः कर्ता सैन्यशैले ।
८१. सिद्धंमन्यः---क्षितिपालः ज्योतिषपुरे । सम्प्रति कामाख्येति प्रसिद्धः ।
८२. सुलक्षणी---नानकपत्नी ।
८३. सालअरायः – मणिज्ञाता ।
८४. स्वनकारहुसेनः – यो मक्कातः शिवमूर्तिमपनेतुगतस्ततोऽन्धो जातः ।
८५. सुखचपतः – पूर्वजन्मनि नानकभृत्यः ।
८६. सहजादः—मर्दनपुत्रः ।
८७ सज्जनः – सहजादस्य यः सर्वलुलुण्ठ पश्चाज्जातः शिष्यो नानकस्य ।
८८. सफरः – विदरनगरेयवनः ।
८९. सैन्धवः – जलालस्य शिष्यः ।
९०. हरिदयालुः – ज्योतिर्विद् । नानककुण्डलीनिर्माता ।
९१. हितोरधावः – मूलचन्द्रपुत्रः ।
९२. हरिगोविन्दः – षष्ठो गुरुः शिष्याणाम् ।
९३. हरिरायः – सप्तमो गुरुः शिष्याणाम् ।
९४. हरिकृष्णः – अष्टमो गुरुः शिष्याणाम् ।

—०—

नानकस्य शिष्याः

१. अङ्गदः – शिष्येषु श्रेष्ठः शिष्याणां द्वितीयो गुरुः।
२. अधरकः – सालसरायस्य पारिपार्श्वकः।
३. आदरमानः – शास्त्रार्थे पराजितः शिष्यतां गतः।
४. इन्द्रसेनः – शुद्धसेन-भ्राता।
५. उवारेखानः – शास्त्रार्थे पराजितः शिष्यत्वमवाप।
६. क्रोडः – अस्पर्शनाथद्वीपे तन्नामा राक्षसः।
७. खानचन्द्रः – केकयनगरवासी।
८. देवलूतः – गान्धारे दैत्यराजः।
९. धर्मवचनः – शिलमिलद्वीपस्य राजा।
१०. फेरुः – वैणिको यवनः। पूर्वजन्मनः सखा नानकस्य।
११. बालसिन्धुः – नानकस्य ग्रामीणः सहयोगी च।
१२. मालः – ध्वस्तसमस्तमोहो गतः शिष्यत्वम्।
१३. मर्दनः – वैणिकः सहयोगी च गुरोः।
१४. मानचन्द्रः – केकयनगरवासी।
१५. वराहिमः – शेखफरीदपत्तनस्य योगी।
१६. विमलज्योतिः – त्रेतायामासीज्जनकस्य भृत्यः।
१७. विष्णुमित्रः – गान्धारवासी मुद्गलः।
१८. व्यूढोरधावः – ध्वस्तसमस्तमोहो गतः शिष्यतां नानकस्य।
१९. सहजादः – मर्दनस्य पुत्रः।
२०, सज्जनः – एतन्नामा चौरः।
२१. सफरः एतन्नामयवनः विवरनगरस्य।
२२. सुखचपतः – पूर्वजन्मनि नानकस्य भृत्यः।
२३. सालसरायः – मणिबोद्धा।
२४. सिद्धिमन्यः – बंगे, ज्योतिषपुरे क्षितिपालः।
२५. शुद्धसेनः – विषहरदेशस्य राजा।

—:०:—

शिष्यस्याङ्गदस्य परीक्षाः

परीक्षा—१

एकदाङ्गदो गुरोः सेवार्थं (लङ्गरदानाय) लवणमानीतवान् । गुरुं गृहे न दृष्ट्वा स क्षेत्रं गतवान् यत्र गुरुः कर्दमैर्जलैश्च पूरितानि तृणानि कर्तयित्वा तानि गृहमानेतुं शिष्यान् प्राह स्म । अन्ये शिष्यास्तस्याज्ञां न मेनिरे । पारन्त्वङ्गदस्तथा कृतवान् । कर्दमपूर्णतृणानयनेनाङ्गदस्य वस्त्रं मलिनं जातम् । सुलक्षण्या पृष्टो नानकः प्राह यदङ्गद एवास्य योग्य आसीत् । गुरुर्नितरां प्रसन्नो जातः । ना० च०१६ प्रस्तावे ।

परीक्षा—२

शीतकाले गुरुरिरावत्याः सविधे प्रातरेव स्नानं कर्तुं गच्छति स्म । तत्र तस्य साहाय्यं कर्तुमङ्गदादयस्त्रयः शिष्या मपि गच्छन्ति स्म ।एकदा नानकस्य तत्रगमनात्पूर्वमेवाङ्गदादयस्तत्रागच्छन् । तदानीमत्यधिकं शीतपातं भवति स्म । करकापातोऽपि प्रारब्धः । अङ्गदं त्यक्त्वाऽन्ये तत्रतः समायाताः परन्त्वङ्गदो भयानकं कष्टं सेहे । गुरोः सेवां च चक्रे । एतेन गुरुरतितरां प्रसन्नो जातः । — ना०च० १९ प्र०

परीक्षा—३

एकदा शीतकाले नानकस्य गृहस्य भित्तिः पतिता नानकः शिष्यान् तन्निर्मातुमादिदेश । परन्तु तस्य पुत्रास्तथा न चक्रुः । अङ्गदो गुरोराज्ञां शिरसि निधाय कार्यं प्रारब्धवान् । भित्तेरर्धनिर्माणं यदा जातं तदा गुरुः पुनरपि तां पातयित्वा पुनर्निर्माणायादिदेश । परमङ्गदः पुनरपि प्रारेभे निर्माणम् । इत्थमनेकधा तथा करणेऽङ्गदस्योत्साहं कार्यकौशलं च ज्ञात्वा गुरुर्नितरां तं प्रशशंस ।

ना० च० १९ प्रस्तावे ।

परीक्षा—४

एकदा नानकः पुत्रान्प्राह रात्रौ वस्त्रं स्वच्छं कर्तुम् । पुत्रास्तथा न चक्रुः । अथ च ते रजकस्य वस्त्रं दातुमकथयन् । परन्त्वङ्गदो गुरोराज्ञां सद्य एव पूरितवान् । एतेन गुरुः प्रसन्नो जातः । अथ च ये केऽपि यात्रिका नानकं द्रष्टुं तत्रा गच्छन्ति स्म तेषामपि वस्त्राणि अङ्गद एव रञ्जयति स्म । इदमप्यासीद् गुरोः प्रसन्नतायाः कारणम् ।

ना० च० १९ प्रस्तावे

अङ्गदस्य नामकरणम्

अङ्गदस्य पितुः प्रदत्तं नाम "लहना" इत्यासीत्। परन्तु गुरुणा तन्नामपरिवर्तनं कृतम्। एकदा नानकः प्राह स्म अङ्गदं यत् मयि तवासीमभक्तिः त्वमेव मम सर्वप्रियः। तव मम च स्वरूपं तावदधुनैकं जातम्। तव शरीररचना ममाङ्गादेव जातास्ति। अतस्त्वं ममाङ्गदः।

–ना० च० १९ प्रस्तावे

नानकस्य पूर्वजन्मवृत्तान्ताः

(१)

फेरुनानकवृत्तान्तः

आसिकपुरे फेरुनामा कश्चिद्वैणिक आसीत्। नानकाज्ञया मर्दनस्तत्रागच्छत्। फेरुः प्राददाद् वीणां सप्तमुद्रां गृहीत्वा यस्या नाम "विपञ्ची" इत्यासीत्। स्वयं चागतो नानकदर्शनाय। फेरुः प्रणम्य नानकं पूर्वजन्मवृत्तान्तं स्मारयति। पुरा ज्ञानपुरनामके ग्रामे प्राणनाथ-नामा कश्चिदासीत्। तस्य आस्ताम् द्वौ सुतौ सुताचैका। तयोरेकः सुन्दर-नामा नानक एवासीत् प्रेमनामा च फेरुः। एकदा पिता मुरारिगुणवर्णने स्वार्थहानिं दृष्ट्वा विवासयामास पुत्रौ। ततस्तयोर्गीतिः सर्वस्य तोषकरी जाता। तपस्वी चैकस्त-स्मिन्वने प्रसन्नो भूत्वा विपञ्चीमिमां प्रेमनाम्ने फेरवे प्राददात्। सेयमासीद्विपञ्ची। पुनश्च स तपस्वी सुन्दरनामानं वैणिकं प्राह स्म यत् सोऽग्रिमे जन्मनि भाषाप्रबन्धैरनु-कम्प्य मोक्षमार्गं ग्राहयिष्यति। इत्थं तयोरभूत्पूर्वजन्मवृत्तान्तस्मरणम्।

(२)

मीन-नानकवृत्तान्तः

विषहरदेशं गच्छन्नानकः समुद्रं प्राप्तः। तत्र ३५×५ क्रोशपरिमितो मीनो नानकं नीत्वा चलितः। तदानीं नानकं प्राह मीनो यत् त्रेतायां स आसीन्नानकस्य मित्रम्। केनचित्कारणेन नानकः कुपितो जातः स च प्राददात् शापं मित्राय येन स मीनो बभूव। इति कथां स्मारयन्मीनो जगाद नानकं तस्योद्धारं कर्तुम्। गुरुश्च तस्य प्रसन्नो जातः। दिनान्ते स मीनो मृतो दिव्यगतिं च प्राप।

(३)

शुद्धसेननानकसम्वादः

पञ्चदशदिनानि यावत्स्थलवज्जल एव गच्छन् योगी विषहरदेशं ययौ। तत्रासीद्राजा शुद्धसेनः तस्येन्द्रसेनो भ्राता च। नानकं मर्दनं च सत्कृत्य शुद्धसेनो गुरुं पूर्वजन्मवृत्तान्तं स्मारयन्नब्रवीत् यत् जनकस्य पार्श्वे त्रेतायां ते त्रयोऽपि मित्राण्यासन्। इत्थं सामुद्रे विषहरदेशे शुद्धसेनेन्द्रसेनाभ्यां पजितो योगी शिलमिल-द्वीपं जगाम।

(४)

कमलनयन-नानकसम्वादः

सुवर्णपुरनामके नगरे कमलनयनो नामा राजासीत्। तत्र जगाम यतिपति-र्धर्मसिंहेन सह। तत्र राजानं दृष्ट्वा यतिरवोचत् तं यत् कलेः प्रभावाद् रुद्धबुद्धिना भवता न स्मर्यते पूर्वजन्मवृत्तान्तः।

त्रेतायां जनकस्य पार्श्वे नानको गोवर्धननामासीत् कमलनयनश्चासीत् सभाचन्द्रनामा। स्मृत्वेमं वृत्तान्तं राजा तस्य शिष्यत्वं गतः। नानकश्च तेनार्पितं राज्यं पुनस्तस्मै प्रादाय सुमेरुं गतवान्।

(५)

कल्याण-शीलसेन-नानकवृत्तान्तः

सैन्यशैले गिरौ शीलसेननाम्नो गुरोः शिष्यः कल्याणनामा यतिः प्रतिवसति स्म। स नानकमागत्येदमब्रवीद्यत् स त्रेतायां राज्ञो जनकस्य पार्श्वे तस्य धर्मभ्रातासीत्। शीलसेनः कर्ता कर्तेति जपन्नासीत्। शीलसेनो यदापृच्छन्नानकं यत्क आसीत्तस्य गुरुरिति तदा नानकोऽब्रवीद्यद् वरुण एव। विद्यां च स जन-कात् प्राप्तवान्।

(६)

सुखचपत-नानकवृत्तान्तः

मत्स्यनगरं गच्छन् योगी ददर्शैकं युवानं सरसि स्नान्तम्। तं जानानो नानकस्तत्र गतः। तं दृष्ट्वाऽकथयद्यत्स पुरा नानकस्य भृत्य आसीत् तस्य च नाम तदानीं सुखचपत इत्यासीत्। स्मरन्नतीतवृत्तान्तं स तस्य शिष्यत्वं गतः। अथ तेन साकं समदनो नानको मत्स्यनगरीं लहरीनगरीं सुरत्याख्यं च नगरं ययौ॥

(७)

विमलज्योति-नानकवृत्तान्तः

गान्धारं गच्छन् गुरुरेकं षोडशाब्दं कुमारं तडागे सिस्नासुं दृष्ट्वाऽपृच्छत्कोऽसि-त्वमिति। सोऽब्रवीद्यत् चिरवियुक्तं भ्रातरं मृगयामीति। तस्य नाम विमलज्योति-रित्यासीत्। त्रेतायां पुरा स जनकस्य भृत्य आसीत्। नानकोऽकथयद्यत्स एव (नानक एव) तस्य भ्राता गोवर्धनाभिध आसीत्। अस्मिन् जन्मनि स नानकः।

—:०:—

जनको नानकोऽभवदित्यस्य जनवादस्य मूलम्

नानकस्य जन्मान्तरस्य गुरुर्जनक ईक्षणशैले वसन्नाचरति स्म तपस्याम्। शुकश्चासीत् तस्य शिष्यः। शीलसेनेन धर्मभ्रात्रा सह वार्तां समाप्य नानकस्तत्र गतवान्। नानकस्तं प्रणनाम जगाद च तस्य पूर्वजन्मवृत्तान्तम्। अथ च नानको जनकं त्रेतायां प्रसृतं यशः तं स्मारयति स्म। तदानीं जनकस्य नानकेन सह प्रीतौ तत्त्वज्ञाने च ऐक्यमासीत्। इयमेव कथा जनको नानको भवदित्यस्य जनवादस्य [1]मूलम्।

ना० च० १५ प्रस्तावे श्लोक २६ तः ४० यावत्।

—: ० :—

---

१. इति शीलसेन वचसामवसाने यतिनाभ्यधायि गुरुरीश्वर एव।
वरुणोऽस्य नामवरमंत्रमवोचज्जनकाद् गुरोः क्वचिदलस्यत विद्या॥
प्रकटी बभूव जनकः स शुकस्तं
प्रणमन्तमादरपरः परिरेभे॥
ततः प्रसन्नो जनको जगाद सर्वं स्मरस्यङ्ग ? पुरा चरित्रम्।
यशो मदीयं यदिदं ब्रवीषि तवैव तद् भात्यकृतघ्नतायाः॥
प्रीत्या तव ममाभेदः तत्त्वज्ञानदशापि च।
यन्मूलो जनकवादोऽयं जनको नानकोऽभवत्॥
ना० च० १५। २६–४०

अजपाजपस्तस्य महिमा च

व्यारगिरौ दत्तात्रेयोऽवधूतः' सोऽहं' मित्यजपया जपति स्म । गुरुनानकेन पृष्टः सोऽब्रवीत् यत् यं जपं हंसः सुषुम्नायां स्थितः शंभुः) 'अयत्नात् "सोऽहम्" इत्यने नानारतं जपति तथा च येन जपेन निरावरणं परोक्षम् आत्ममहो ध्यायति हंसः स एव जपः अजपाजप" इति । एतेन परोक्षस्य विष्णोर्जपेन प्रत्यक्षस्य तस्यावलोकनं भवति । तथा च विस्मृतस्य महसः खलु रूपं स्मर्यते । प्रथमं परमधामप्रपित्सुर्लिव जपेन जगदीशनाम जपन् प्रथमां सिद्धिं प्राप्नोति तदनु तस्य कृपावशः सन् 'सोऽहम्' इत्यजपया जपति तथा च स्वात्मनः प्रकाशमासादयति ।

—:०:—

---

१. नानकचन्द्रोदये— क. दत्तोऽवदच्छृणु परेण न कश्चिदर्थः
सम्भावणादिभिरहेस्वसुखानुभूतिः ।
ख. हंसो जपत्यविरतामजपामयत्ना-
द्ध्येयं निरावरणमात्ममहो परोक्षम् ॥७।१३
"Repetion of mantras, austereties. Set aways of living or deeds of merit leave us dessitute even before our journey ends" GauriMala of Arjun.
ग. अजपयापि विमुक्तजनस्य किं
किमुमनीषितमस्य हि शिष्यते ।
इदमनुग्रहणाय परस्य चेद्
दतिथिर्सत्कृतिरप्यपराहता ॥१०।१३
घ. सोऽहमित्यजपया स्मरणीयं
विस्मृतस्य महसः खलु रूपम् ।
च. स्वप्रकाशमहसामपरोक्षे
तत्र तत्र भवतां किमु यत्नः ॥११।१३
छ. पूर्वं जपन्तो जगदीशमेव
सिद्धिं व्रजन्त्यस्य कृपावशेन ।
संस्कारतस्तं च जपन्ति भूयः
प्रारब्धशेषेण तनुं दधानाः ॥१२।१३
ज. आहूयते हि दूरस्थो न तु संनिधिसंस्थितः ।
परोक्षस्य जपो विष्णोः प्रत्यक्षस्यावलोकनम् ॥१५।१३

नवधा-भक्तिः

व्यारगिरौ दत्तात्रेयोऽवधूतो नानकमाह "किंजपसि किञ्च स्मरसीति" नानकः प्राह 'प्रणवं जपामि तेनैव तं पश्यामीति'। अवधूतः प्राह 'यदि निराकारो दृष्टस्तदा ब्रूहि स किंरूप इति।" अवधूतं नानकः प्राह 'असुलभोऽपि मुकुन्दः स भक्तिवशंवद' इति। मनसोवचसोऽप्यगोचरः स भजतां मनोनुगं नयनानन्दकरं कलेवरं भजते। अतः परमधाम प्राप्तुं जनैर्भक्त्या सेवनीयो मुकुन्दः। इयं भक्तिर्नवविधा भवति। श्रवणं कीर्तनं स्मरणं पादसेवनम्, अर्चनं, वन्दनं, दास्यं, सख्यम् तथा आत्मनिवेदनम्। इत्थं भक्त्या प्रेमाश्रुपुलकितो भक्तः भक्तच्छन्दानुवर्तिनं मुकुन्दं सेवमानः परमपदं प्राप्नोति। [2]गुरुर्नानकोऽप्याह यदि कश्चिदीश्वरं भजति तदा स सर्वं प्राप्नोति। इत्थं निर्गुणः सगुणश्च ईश्वरो ज्ञानेन भक्त्या च प्राप्यते मानवैः। ज्ञाने साधना राजयोगोऽजपाजपश्च भक्तौ साधना भक्तिरेव॥

—:०:—

---

१. क. ज्ञान भक्ति रङ्ग लोकादृगीता गिरश्चापि।
योगो भक्तौ ज्ञाने प्रयाजवच्चाङ्गतां भजति ॥२२।१३

ख. साधनभक्तेर्ज्ञानं ज्ञानात्फलभक्तिरुत्पन्ना।
साक्षादात्मपदस्थितिहेतुर्भक्तेरुदीर्यते स्पष्टम् ॥२३।१३

ग. क्वचित्प्ररूढस्त्वनुराग एव ज्ञानानपेक्षः प्रददाति मुक्तिम्।
गोप्योऽनुरक्ताः स्मरकोटिकान्ते कृष्णो विमुग्धा अपि मुक्तिमापुः ॥२४।१३

घ. श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥२५।१३

च. इयं नवविधा भक्तिः करोति परिशीलता
अनुरक्तिमपिच्छिन्नां प्रेमाश्रुपुलकांकिताम् ॥२६।१३

छ. मृदुनि मनसि सर्वभाविते सा भवति पुरातनपुण्यबीजरूपा।
अलमलमितरेण साधनेन प्रकटमियं कुरुते परं पुमांसम् ॥२७।१३

ज. भक्तच्छन्दानुवर्तित्वं मुकुन्दस्य परिस्फुटम्।
प्रह्लादवचनात् स्तम्भादाविरासीन्नृकेसरी ॥२८।१३

२. आसादीवार—गु. ग्र. सा०।

नानकेन व्याख्यातं प्रतिपादितं च उदासिमतम्

नानकः सर्वप्रथमम् उदासं नाम सन्यासं तस्य भेदाँश्च लालं स्वपितृव्यं श्रावयति। एतच्च वर्णितं वर्तते ७१।१७ तः १०४।१७ पर्यन्तम्। नानकमते ज्ञानस्य सम्पादनमेव मुख्यं वर्तते तत्तु ज्ञानं येन केनापि पथा सम्पादनीयम्। जनानां फल-भक्षणे तात्पर्यं भवतु[1] न तु वृक्षगणनायाम्। तस्य ज्ञानस्य सम्पादनाय साधना कर्तव्या भवति। साधनया मानापमानस्य सर्वथा समुन्मूलनं भवति हृदि। माना-पमानचकितः कोऽपि सिद्धिं न प्राप्नोति। साधनात एव ज्ञानिनो जाताः स्त्रीशूद्र-दैत्यराक्षसाः पक्षिणश्च। साधना चैषोदासिमतेनैव सम्पादयितव्या यतो हि शैवेषु वैष्णवेषु च परस्परं विरोधो वर्तते। अत औदासीन्यमेव विदधीत सर्वोऽपि। यश्च कृताग्रहो भवति स्नानादिशुद्धीकरणे योगे गुरौ ग्रन्थे च स एवोदासिमतेन साधनां कुर्वीत इति। इदं तु पुराणं मतं पुराणे गदितम्। अत इदं मतं वेदपुराणबाह्या न उपाश्र-येरन्। उदासी स एव भविष्यति यो जगत्युदासीव ब्रह्मणि कृतावधानो भवति। नास्य मतस्य मुण्डत्वे जटिलत्वे नग्नत्वे [1]कौपीनाच्छादनत्वे वाग्रहः। उदासिनो-वर्णाश्रमाभिमानेन शून्या भवन्ति। ते ज्ञानान्तरापकर्तृभ्यः कर्मभ्यश्च बहिः तिष्ठन्ति। उदासिनां हृदि सर्वदा [1]क्षमा, दया, सन्तोषः मैत्री च स्युः। जातनिर्वेदः सन् विश्वं च नश्वरं भावयन् जनः प्रथमं सन्यस्येत्। सन्यासी भूत्वा[2] भिक्षुरूपे त्रीणि ऋणानि[3] अपाकृत्य जनः परिव्रजेत्। तत्र एकदण्डिना त्रिदण्डिना वेति सता परिव्रजनं कर्तव्यम्। इत्थं परिव्राट् भूत्वा भिक्षां चरन् यतिर्जायतेऽचिरादेव। तदा शरावसम्पातादौ[4]

---

१. फलानां भक्षणेनार्थो वृक्षाणां गणनेन किम्।

१. मुण्डो जटिलो नग्नः कौपीनाच्छादनो वापि
ब्रह्मणि कृतावधानो जगत्युदासीह्युदासी स्यात्।

१. क्षमा दया च सन्तोषः सर्वत्रेश्वरदर्शनम्।
मैत्री च सर्वजीवेषु सन्यासिव्रतमुत्तमम्॥

२. ब्रह्मचारी गृही वानप्रस्थी भिक्षुरिति क्रमः।

३. मातृपुत्रदारारूपाणि।

४. विधूमे सन्नमुशले व्यङ्गारे भुक्तवज्जने।
वृत्ते शरावसम्पाते नित्यं भिक्षां यतिश्चरेत्।

नित्यमेव यतिश्चरेत् भिक्षां परमिमां भिक्षां न लिप्सेत [१]यतिरनुशासनवादादिना। यतिश्चतुर्विधो भवति कुटीचकः, बहूदमः, हंसः, परमहंसश्च। तेषां त्रयो भेदाः ज्ञानसन्यासिनो वेदसन्यासिनो धर्मसंन्यासिनश्च।
ते पञ्चविधाः उदासीनः, साधकः, नैष्ठिकः, वनाश्रयः, विरक्तश्च।

अत्रेदं ज्ञातव्यमस्ति यद् भक्तिर्द्विविधा-विष्णुभक्तिः शिवभक्तिश्च। तत्रैतत्रोदासिनो विष्णुं भजन्ते न शिवम्। एकदा गौतमः काँश्चिद् ब्राह्मणान् अनभिमतमाचरतो दृष्ट्वा तेभ्यो द्विजेभ्यो वेदविहीनान् भवितुं शापं ददौ। परन्त्विमे ब्राह्मणाः शिवस्योपासनां कृतवन्तः प्रार्थनया शिवः सन्तुष्टो भूत्वा तेभ्यः कापालादिसप्तमतं प्रदाय तेषामुद्धारं कृतवान्। अतः कापालं, जाङ्गलं, वामं, भैरवं, पञ्चरात्रकम्, शैवम्, पाशुपतञ्चेति सप्तमतं शैवमतं शैवमार्गो वा कथ्यते। उदासं नाम सन्यासमतं वैष्णवमतमिति नास्त्यत्र चर्चैव सामञ्जस्यस्य॥ अतः समस्तेषु मतेषु भूत्वोदासीनः उदासं नाम संन्यासं प्रवर्तयेत्। तत्रः—

"न जटासु न मुण्डत्वे न विभूतौ न चन्दने। दिगम्बरत्वे वसने नाग्रहः स्यादुदासिनाम्" इति। आत्मविचिन्तका उदासिनः प्रियंवदाः सन्तो मान्या भवेयुः। रौद्राक्ष्यां पौत्रजीव्यां वा मालयां ब्रह्मसत्यताप्रतिपादकं मन्त्रं जपन्तो निवृत्तिमार्गैकरसाः शिष्याः केशान् शस्त्राणि च बिभृयुः। इत्थं च ते श्रद्धाविश्वाससम्पन्ना ग्रामे ग्रामे गृहे गृहे भाषया लिखितस्य ग्रन्थस्य प्रचारं कुर्युरिति॥

देश्यैः सुबोधमधुरैः परमात्मतत्त्वं
बाहीकवर्गमपि बोधयताञ्जसैव।
द्वैतान्धकारमपनीयत नानकेन
सन्दर्शितस्तनुभृतामपवर्गमार्गः॥

—ना० च०—१५।१.

उदासी-सम्प्रदायः

उत् अर्थात् विश्वप्रपञ्चाद्बहिर्विरक्तः आसीनः अर्थात् उपविष्टः त्यागी सन्यासी उदासी इति व्युत्पत्तिलभ्योऽर्थः। उदासीसम्प्रदायो नानकशाहीसाधूनामेको भेदः। उदासिनो विश्वसन्ति यत्सम्प्रदायस्यास्योद्गमः "ऊँकारेण" जातः। तस्मात् ७३ तमायां वंशपरम्परायां नानकपुत्रः श्रीचन्द्रो व्यवस्थापितवानमुं सम्प्रदायम्। तदनन्तरमुदा-

१. नचोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया।
नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित्॥

सिनः श्रीचन्द्रस्य १६ तमायां वंशपरम्परायां १७६३-१८६३ शताब्दयां वनखण्डीजी जातः इति प्रतिपाद्यते। वनखण्डीमहोदयोऽयं सिन्धदेशे सिन्धुनद्याः सविधे साधुवेलायाः स्थापनं कृतवान्। तदनु तस्य ४र्थतमायां परम्परायां गणेशदासजी-महोदयः १६४९ ई० शताब्दयां सिन्धदेशतः साधुवेलामानीय काश्यां भदैनीनामके-स्थाने स्थापितवान्। अस्य 'अखाड़ा' पदवाच्याः शाखाः काश्यां वृन्दावने उज्जैने च दृश्यन्ते। सन्ति चास्य चतस्रः शाखाः।

(१) फूलसाहेबमहोदयप्रवर्तिता बहादुरपुरस्य शाखा।
(२) बाबाहसनमहोदयकृता आनन्दपुरस्य निकटे चरणकौलस्य शाखा।
(३) अलमस्तसाहेबमहोदयस्य नैनीताले।
(४) गोविन्दसाहेबमहोदयस्य शिकारपुरे।

कुम्भस्य समये एतेषां विशेषा उत्सवाः सम्पद्यन्ते। एते 'नमोब्रह्मणे' इति मन्त्रेणाभिवादयन्ति। दीक्षाग्रहणात्पश्चादेतेषां नूतनानि नामानि भवन्ति। यत्र दास इति, शरण इति, परमहंस इति आनन्द इति वा शब्दः अन्ते दृश्यते। एतेषां धार्मिक-ग्रन्थाः संस्कृतभाषायां सन्ति। उदासिनां बहवः संस्कृतविद्यालयाः सन्ति। महान्तं केशपाशं धारयन्त उदासिनो गैरिकवस्त्रं स्वच्छवस्त्रं वा धारयन्ति। तत्र केचित् मुण्डिनो भवन्ति इतरे रुद्राक्षमपि धारयन्ति।

दीक्षां गृहीत्वा स्वप्रियमन्त्रेण "चरणसाधुका धोधो पियो, अरप साधुको अपना जियो" इत्यनेन चरणोदकं पिबन्ति। एतेषां दार्शनिकविचारः दशनामि-सम्प्रदायस्य विचारेणैक्यं रक्षति। परन्तु यत्र दशनामिनो स्मार्ता भवन्ति तत्रो-दासिनः श्रौता भवन्ति।

इदमत्रावगन्तव्यमस्ति यत् धर्मस्तु सिखधर्म एव यः खलु सम्प्रदायभेदा-त्कस्मिंश्चिद्देशे कुत्रचित् भिद्यते। यथा व्यवहारे उदासिनो गैरिकं वस्त्रं, निर्मलाः श्वेत-वस्त्रं, अकालिनो नीलवस्त्रं धारयन्ति। परन्तु सर्वेषामपि सम्प्रदायानां धर्मः सिक्खधर्म एव। सिखधर्मः शिष्यपरम्परया न तु वंशपरम्परया गुरुगोविन्दसिंह पर्यन्तमागतः। ततः पश्चात् गुरोराज्ञया गुरुग्रन्थसाहिबनामाऽदिग्रन्थ एव गुरुत्वं प्राप्तः। ततः सर्वे ग्रन्थमेव गुरुममन्यन्ताथ च तस्यानुयायिनः सर्वे शिष्याः जाताः। शिष्यशब्दश्चापभ्रंशे पंजाबीभाषायां च सिक्ख इत्यभूत्॥

नानकचन्द्रोदयमहाकाव्यानुसारं नानकप्रतिपादितो धर्म एव उदासिमतम्। इदं चोदासिमतं वैकुण्ठवासिना देवाधिदेवेनोपदिष्टम्। नानकश्च तन्मतं स्वीकृत्य स्वशिष्येभ्यस्तन्मतं प्राददात्।

—०—

महाकाव्यमिदमनुसृत्य

नानकदर्शनवर्णनम् नानकोपदेशाः

सर्वप्रथमं महाकाव्येऽत्र नानको ज्वालां द्रष्टुमागतमङ्गदं प्रथमप्रस्तावस्य ६५ श्लोकतः ९६ श्लोकान्तं बहुभिर्वचनैरुपदिशति। तदित्थम्–अज्ञानरूपामयस्य ज्ञानमेवैकं शरणम्। तच्च ज्ञानं शमादिसेविना गुरुशास्त्रनिष्ठेन विषयेषु विरज्यमानेनैव प्राप्यते। तच्च शमादिसेवनादिकार्यं सतां सङ्गेन भवे विरागप्रदर्शनेनैव भवति। अयमेव सुपन्थाः। इदं च ज्ञानं प्राप्तुं जना विचित्रैर्यानैर्यान्ति गन्तव्यदेशम्।

अनेन च ज्ञानेन निर्विकल्पकब्रह्मसेवा करणीया। तया सेवया ब्रह्माप्तिर्भवति। तदा बोधोदयः। यदा च ब्रह्मास्मीत्यपरोक्षबोधो जायते तदा मोक्षः सम्पद्यते। परन्त्वविद्यया तज्ज्ञानं न जायते। अविद्या तु अनिर्वाच्या अनादिप्रकृतिर्मायैव। अविद्यायाः कारणेन पूर्वपूर्वभवभावनावशादुत्तरोत्तरजनुः प्रपद्यते। जन्म गृहीत्वा च जनः स्वमन्यं मन्यते।

जनो जनुः प्रपद्य विडम्बनां[1] याति। विडम्बनामिमां दूरीकर्तुं ज्ञानमेव सम्पादनीयम्। तदर्थं स्वात्मनः प्रकाश एव परमो गुरुः। गुरुशिष्यव्यवहारस्तु गड्डलिका-प्रवाह इव।

वस्तुतो द्विचन्द्रगन्धर्वपुरीसमानं सर्वमिदं जगन्मृषैव। प्रारब्धशेषेण धृतशरीरः शरीरयात्रो जनो यदा प्रबुद्धो भवति तदा जगदिन्द्रजालं पश्यन्नपि न द्वेष्टि नाकांक्षति नैव बिभेति कस्माच्चिदपि वस्तुभ्यो जीवेभ्यो वा। अत इदं च ज्ञानं प्राप्तुं स्वात्मानं च प्रकाशयितुं शास्त्रं गुरुः गोविन्दश्च सेवनीयाः। इमे एव त्रिगुणात्मिकां मायां निर्धूय धन्यस्य अद्वयां श्रियं दिशन्ति।

ततो द्वितीयप्रस्तावस्य ६६।२ तः ७९/२ यावत् नानकस्य जन्मलग्नानुसारं हरिदयालुवर्णितं नानकस्य भाविनो जीवनस्य वर्णनं नानकदर्शनमभिव्यनक्ति।

तत पश्चात् षष्ठे प्रस्तावे ६४ श्लोकतः ६९ यावत् नानकेन कृतं भगवच्चरणसेवावर्णनं नानकदर्शनमभिव्यनक्ति। अत्र तावद् वर्तते महिमा भक्तसखस्य भक्तस्य च।

---

१. मदेन सन्निपातेन भूतावेशेन निद्रया। उन्मादेन च रागेण स्वमन्यं मन्यते जनः।

२. अमात्यवश्यो राजेव, स्त्रीवश्यश्च पुमानिव
अन्तःकरणतादात्म्याज्जीवो याति विडम्बनाम्।

यथा धरातले सर्वत्र प्रसृतमपि वारि लभ्यते यत्नेनैव, सर्वत्र व्याप्तोऽपि बह्निर्दारुषु यत्नैनैव लभ्यते तथैवेश्वरः सर्वत्र व्यापकोऽपि यत्नादेव लभ्यते। अतस्तदर्थं यत्नः करणीयः। धनदारादिस्नेहे बद्धानां कृते ब्रह्म दुर्गममेव यथा पिञ्जरे बद्धानां पक्षिणां कृते आकाशम्।

पुनस्तत्रैव प्रस्तावे श्लोक १३० तः १४४ यावत् चन्द्रोराज्ञीं जीवनदर्शनमुपदिशति नानकः। तथा प्रयतनीयं जनेन यथा हृदि विकारो न समापतेत्।

लोष्टैर्हतो वा कुसुमैर्वृतो वा
ज्ञानी विकारं न मनागुपैति॥

ज्ञानाय यत्नकणे हेतवो दीयन्ते यतिवरैर्यत् शरीरमिदं क्षणभङ्गुरं नास्त्यजरामरस्य देहस्तु। इदं तु वृद्धो भूत्वा विश्वं खलः पालयते। जीवन्तोऽपि जनाः सर्वे निजोदरस्य पोषाय ग्लायन्ति। न कोपि कश्चिद्रक्षत्यत्र संसारे। संसारनौरियं भज्यमानेव प्रतिभाति सततम्। संसारेऽस्मिन्संसारी व्याधजाले पतित इव वर्तते। अतोऽनित्येस्मिन्संसारेऽनित्यं शरीरं रक्षन्तो जना यत्किमप्यनित्यं वस्तु कामयन्ते तत्सर्वं महदाश्चर्यकरमेव। अतो न कर्तव्यं कस्यापि कृते दुःखमत्र संसारे। न भवति गृहे स्थित्वा ज्ञानलाभः। जनकस्त्वासीदनेकजन्मार्जितपुण्यकर्मा। अतस्तेन गृहे तिष्ठताऽपि ज्ञानवताऽभूयत।

पुनः सप्तमे प्रस्तावे ११८ श्लोकतः १२७ यावत् नानकस्य जीवनदर्शनविषये विचारः समक्षमागच्छति। यत्र वर्तते लीलाकलितविग्रहस्य योगिनश्चर्चा।

तदनु प्रस्तावेऽष्टमे ३५ श्लोकतः ३७ यावत् नानकः स्वमातरममृतवचनं श्रावयति। अनित्यममुं संसारं ज्ञात्वा विलापो न करणीयः। हे मातः यदि सर्वदैव पुत्रं स्वसमीप एव दिदृक्षसि तदा मृते कदाचित्तस्मिन्पुत्रे किं करिष्यसि त्वमिति।

समीपसंस्थेऽपि मृते तनूजे
शक्नोति कर्तुं जननी किमस्य ?॥

पान्था इव मनुष्या संसाररूपधर्मशालायां तिष्ठन्तः स्वां स्वां दिशं यान्ति। नास्त्यत्रेश्वरं विहायान्यः कश्चित्सहायः। अतः पुत्रस्य सङ्गं विहाय देवकीपुत्रमुपाश्रयस्व।

जानन्त्यनित्यं तनयादियोगं
ये ते वियोगे न समुद्विजन्ते॥

पुनरत्रैव प्रस्तावे ५० श्लोकतः ६६ यावत् बोलाररायं भगवत्स्वरूपमभिधायोपदिशति गुरुः ।

उपास्य बुध्यात्मधियाऽथवेशो
भक्तैः स्मृतः शर्म करोत्यवश्यम् ।
खण्डोऽन्नमिश्रः किल केवलो वा ।
जुष्टः सृजत्येव जनस्य तुष्टिम् ॥

इत्थं भगवतोपासनां कारं कारं जनो जगदिन्द्र जालाद्बहिर्गन्तुमीहते । यथा यथा भगवन्तं भजते तथा तथाऽखण्डो जायते भगवता सह । मायासक्तो जनो मतिचेतोभ्यां विमुक्तो भवति । मतिचेतोभ्यां विमुक्तस्य हृदि अहङ्कार आगच्छति । अहङ्कारेण स्वमन्यं मन्यते जनः । कामलयाकुलमीक्षणं यथा शंखं पीतं मन्यते तथैवाहङ्कारः । तेनापतत्यज्ञानं येन ब्रह्मणा जीवस्य न सम्भवति तादात्म्यम् । मायैव तत्त्वं पिदधाति । मायामुक्तसुषुप्तौ जीवस्य यद्भवति स्वयं भासितं तेन च यज्जायते सुखं तज्जागरितेन न प्राप्यते ।

स्वापस्य विश्वस्य यथैव निद्रा
माया तथास्य प्रतिभासहेतुः ।

ततः पश्चात् आर्यम्लेच्छयोरैक्यप्रतिपादनप्रसङ्गे अष्टादशप्रस्तावे ६० श्लोकतः ६८ यावत् बाबरेण सह तदनु १०७ तः १२३ यावत् मालनाम्ना म्लेच्छेन सह ततः १२६ तः १३२ यावत्तत्रैव प्रस्तावे उवारेखानेन सह नानकस्य विचाराः समक्षमायान्ति ।

तद् यथा—

स एक एव हरिर्विभिन्ननाम्नाऽयैः तुरुष्कैश्च संसेव्यते । शास्त्रे कोराने च सदसन्निरूपणं महेशितुर्वचनैरेव कृतमस्ति ।

न जातिरीशस्य निरूपिता श्रुतौ
न तस्य चार्यो यवनोऽथवा प्रियः ।
तनुं वहन् कामपि कर्मलम्भितां
भजेत यस्तं तु स तस्य बल्लभः ॥

अनादिवासनावेशात्संसारो वर्तते । तत्तत्कर्मणां विपाको जात्यायुर्भोगलक्षणः । अरागेण, अविरोधेन स्वधर्मानुसरणेन हरेर्भक्तिः सर्वमुक्तिप्रदा । "अपराध्यति जन्मना न कश्चित्सकलः प्रेमपरो हरौ कृतार्थः" । नट इव नानावेषं धारयन्हरिः

सर्वेषां धाता। नव, सप्त, चतुर्दशेति सर्वं तस्य लीलाभेदः। अदूरदर्शिनां स हस्तादर्शस्त्वबोधः सात्विकी तु एकदर्शिनी। यथा घटमठपटादौ नभसो न भेदस्तथैव जीवस्यापि। यथा विख्यातानां मध्ये नासिकावान् न दृश्यते तथैव ज्ञानी न दृश्यते अज्ञानिमण्डले। बोद्धापि कदाचिद् बुधेन तुल्यं व्यवहरत्यविद्यया! आर्यम्लेच्छयोस्तथैवाभेदो यथा शशमशकादिचैतन्ये। केवलं तातादिकथतात् पुत्रो न भिन्नः पित्रा। पितापुत्रयोर्भेदस्त्वनुक्तो न स्वरसतः। तथैव ब्रह्मा विष्णुः शिव इत्यनुक्तो भेदो न स्वरसतः। मन्ये मुकुन्दपदयोरनुराग एव म्लेच्छस्य चार्यनिवहस्य च महत्वहेतुः। द्विजो भवतु सुष्कसो वा तुरुष्को वा स यदि जगदीशपदारविन्दे चेतः समर्पयति तदा स मान्य एव। सितासिताभ्यां कञ्चुकाभ्यां पुरुषो विभिन्नो न भवति।

पक्षी स्वगत्या च पशुः स्वगत्या
नरः स्वगत्या च सरः प्रपद्य
तोयं पिबेत् तृप्तिमपि प्रयायात्
नागच्छतः कस्यचिदस्ति तृप्तिः॥

मायामयेन वपुषा त्रैवर्णिको वृषलो तुरुष्कः पुष्कसो वा भवति जनः। वर्णभेदस्तु बाह्य एव। स्वस्वेनैव शास्त्रेण आर्यो यवनश्च हरिं व्रजति। भ्रान्ताः स्वकार्ये कलहायमाना नानामताडम्बरवाग्विडम्बैः शास्त्रार्थं कुर्वन्तो जना वास्तविकं तत्त्वं न परिचिन्वन्ति। कर्ताऽखिलस्य जगतो जगदीश एको विश्वं वमत्यथ संहरति च स्वशक्त्या। मायामयं धनादिकं मिथ्या मत्वा नोपेयान्ममताम्।

पश्यन्ति ये नमस्यन्ति सर्वत्र जगदीश्वरम्
ते प्रिया जगदीशस्य जगदीशश्च तत् प्रियः॥

—:o:—

वैकुण्ठवासिनो नानकं प्रत्युपदेशः

कलौ विष्णोरंशरूपो नानको यदुपदेशं ग्रहीतुं ध्रुवलोकात्स्वशक्त्या वैकुण्ठं गतस्तदा तत्र हृषीकेशस्तस्मै देश्येर्जनानुदासिमतमुपदेष्टुमुपदेशं ददौ। अत्र भगवदुक्तिप्रसङ्गे श्लोकसं० १३।१४ तः ७४।१४ यावद्विष्णोरुपदेशाः सन्ति। तथाहि—विरोधः कदाचिदपि केनचिदपि न कार्यः। रिपौ सुहृदि च सर्वदा सामान्यव्यवहारः प्रदर्शनीयः। धनदारादौ न महती रतिर्विधातव्या। दुःखे सुखे चानश्वरं संसारमवलोक्य मयि प्रपत्तिं विधाय सततं मम स्मरणं कर्तव्यम्। हेतोरत आत्मना स्वतः प्रकाशेन भाव्यम्। तदानन्दबोधमधिगम्य मम स्वरूपं कलयेज्जनः। जीवा उपाधिवशतो भिन्ना भवन्ति। यथा पयसि प्रतिविम्बितः शशिः कदाचिन्मलिनः कचिच्चलश्च जायते तथैव नरोऽपि भिन्नः प्रतिभासते इति वर्वर्ति शशिना नरस्यैक्यम्। वासनयैवैको जीवो द्वितीयं भिन्नं मन्यते। आत्मनः परमात्मना यदैक्यं भवति तदैव सम्भवति मुक्तिः। अतो मुमुक्षुस्तत्त्वज्ञानं मनोनाशं वासनाक्षयञ्चैतत् त्रयं स्वेन व्यवसायेन व्यवसायात्मिकया बुध्या च सम्पादनीयम्। सोऽहमिति तत्त्वज्ञानं, सर्ववृत्तीनां निरोधो मनोनाशः एवं क्रोधादीनामनुद्भवो वासनाक्षयः। तत्र श्रवणमननादिध्यासनं तत्त्वज्ञानसाधनम्। मनोनाशेऽष्टाङ्गयोगः कारणम्। वासनाक्षये च वैराग्यमेव शरणम्। तत्र वासना द्विविधा शुद्धा मलिना च। मलिना बाह्या आभ्यान्तरीति द्विविधा। तत्र बाह्या लोकशास्त्रदेहप्रभेदजा आभ्यन्तरी कामक्रोधादिरूपिणी मानसी। अतो मलिना त्याज्यैव। तदर्थं वैराग्यं परिशीलयेत्। तदर्थं स्वहितमहितं च कालपक्कमुदीक्ष्य निरहंकृतिर्भूत्वा[1]त्रिलोकीपतिं भजेत्। स एव कृतार्थो यो विष्णुप्रेमालसमानसः सन् नारायण-कथाः श्रृण्वन् यापयति दिनानि। यदा स्त्रियः शूद्राः पशवो सुराः राक्षसाश्च भक्त्यैव विष्णोरतिमहतीं गतिमापुस्तदा द्विजास्तु प्राप्नुयुरेव।

ततो नानकं मुक्तस्य लक्षणं ब्रवीति विष्णुः। तत्र निम्नलिखितेन पथा मुक्तिमाप्नोति जनः। प्रथमं शुभेच्छा मानवस्य हृदि जायताम् ततो विचारणा ततः सत्त्वापत्तिः, ततः संसक्तिः, ततः पदार्थाभाविनी भावना ततस्तुरीयावस्थायां याति जनो यत्र लोक स्वप्नवत् दृश्यते, ततः पञ्चम्यां सुषुप्तिः षष्ठ्यां गाढनिद्रा ततः सप्तम्यां मुक्तिर्जायते। इमं च मुक्तिमार्गं मूढमानसान् कथयितुं ममांशरूपस्त्वं नानकः कलियुगे।

---

१. समर्थ्य सर्वकर्माणि मां भजेन्निरहङ्कृतिः।

इत्थमुपदिश्योदासिमतस्य प्रचारं प्रसारं च कर्तुं तन्मतमुपदिशति । शैवेषु वैष्णवेषु च परस्परविरोधस्य सत्वात् हे नानक त्वमुदासं[1] नाम संन्यासं प्रवर्तये: इति भगवदुक्तिः । तत्र जटासु, मुण्डत्वे, विभूतौ, चन्दने,दिगम्बरत्वे वसने, उदासिनामाग्रहो न भवेत् यतोहि गलवद्धघंटाः [2]सत्योपि पयोविहीना गावो मूल्यं न लभन्ते । तत्र शिष्याः केशान् विभृयुः, शस्त्राणि धारयेयुः, ग्रन्थे गुरौ च परां भक्ति कुर्युः । प्रियम्वदा मान्याः शिष्या निवृत्तिमार्गैकरसा भवन्तु स्मार्तेन मार्गेण च गच्छन्तु । शिष्याः कालत्रये ब्रह्मसत्यताप्रतिपादकस्य मन्त्रस्य मालाभिर्जपं विदधतु। सा च माला द्विविधा रौद्राक्षी पौत्रजीवी च ।

शिष्याणां नामानि त्रिविधानि भवन्तु दासान्तानि रामान्तानि गुरुब्रह्मपदाङ्कितानि वा । मन्दानां प्रतिपत्तये ग्रन्था भाषया सन्तु।

"पात्रेण येन केनापि पयः पानं हि तृप्तिदम्" । जगदुद्धर्तुं गतस्त्वं पृथिव्याम् । त्रिलोकीपतेः कथां गृहे गृहे प्रवर्तयस्व यतस्व च लोकेषु श्रद्धां विश्वासं चोत्पादयितुम् ।

"त्वन्मतस्थः परो वापि यस्त्वां नानक पूजयेत् ।
तस्य सिद्धयन्तु सर्वेर्थाः श्रद्धाविश्वाससम्पदा ॥

—o—

१. उदासीनः समस्तेषु मतेषु ब्रह्मवित्तया ।
उदासं नाम संन्यासं तस्मादङ्ग प्रवर्तय ॥

२. नेपथ्यमात्रेण भवन्ति नार्था गुणैर्विहीनस्य कदापि सौम्य
मूल्यं लभन्ते न पयो विहीना गावः समन्ताद्गलवद्धघण्टाः

सिक्खधर्मस्तत आगताः सम्प्रदायाश्च

नानकप्रतिपादिते धर्मे गुरोः शिष्यस्य च परस्परं घनिष्ठः सम्बन्धो दृष्टिपथमवतरति। नानकः ईश्वरमेव गुरुममन्यत। अतएवेश्वरं स 'वाह गुरु' इति पदेन सम्बोधितवान्। इत्थमत्र धर्मे गुरोरत्यन्तमेव महत्त्वं वर्तते। अत इदं स्पष्टमेवास्ति यदत्र मते शिष्यस्याप्यत्यन्तमेव महत्त्वमस्ति। शिष्याणां कर्म सर्वदा गुरोः शिक्षाग्रहणं शिक्षणं च वर्तते। शिक्षाग्रहणस्य नास्त्यन्तं मनुष्यजीवने। मनुष्यस्य जीवनं स्वल्पं लघुतरं च वर्तते परन्तु ज्ञानन्त्वसीममनन्तं चास्ति। अतएव नानकद्वारा प्रतिपादितस्य मतस्य साधकाः शिष्या एव कथ्यन्ते। [1]अतः सिक्खशब्दः शिष्यशब्दात् व्युत्पन्नो न तु सेवकशब्दात्।

[1]कस्यचिदपरस्य विदुषो मतानुसारं हिन्दूमुस्लिमबौद्धविचाराणां परस्परं सम्मिलितरूपमेव नानकमतमस्ति। नानकमते एकेश्वरवादिता स्पष्टं दृष्टिपथमवतरति। सचायमेकेश्वरवादः वेदान्तमतमधिकमनुसरति तथा च कोराने प्रतिपादितेकेश्वरवादादपि यथाकथञ्चिन्मिलति। नानकमते ईश्वरः "निरवैर, निरभव, अकालमूरति" रूपोऽस्ति। एकस्मिन्वाक्ये नानकमतमित्थं समक्षमायाति "ईश्वरस्यैक्यं तथा मानवमात्रस्य परस्परं भ्रातृभावः"॥

एतन्मतानुसारं राजारङ्कौ समानावेवेश्वरस्याग्रे। सर्व एव जना ईश्वरेण समानरूपेणैव निर्मिताः। भेदस्तु तत्र मानवेनैव कृतः। नानकमते शुद्धेन हृदयेन ईश्वरोपासना कर्त्तव्या तत्र नास्ति बाह्याडम्बरस्यावश्यकता।

शिष्याः निराकारस्योपासनां कुर्वते परन्तु तेषां धर्मे साकारोपासनाया विरोधो नास्ति। गुरुगोविन्दस्तु रामकृष्णयोरपि गुणगानं कृतवान्। गुरुः अमरदासोऽमृतसरसि स्वर्णमन्दिरनिर्माणस्य शुभारम्भमकरोत्। इदं हि शिष्याणां तीर्थस्थानम्। मन्दिरमिदं सौन्दर्ये द्वितीयं स्थानं रक्षति।

सम्प्रदायाः

उदासीसम्प्रदायः—सम्प्रदायोऽयं नानकपुत्रेण श्रीचन्द्रेण प्रतिष्ठापितः। उदासिनां राजनीतौ नास्ति सम्बन्धः। श्रीचन्द्रः स्वयमपि सन्यासिवेषे एव भ्रमणं

---

१. पाई महोदयः स्वपुस्तके "मोनोग्रापस् औफ दि रिलिजियस सेक्टस् एमाङ्स् हिन्दूज्" नामके सेवकशब्दात् आह।

१. फ्रेडरिक पिकनाट—रिलिजियस् सिस्टम आफ दि वर्ल्ड।

कृतवान् । उदासिनां वेषभूषा साधूनामिव । ते सन्ति तटस्थाः सांसारिकेषु विषयेषु। उदासिसम्प्रदायस्य पुनरुत्थानं गुरुहरगोविन्दपुत्रेण गुरित्तामहोदयेन कृतम्। तेऽन्यवसन् कर्तृपुरे। तत्रास्ति तस्य समाधिः। सम्प्रदायस्यास्य चतस्रः शाखाः सन्ति।

(१) बहादुरपुरे फूलसाहबमहोदयस्य शाखा।
(२) आनन्दपुरे निकटस्थरणकौलनामके स्थाने बाबाहसनमहोदयस्य शाखा।
(३) पुरीनगरे नैनीतालनगरे च अलमस्तसाहबमहोदयस्य शाखा।
(४) सिंधनगरे गोविन्दसाहबमहोदयस्य शाखा।

प्रायः सर्वा एव शाखाः शाखाध्यक्षस्याज्ञां शिरसा वहन्ति। उदासिमतानुयायिनो निवसन्त्याधिक्येन मालवाकाशीजालन्धररोहतक फिरोजपुराख्येनगरे।

एते आदिग्रन्थस्यारार्तिं कुर्वन्ति तथा च पूजासमये घंटां वादयन्ति। भस्मस्नानमपि ते कदाचित्कुर्वन्ति। एतेषां प्रियमन्त्रोऽस्ति—

"चरण साधुका धो धो पियो
अरप साधु को अपना जियो।

उदासिमतानुयायिनः नागा (नानकशाही) अपि कथ्यन्ते।

निर्मलसम्प्रदायः—गुरुगोविन्दसिंहस्य समये वीरसिंहेण सम्प्रदायोऽयं स्थापितः। निर्मलाः शिष्याः अत्यन्तमेव पवित्रं सदाचारं समाचरन्ति। एते संस्कृतं पठित्वा श्वेताम्बरं धारयन्ति।

नामधारीसम्प्रदायः—अस्य प्रारम्भो लुधियानानगरस्य रामसिंहेन कृतः। अयमासीद् राज्ञो रणजीतसिंहस्य सेनानी। एते नामधारिणः 'कूका' अपि कथ्यन्ते। ईश्वराराधनासमये एते शिरः चालयन्तो 'कूकं' कुर्वन्ति। एतेषां 'सत्तश्री अकाल' इति मन्त्रः। एते सरलमुष्णीषं धारयन्ति।

सुथराशाहीसम्प्रदायः—सुथराशाहेन स्थापितोऽयं सम्प्रदायः। केचित् कथयन्ति यद् गुरुहरगोविन्दसिंह एव सुथरा इति नाम्ना सम्बोधितोऽभूत्। सुथरा शब्दस्य स्वच्छ इत्यर्थो भवति। अपरे कथयन्ति यत् सूचानामा ब्राह्मणः कालेन यः सुथराशाह इत्यभूत्, एते लौहदण्डं वादयित्वा भिक्षामाचरन्ति केचित् सुथराशाही सम्प्रदायो गुरुतेजबहादुरेण स्थापित इत्यपि कथयन्ति। एते पञ्जाबे बङ्गाले च निवसन्ति।

सेवापंथीसम्प्रदायः—सेवाधर्मानुयायिना कन्हैयानाम्ना स्थापितोऽयं सम्प्रदायः। यदा गुरुगोविन्दसिंहो मुगलेनाक्रान्तस्तदा रणक्षेत्रे कन्हैयानामाऽयं शत्रुभ्यो-

मित्रेभ्यश्च समानरूपेण पानीयं प्राददात्। एतेन कार्येण सन्तुष्टो गुरुरेनं प्रशशंस। असौ च कन्हैया सेवारामनामकं शिष्यमुपदिदेश। अस्य नाम्नः कारणेनैवास्य सम्प्रदायस्येदं नाम प्रख्यातमभूत्।

अकालीसम्प्रदायः। अकालिसम्प्रदायानुयायिनो विहङ्गा अपि कथ्यन्ते। विहङ्गशब्दस्य निर्भीक इत्यर्थो भवति। एते खालसापथः अनुयायिनो भवन्ति। सं० १७४७ शताब्द्यामस्याविर्भावो मानसिंहस्य नायकत्वे जातः। चमकौरदुर्गे गुरुगोविन्द एकदा मुङ्गलसैन्तमध्यात्सन्यासिवेषं गृहीत्वा निर्गतः। ग्राममागत्य स मानसिंहोऽयं युद्धस्थले परिधत्तं नीलवस्त्रं ददौ तं चाज्ञापयामास च सम्प्रदायमेकं स्थापयितुम्। अकालिनो ईश्वरं अकालपुरुषं मन्यन्ते नीलवस्त्रं च परिदधति। एते सामाधिके राजनैतिके च विषये चर्चां कुर्वन्ति। सिक्खेषु एते सर्वश्रेष्ठा मन्यन्ते।

—०—

गुरुग्रन्थसाहिबः

[1]प्रथमं सिखाणां धर्मग्रन्थस्य नाम ग्रन्थसाहिब "आदिग्रन्थः" इत्यासीत्। परन्तु यदा गुरुगोविन्दसिंहो ग्रन्थमेव गुरुममन्यत तदास्य नाम गुरुग्रन्थसाहिब इत्यभूत्।

इदमत्रावगन्तव्यमस्ति यद्गुरुगोविन्दसिंहेन ये श्लोकाः यानि च पद्यानि निर्मितानि तानि तस्यैवाज्ञया ग्रन्थसाहिबे न संगृहीतान्यभुवन्। केवलमेक एव श्लोकः गुरुतेगबहादुरनिर्मितश्लोकस्यान्ते गुरुगोविन्देन प्रणीत इति मन्यते ग्रन्थ-साहिबे। अत एव गुरुग्रन्थसाहिबस्य नाम आदिग्रन्थ इत्यभूत् तथा च गुरुगोविन्द-सिंहेन प्रणीतस्य नाम दशमग्रन्थ इत्यभूत् यतोऽयं सिखाणां दशमो गुरुरासीत्। तत्र गुरुग्रन्थसाहिबे ३३८४ शब्दाः सन्ति १५५७५ बन्दपदभाजः श्लोकाः सन्ति। येषु

[1]२९४९ बन्दाः गुरुनानकस्य-महला—१
५७ „ „ अङ्गददेवस्य- „ —२
२५२२ „ „ अमरदासस्य „ —३
१७३० „ „ रामदासस्य „ —४
६२०४ „ „ अर्जनदेवस्य „ —५
१९६ „ „ तेगबहादुरस्य „ —६

अत्रैव तेगबहादुरस्यान्तिमः श्लोको गुरुगोविन्देन निर्मित इति मन्यते।
गुरुहरगोविन्दः, गुरुहररायः, गुरुहरकृष्णश्च पद्यं न लिखितवन्तः।
एतदतिरिक्तानि पद्यानि गुरुग्रन्थसाहिबे निम्नलिखितसन्तकविभिर्लिखितानि सन्ति।

---

१. प्रो० पिकनाट—जर्नल आफ रायल एशियाटिक सोसाइटी भाग १८ तथा ए क्रिटिकल स्टडी आफ आदिग्रन्थ०

लेखक—डा० सुरिन्दरसिंह कोहली प्रो० पंजाबी, चण्डीगढ़, भू० पू० दिल्ली वि० वि०

१. प्रो० पिकनाट J.R.A.S. भाग १८

[2]१ बन्दौ जयदेवस्य
४ बन्दाः शेखफरीदस्य
६० „ नामदेवस्य
४ „ त्रिलोचनस्य
१ „ परमानन्दस्य
१ „ साधनायाः
३ „ बेनीमहोदयस्य
१ „ रामानन्दस्य
४ „ धन्नस्य
१ „ पीपामहोदयस्य
१ „ सेनस्य
२५२ „ कबीरस्य (तथा तदतिरिक्तं, पौरिस वाभनअखरी, थिहिन, वरसात, तथा २४९ श्लोकाः)
४ „ रविदासस्य
२ „ भीखनस्य
१ „ सूरदासस्य
१ श्लोकः सुन्दरस्य
३ „ मर्दीनामहोदयस्य
४६ सवैया कलस्य
४ „ कलसहरस्य
१ „ तलस्य
४ „ जलपस्य
१ „ जलस्य
८ „ किरातस्य
३ „ सलस्य
१ „ मलस्य
६ „ नलस्य
२ „ भिखस्य
१ „ जननस्य
१४ „ दासस्य

---

२. डा० सुरिन्दर सिंह, प्रो० पंजाबी, चण्डीगढ़ तत्र Hymn इत्य बन्द इत्यर्थः ।

५ ,, गयन्दस्य
७ ,, सेवकस्य
१० ,, मथुराः
५ ,, बलस्य
२ ,, हरवंशस्य
१ ,, सत्तस्य
१ ,, बलवन्दस्य

गुरुग्रन्थसाहिबे निम्नलिखिताः भाषाः प्रयुक्ताः सन्ति । जयदेवेन–पूर्वी अपभ्रंशः गुरुभिः–सन्तवाणी, पंजाबीयनामदेवेन–अपभ्रंशः, मराठी, यत्र अरबिक इत्यस्य परसियन इत्यस्य च प्रभावः । कबीरेण–हिन्दी, भट्टैः–हिन्दी, गुरुणार्जुनेन–लेहन्दा, सिन्धी च ।

पद्येष्वेषु छन्दांस्यनेकविधानि बहवो रागाः रागिन्यश्चोपमया रूपकेणयाद्यलङ्कारेण प्रदत्ताः सन्ति ।

ग्रन्थे समागतायाः राजनैतिकसामाजिकधार्मिकदशायाश्चित्रणं नानकचरित्रवर्णनप्रसङ्गे विधास्यते ॥

—: ० :—

नानकप्रतिपादितानि तत्त्वानि

१. परमात्मा
२. मूलमन्त्रः
३. सृष्टिः
४. कर्ता
५. हउमै (अहंकारः)
६. माया-प्रकृतिः
७. आत्मा
८. जीवः 'मनुष्यः'
९. मसस
१०. हरिप्राप्तिपन्थाः
११. सद्गुरुः
१२. सत्सङ्गतिः
१३. गुरुः
१४. शबद् (शब्दः)
१५. नाम
१६. जपः

i साधारणजपः ii लिवजपः iii अजपाजपः ।

तत्र केषाञ्चित् संक्षेपेण प्रतिपादनं क्रियते ।

परमात्मा = एक एव ईश्वरः। ब्रह्माविष्णुमहेशारूपः
एते तस्यैव भेदाः । एते त्रयोऽपि मायया प्रभाविताः ।
सृष्टि-स्थिति-प्रलयकर्तार एते परमात्मन एव भेदाः ।

आदिग्रन्थस्यादितोऽन्तिमं यावत् परमात्मनः चर्चा ब्रह्म (ब्रह्मन्) पदेन कृतास्ति । अयं ग्रन्थप्रारम्भे ओंकारपदेनाप्युक्तः । अस्य वर्तते द्विविधं रूपं निर्गुणं सगुणं च।

---

१. i "इक ओंकार सतनाम कर्ता" ....

—आदि ग्रन्थ (मूलमन्त्र)

ii "What eve I see is Brahman, whatevere I hear is Brahman."

—Curu ArJan.

A सृष्टिः = परमात्मनः कर्म। अतएव स कर्ता, (करतार, सिरन्दा, खालिक, सिरजनहार, करनकारखा, प्राणदाता, प्राणपति, स्वरनहार) इति कथ्यते।

प्रकृतिः सांख्यमतानुसारं महदादिं जनयति। तेन तदनु जायतेऽहंकारः। आदिग्रन्थेऽपि प्रकृतिः प्रधानपदेन व्यवहृताऽस्ति। "जपुजी" इत्यत्र "सुखमणी" इत्यत्र च महत् इति पदं प्रधान इति पदं च व्यवहृतमस्ति।

A 'Praise be to God, The Lord of creatures, The most merciful, The king of the day of Judgedment. Thee do we workship and of thee do be beg assistance. Direct us in the Right way, in the way of those to whom thau hast been graciaus : Not of those againest whom there are incensed, nor of those who go astray. —De koran chapter I

II मूलमन्त्रे अयं कर्तापुरुष इति कथ्यते।

"He was in abstract mediation when it was His will, He created the world."

× × ×

He created Brahma Vishnu Shiva and attachment of Maya was increased." —Guru Nanaka in Raga maru.

III 'The creater has created Shiva and Shakti both. And keeps them under his cosmic Law."

—Guru Amar Das in Anand.

IV He becomes countless from one and every thing dissoltuet into one."

—Guru Arjan.

—Nath M. V.)

(I) मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।

(II) He created Shakti of three gunas the great Maya is his Shadow.

—(Gaund M. V.)

(III) Jiva is a miniature of Brrhman. It comes of Brahman. The physical bodies decays but it continues for ever.

—Cretlines of Sikh thought.

अहङ्कारश्च त्रिभिरेभिर्गुणैः युक्तोऽस्ति । जीवस्तु ब्रह्मण एव प्रादुर्भवति । शरीरं नश्यति परं जीवः (आत्मा) सदैव जीवति ।

यथा जीवनस्य सर्वस्मिन्नेव क्षेत्रे गुरोरावश्यकतास्ति तथैवाध्यात्मिकज्ञानार्जनायापि गुरुरुपास्यः । सर्वत्रैवादिग्रन्थे गुरोरथवा सद्गुरोश्चर्चा कृतास्ति । गुरोर्महत्त्वस्य वर्णनं प्रागेव भूमिकायां मया कृतमस्ति । इत्थं गुरुवाणी अथवा शब्दः सर्वाधिकं महत्त्वं रक्षति । गुरुस्तु ईश एव परन्तु यः खलु शरीरी गुरुरस्ति स कार्यद्वयं करोति शिष्येभ्यः । स प्रथमं तेभ्यः गुरुमन्त्रं (शब्दं नाम वा) ददाति । तदनु ब्रह्मज्ञानं प्रतिपादयति । सद्गुरुः शिक्षां दीक्षां च ददाति । शिष्येभ्यः । स च मन्त्रं कथयति । मन्त्रो द्विविधः । मूलमन्त्रः बीजमन्त्रश्च । मूलमन्त्रेणादिग्रन्थः प्रारभ्यते बीजमन्त्रस्तु वा + हु ÷ गुरु = वाहु गुरु इति ।

मूलमन्त्रस्तु "इक ओंकार......" रूपः बीजमन्त्ररूप "वाहुगुरु" इति रूपः । अनेनैवेशो स्मर्यते । ईशनामग्रहणं बीजेन मूलेन च क्रियते । ईशस्यैव नाम सत्यमित्यप्यस्ति । नानकः सत् इत्यपि कथयति । सत्यनामविहाय नामान्तिराणि "किरतम" इति कथ्यते । स एव स्रष्टा कर्ता वा । अयं पुरुषः, साहिब, इति मालिक इति वा । विश्वासः सर्वाधिकं महत्त्वपूर्णं वस्तु सिखधर्मोस्ति । गुरौ ग्रन्थे च विश्वास इति । गुरुविषये तु प्रागेव भूमिकायां चर्चा कृतास्ति ।

नाम (practice of remembrance) शब्दस्य महत्त्वं सिखधर्मे स्वयं नानकेन प्रतिपादितमस्ति । "यद्यहं नाम स्मरामि तदाहं जीवामि" । सुखमणिनाम्नो ग्रन्थस्य प्रारम्भे नाम्नो महत्वं प्रदर्शितमस्ति । अतएव गुरुणा प्रदर्शितो मार्गो

(I) Mantra occurs in two forms. One form is regulur prayer in word. In this respect many hymns of the Adi Granth may be called mantras or is mula mantra or Significant. mantra. The other form of mantra is the combination of syllables or bija mantra. word of the Guru or the name of the Lord. The Syllables of bija mantra is a Vahu Guru are the sound bodies of Brahman."

—Ontlines of sikh thought
(Surinder Singh kohli)

नाममार्गः सहजयोगो वा कथ्यते। नामेदं सदैव स्मरणीयम्। तदिदमत्र 'लिवजपेन' क्रियते। यदि कश्चित् बीजमन्त्रस्य[1] "वाहगुरु" इति मन्त्रस्य जपं करोति। एतेन जपेन ध्यानं करोति जनस्तदा [2]अजपाजपेनामृतमश्नाति।

सृष्टिक्रमस्य विचारः

१. इस्लाममते—ईश्वरः 'कुम्' इत्यब्रवीत् येन सृष्टिः संजाता।
२. 'वाइबिल्' इत्यनुसारं स्रष्टा ईश्वर एव।
३. चार्वाकमते पदार्थाः स्वत एव सृष्टिं निर्मान्ति।
४. बुद्धमते—अनाध्यात्मिका सृष्टिः।
५. जैनमते—दिक्कालादयः सृजन्ति विश्वम्।
६. सांख्यमते—प्रकृतिपुरुषसंयोगेन सृष्टिः।
७. योगमते—अविद्यया ईश्वरेण प्रकृतिपुरुषयोः सम्बन्धः स्थाप्यते।
८. न्यायवैशेषिकमते—आरम्भवादः।
९. पूर्वमीमांसामते—कर्मवादः।
१०. शङ्करमते—ईश्वरो मायाशक्त्याऽसृजत् विश्वम्।
११. आदिग्रन्थानुसारम् ईश्वर एव पुरुषं प्रकृतिं च निर्ममौ। त्रयाणामपि सत्त्वरजस्तमसां गुणानामयमेव कर्ता। पुरुषोऽयं पुरुषेभ्यो (जीवेभ्यो) विभिन्नः। पुरुषइवायं पुरुपः आदिपुरुषः सत्पुरुषः, कर्तापुरुषः, अकालपुरुषः निरंजनपुरुषो वा यत्र मायायाः प्रभावो न वर्तते।

---

1. "Wah guru" means, Haill the holy light, dispeller of darkness.

2. "Ajapa Japa" means constant repetition of God's name.

—The quint essence of Sikhism.

Zoroastrian theology divides God into parts viz Ahur mazdah and Ahriman.

Crist proclaeins himself as the son of God. Adi Granth recogniess the fatherhood of God like Islam. But God of Islam is personal, Adi Granths sings Impersonl.

—A criticl stdy of Adi Grnth.
—Dr. Surinder Singh Kohli.

आदिग्रन्थानुसारं माया एव प्रकृतिः न तत्रास्ति भेदः। नानकानुसारं माया जीवं पुरुषात् पृथक्करोति। तदा जीवः संसारं नश्वरं मन्यते। मायया प्रभावितः पुरुषः विकारवर्ती भवति सगुणो भवति। मायारहितः पुरुषस्त्रिगुणातीतो निर्गुणो भवति। मतमिदमादिग्रन्थे वर्णितमस्ति।

गुरुनानकः

गुरुनानकस्य जीवनस्य विषये यत्किमपि नानकचन्द्रोदये प्रतिपादितमस्ति तत्तु प्रागेव भूमिकायां लिखितमस्ति। अत्र तु केवलं तदेव लिख्यते यद्गुरुग्रन्थसाहिवादन्यस्माद्वा ग्रन्थादाकलितमस्ति।

गुरुनानकदेवस्य जन्म सं० १५२६ शताब्द्यां वैशाखशुक्लपक्षस्य तृतीयायां तिथौ तलवंडीनामकग्रामे जातम्। परन्त्वस्य जन्मदिनं कार्तिकपूर्णिमायां मत्वोत्सवं कुर्वन्ति शिष्याः। अस्य पिता कालूचन्दः तस्मिन्नेव ग्रामे लेखपाल आसीत्। मातुर्नाम तृप्ता इत्यासीत्। नानकस्य जीवनवृत्तं "[1]जनमसाखी" नामके ग्रन्थे विस्तारेण लिखितमस्ति। संस्कृतं पारसीकं पठित्वा पित्रोः कृते बालः विरक्त इव जातः। सुलक्षण्या सह विवाहं कृत्वा लक्ष्मीचन्द्रश्रीचन्द्रनामकौ पुत्रौ दृष्ट्वा संसारात् विरक्तो जातः। स्वग्रामे एव एकस्य वृक्षस्याधः उपविश्याध्यात्मिकं चिन्तनं कृतवान्। यात्रां कृतवान्। अन्ते करतारपुरे निवशन् लोके भक्तिभावनायाः प्रचारं कृतवान्। अस्य रचनाः—

१. जपुजीसाहब—३८ छन्दांसि = शिष्याः प्रातः पठन्ति।

२. आसादीवार—इदमपि छन्दः प्रातः काले पठ्यते शिष्यैः।

३. गगन में थाल—इत्यनेनारार्ति कुर्वन्ति।

४. सोदरु—संध्या समये पठ्यते।

५. रहिरास—भोजनसमये पठ्यते।

६. सोहिला—शयनसमये पठ्यते।

एतानि छन्दांसि ग्रन्थसाहिवे संगृहीतानि सन्ति।

---

१. जनमसाखिपदवाच्याःबहवो ग्रन्थाः सन्ति ये लिखिताः बहुभिः पण्डितैः रभूवन्।

१. यस्य वृक्षस्याधः स उपविष्टः स "बम्बासाहिब" इति कथ्यते। अधुनापि स सुरक्षितोऽस्ति।

अन्ते रावी (इरावती) नद्याः तटे जपुजीसाहिबस्य [२]पाठं कुर्वम् 'वाहगुरु' इति कथयन् दिवं गतः। सं० १५९५ (सन् १५३८) करतारपुरे ६९ वर्षस्य१० मास-१० मे दिने आश्विनशुक्लदशम्यां तस्य स्वर्गवासो जातः।

—:०:—

कानिचित् नानकवचनानि

१. नाँय मानिए पत उपजइ साल हि सच सूत।
दरगे अन्दर पारये, तग न टूटस पूश॥
—आसादीवार।

२. साचा साहिबु साचु नाई नाखिया नाउ अपारु।

३. नानक निरगुणि गुणकरे गुणवंतिया गुणदे।
तेहा कोई न सुज्झई जितिसु गुण करे॥

४. हरि विनु किउर हिये दुख व्यापै।
जिह्वा साहु न फीकी रस विनु॥
विनु प्रभु काल सतापै।

५. एको सरवस कमल अनूप।
सदा विगासे परमल रूप॥
ऊजल मोती चूगहिं हंस।
सख कला जगदीशे अंश॥

६. करमी आपे आपणी के नड़ै कैदूरि
जिनी नामु धियाइया गए मसक्कति थालि
नानक के मुख ऊजले केति छुटी नलि
—जपुजी सादेव अंतिम (श्लोक),

७. गगन में थालु रविचन्दु दीपक बनै
तारिका मंडल जनक मोती
धूप मल आनल लौपवणु चौरा करै
सगल बनराइ फलतं जोती
गु० मु० सा—मद्ला--१.

—०—

२. यत्र दिवंगतो नानकस्तस्य स्थानस्य नाम "डेरानानक" इति जातम्।

मध्यकालीनधर्मसुधारकेषु नानकः

सिखधर्मस्य द्वौ स्तः पक्षौ व्यवहारिकः सैद्धान्तिकश्च व्यवहारिकः धर्मसंस्थापकः धार्मिकसंदेशं देशस्य सामाजकी ऐतिहासिकी च परिस्थितिं ज्ञात्वा तदनुकूलं ददाति शिष्येभ्यः। नानकेनैतदेवाकारि। नानकः स्वमाराध्यं प्रार्थयति—

"खुरासान खसमाना कीआ
हिन्दु सतानु डराइया"

नानकप्रतिपादितो धर्मः प्रवृत्तिमूलकः। अत्राधोलिखतानि तत्त्वानि सन्ति।

१. पाखण्डमतखण्डनम्
२. सामाजिककुरीतेः खण्डनम्
३. अस्येष्टदेवोऽजन्मा स्वयम्भूः
४. बाह्याडम्बरत्यागः।
५. आशाविश्वासपौरुषाणां वर्धनम्।
६. आर्यम्लेच्छयोरैक्यम्।
७. प्रायेण सर्वधर्मसमन्वयः स्थूलरूपेण।

—:०:—

सैद्धान्तिकः पक्षः

नानकेन परमात्मनः साक्षात्कारः कृतस्तथा प्रत्यक्षानुभवः प्राप्तः महम्मद इव पैगम्बर इव। अनेनावतारवादस्य खण्डनमकारि एकेश्वरवादे विश्वासः। सृष्टिः परमात्मना विहिता। माया परमात्मनोऽधीना। अहङ्कारस्य द्वैतवादस्य च विचित्रं चित्रणं खण्डनं चास्त्यत्र। अहङ्कारस्य मनसा सम्बन्धः। गुरुणा निरूपितः कर्मणो योगमार्गो ज्ञानमार्गश्च भक्तेरधीनः। भक्तेर्महिमा विशिष्टः। परमात्मा सृष्टिः, अहङ्कारः, माया, जीवो, मनुष्यः, आत्मा गुरुः, जपः, शब्दः, नामस्मरणम् अस्य तत्त्वानि।

---

i एतीमार पई करलाणें तैं की हरहुन आइया

—महला

ii जो सकता सकते कहु मारे
तामनि रोष न होई

—महला—१

iii जागहु जोति न पुछहु जाती
आगे जाति न है ॥

इतरे नवगुरः

गुरुरङ्गददेवः=सं० १५०४ तः १५५२ यावत् । अस्य प्रथमं नाम लहना इत्यासीत् । ज्वालादेव्याः अयमुपासक आसीत् । अयं नानकस्य शिष्यो जातः नानकोऽङ्गदं सं० १५३९ वर्षे करतारपुरेऽभिषिषेच । अङ्गदः गुरुमुखीलिपिं, लंगरनाम्नीं प्रथां च प्रारब्धवान् ।

गुरुः अमरदासः—सं० १४७६-१५७४ यावत् । अङ्गदस्य शिष्यः अकबरेणायं बहुमन्यत ।

गुरुः रामदासः=सं० १४३४-१५८१ यावत् । अमरदासस्य शिष्यः ।

गुरुः अर्जुनदेवः—सं० १५६३-१६०६ यावत् । रामदासस्य तृतीयः पुत्रः । एतेव ग्रन्थसाहिबस्य संकलनमकारि ।

गुरुः हररायः—सं० १६३०-१६६१ यावत् ।

गुरुः हरकृष्णः—सं० १६५६-१६४ यावत् ।

गुरुः तेगबहादुरः—सं० १६२१-१६०५ ।

गुरुः गोविन्दसिंहः=सं० १६६६-१७०८ यावत् । एतेन शिष्येभ्यः सामूहिकोपासनायाः विधिः प्रचालितः । अमृतपानस्य महत्त्वं प्रतिपाद्योऽयं बाह्यैक्यार्थं (कंघी, कच्छ, केश, कड़ा, कृपाण) शिष्येभ्यः प्रादात् ।

—:०:—

हिमालये मणिशैले नानकेन सह गोरक्षशिष्याणां विचाराः

हिमालये (मणिशैले) महाकाव्येऽत्र दशमे एकादशे द्वादशे च प्रस्तावे गोरक्षेण तच्छिष्यैश्च सह नानकस्य शास्त्रार्थविषये विचाराः समक्षमागच्छन्ति । तथाहि—आगच्छन्तं नानकं दर्शं दर्शं गोरक्षस्तं निवर्तयितुं सिद्धान् जगाद ।

अतस्तत्रतः (मणिशैलात्) सर्वप्रथमं मत्स्येन्द्रः समागतः ।
१. १० मे प्रस्तावे ७९ श्लोकतः १२५ यावत् मत्स्येन्द्रस्य नानकेन सह योगविषये योगवपुर्निर्माणविषये च विचारः ।
२. ११ शे प्रस्तावेः—

क. भर्तृहरिनानकसम्वादः २ श्लोकतः २३ यावत्, २८ तः ४५ तथा ७७ तः ८९ यावत् विविधविषये विचारः ।

ख. ४६ श्लोकतः ५६ यावत् कनीफा सह नानकस्य "कथमीश्वरः ? केन कथं वा लभ्यते" इत्यादिविषये विचारः ।

ग. ५८ श्लोकतः ६५ यावत् हनीफा सह विचारः ।
घ. ६६ " ७५ " गोपीचन्द्रेण सह विचारः ।
ङ. ९० " १०४ " भूतवा सह चार्वाकमते विचारः ।
च. १०६ " १२० " लहुरीया सह बौद्धमते विचारः ।
छ. १२३ " १२६ " कङ्करेण सह भक्तिविषये विचारः ।

३. १२ शे प्रस्तावे:—

ज. २ श्लोकतः २० यावत् सङ्करेण विचारः ।
झ. ३० " ४० " मङ्गलनाथेन विचारः ।
ञ. ४३ " ५९ " शम्भुनाथेन प्राभाकरमते विचारः ।
ट. १३० " १३८ " कंथरिणा सह ।
ठ. १२९ " १४६ " उर्मनाथेन विचारः ।
ड. १५२ " १७० " धगरेण विचारः
ढ. १८० " १८३ " प्राणनाथेन विचारः ।

ण. अन्ते ११७ तः १२९ तथा १५६ तः १७७. यावत् गौरक्षेण सह विचारः ।

विचारसारस्तु:—

"विवादस्तत्त्वबोधाय न विरोधाये" ति ।

तदनु द्वादशे प्रस्तावे ९ नाथानां नामानि । तथाहि—गोरक्षनाथः मत्स्येन्द्रनाथः, मङ्गलनाथः चर्पटनाथः, घुग्घुनाथः, प्राणनाथः, गोपीनाथः, चम्बानाथः सुरतिनाथश्च ।

ततः षड् यतीनां नामानि । तथाहि:—

गोरक्षः, दत्त आत्रेयः हनुमान्, भैरवः, लक्ष्मणः भीष्मवर्मा च ।
अथ च १९३।१२ तः २०७।१२ यावत् ८४ सिद्धानां नामानि सन्ति ।

एतदतिरिक्तं प्रस्तावेऽस्मिन् अर्थात् ७४।१२ तः ७६।१२ यावत् शीधुचषकस्य निर्माणवर्णनं वैशिष्ट्यवर्णनं च । तथाहि ।

"द्राक्षादि संधाय निधाय यंत्रे
विधाय तापं कलयेद् यमर्कम् ।
स एष सद्भिर्विधिना निपीतः
सिद्धीरनेका निदधाति पाणौ"

तदनु भैरवीचक्रचर्चा ३८।१२ श्लोके । इत्थं चषकं निपीय भैरवीचक्रे गत्वा ऽखण्डनन्दमातनोति नाथः ।

"यत्रास्ति भोगो न च तत्र मोक्षः
यत्रास्ति मोक्षो न च तत्र भोगः ।
श्री सुन्दरीसेवनतत्पराणां
भोगश्च मोक्षश्च करस्थ एव ॥"

--:o:--

योगस्य वपुषो वर्णनम्

१. ऋतौः सङ्गमे गर्भाशये रेतः शोणितयोर्व्यतिकरः ।
ततः पूर्वमासे क्लेदमात्रं भूतचैतन्ययुक्तम् ।
द्वितीये मासे बुद्बुद्त्वम् ।
ततः शौनकमते पूर्वं मूर्धा
मार्कण्डेयमते पूर्वं पाणिपादौ
पाराशरमते पूर्वं नाभिः
कृतवीर्यमते पूर्वं हृदयम्
गौतममते पूर्वं कोष्ठम्
धन्वन्तरिमते युगपत् सर्वं सूक्ष्ममुदेति ।
२. ततः ज्ञानेन्द्रियं जीवयति
ततो वृद्धिं व्रजति
तत आहार योगः
ततो लाघवादिकानाकाशादिगुणानादत्ते ।
तृतीये मासे सर्वाणीन्द्रियाणि ।
चतुर्थे मासे स्पन्दनम् अङ्गानां स्थैर्यं च ।
पञ्चमे मासे लोहितः
षष्ठे मासे बलस्य वर्णस्य नखानां लोम्नां च सम्भवः
सप्तमे मासे नाडीस्नयुशिरायुतः ।
तत्रैव चैतन्ययोगः ।
अष्टमे मासेस्मृतिस्ततस्त्वङ्मांसः ।
तत ओजो हृन्निलयं प्रधावति
इत्थं ततः षाट्कौशिकं वपुः ॥
लोमलोहितमांसानि इति त्रीणि मातुः

---

१. रागेणातिरजोगुणत्थजनुषा स्त्रीपुंसयोः संगमे
रेतः शोणितयोऋतौ व्यतिकरो गर्भाशये जायते ।

२. अग्नीषोमाववनिपवनौ व्योमसत्वादयश्च
गर्भं ज्ञानेन्द्रियगणयुता जीवयन्त्यात्मयुक्ताः
अन्तर्वल्या रसवहशिरा नाभिनाड्यां शिरोयंत्
लग्ना वृद्धिं व्रजति तदसौ तावदाहारयोगात् ॥

स्नायुअस्थिमज्जानः इति त्रीणि पितुः
इति ३ + ३ = ६ षाट्कौशिकं वपुः ।
ततो नवमे दशमे वा मासे शिशुरूपे बहिरेति बालः ।
यः काश्चित्सप्तमेऽष्टमे वा मासे बहिरेति स स्वकर्मनिन्द्यः ।
ततो बहिरागत्य विगतस्मृतिः सन् रोरुद्यते शिशुः ।
तत्र शरीरेः—
सप्त कला आशया धातवस्तन्मला उपधातुत्वचश्च ।
त्रयो दोषाः ।
नव स्नायवः ।
शतानि द्विशत्यादयः सन्धयः ।
३६० अस्थीनि ।
७०० शिराः ।
दशोर्ध्वं दशार्धश्चतस्रः तिर्यक् रसप्रापिका धमन्यः ।
षोडस कण्डराः (याः प्रसारम् आकुञ्चनं च सृजन्ति)
पञ्चशतं मांसपेश्यः ।
३ अंत्राणि स्त्रीणाम् ।
३ कोष्ठ्यः ।
७०० शिरांसि ।
७२००० नाडयः तासां श्रेष्ठा वायुवहा दश तिस्रः ।
१० छिद्राणि वपुषि पुरुषाणाम्
१३ छिद्राणि वपुषि स्त्रीणाम्
३ १|२ अंत्राणि पुरुषस्य ❀
तत्र
अधोमुखं पङ्कजवद्धृदयं मनीषास्थानम्
ततः प्लीहा ।
तदधो वामे लोहितवाहिनीनां शिराणां मूलम् ।
तदधो वामे शोणितफेनजन्मा फुफ्फुसः ।
हृदोध दक्षिणे यकृत् ।
ततः पित्तसद्म ।
ततः कुक्षिस्थितो बुक्कः ।
ततो नाभिः ।
नाभौ सोमस्य मण्डलम् तन्मध्यगं रविमण्डलम् ।
ततः स्थविष्ठे वपुषि यववदग्निः ।

ततो वायवः ।

१० वायवः प्राणोपानसमानश्चोदानो व्यानाः नागः कूर्मः कृकरो देवदत्तो धनञ्ज

ततस्तिसृणां वायुवहानां नाडीणां मध्ये कासांचिद्वर्णनम्

वामे इडा ।

दक्षिणे पिङ्गला ।

मध्यदेशे सुषुम्णा ।

वामवक्षसि गान्धारी

दक्षिणेऽक्ष्णि हस्तिजिह्वा ।

दक्षिणकर्णे यशस्विनी ।

वदने अलम्बुषा ।

लिङ्गदेशे कुंहः ।

मूलस्थाने शंखिनी ।

१. ऋतौ स्त्रीपुंसयोः संगमे गर्भाशये रेतः शोणितयोर्व्यतिकरः ।

ततः पूर्वे मासे क्लेदमात्रं भूतचैतन्ययुक्तम् ।

इडायां तु स्थितश्चन्द्रः पिङ्गलायां तु भास्करः ।
सुषुम्णायां स्थितः शम्भुः शम्भोर्हंसस्वरूपता ॥

तत्र चन्द्रं रात्रौ वारयेत् दिवाकरं दिवा वारयेत् । अत्र नृणां स्वा श्वासप्रश्वासयोर्गतिः इत्थं नाडीणां वायोश्च स्थितिं व्यवहारं कार्यं च जनो योगाभ्यासरतो भवेत् । अनेन प्रकारेण योगाभ्यासं कुम्भकं च कुर्वन् यायात् योगम् । एतेन योगेन आत्मा 'सोऽहं' इत्युदीरयति तत ओंकार आवि ततः षट् चक्राणि भित्वा योगी स्वस्य आत्मप्रकाशं लभते । इत्थं जायते आत्मा प्रकाशः । तेन ज्ञानं ज्ञानान्मुक्तिरिति ॥

—:०:—

---

१. कुम्भकेन सुषुम्णाया मध्ये महति मारुते
प्राणोन्मूला समुत्थाय प्राप्येडां पिङ्गलां रविः
नासिकाभ्यां बहिर्गत्वा लीयते द्वादशाङ्गुले
अष्टाङ्गुलाद् विशन्नन्तर्नाडीभ्यां सोमरूपकः
मलमूत्रमरुच्छक्राण्यपानः स बहिः क्षिपेत् ॥ —ना०

२. ततो नाडीं सुषुम्णामाश्रितः
अग्नी शोभमय उदानः
आब्रह्मरन्ध्रं याति तत आत्मा 'सोऽहं' उदीरयति ।
तत ओंकार आविर्भंति
ततः षट् चक्राणि भित्वा योगी
आत्मप्रकाशं लभते ॥

भूगोलखगोलवर्णनं महाकाव्येऽत्र

नानको यदा वैकुण्ठादागतवान्तदा स मर्दनं भूगोलस्य वर्णनं श्रावयामास इदं १४ प्रस्तावस्य १४ श्लोकादारभ्य प्रस्तावान्तं यावद् वर्तते। खगोलस्य च वर्णनं कृतवानस्ति। सर्वमिदं विश्वं भगवतो वपुषि स्थिरं चित्तं सूक्ष्ममपि वस्तु ग्रहीतुं तथैव सहते यथा स्थूले शरव्ये धन्वीषु स्थिरकरः सायकेन सूक्ष्ममपि विध्यति। तदिदं सकलं विश्वमित्थं दृष्टिपथमागतं नानकस्य।

सर्वप्रथमं लक्षयोजनविस्तारो वर्तुलो जम्बूद्वीपो नयनपथमागतः। तत्र सन्ति नव वर्षाणि। तदन्तरिलावृतं धरातलम्। तत्र वर्तते कनकगिरिः यो ९६००० यो० महीं प्रविष्टः १२००० यो० उपरि प्रभूतः। इलावृतस्योत्तरे नीलपर्वतः। स च ८७ यो० बहिःस्थितः। तदन्तः सन्ति श्वेतगिरिः, शृङ्गवान्पर्वतः, कुरुवर्षश्च। इमे त्रयः क्षीरोदाब्धयः १०००० यो० तुंगाः २००० विस्तृताश्च। ततो वर्तते मेरुः ततो मन्दरः। तत्र सन्ति वनानि चैत्ररथं, नन्दनं वैभ्राजः सर्वतोभद्रः। माकन्दः, चूतः जम्बू, कदम्बः, न्यग्रोधश्च फलतरवः सन्ति।

इलावृतात्पश्चात् पञ्च मधुनो धारा वहन्ति। मेरौ नव पुराणि सन्ति–मनोवती, अमरावती तेजोवती, संयमनी, कृशाङ्गना, श्रद्धावती, गन्धवती, महोदया, यशोवती च। मेरुस्थायाः जाह्नव्या गतिश्चतुर्धा। सीता गन्धमादनं गच्छति, भद्रा क्षीरसागरं गच्छति महाजवा माल्यवन्तं गच्छति केतुमाला च पश्चिमसागरं गच्छति। तत्र सन्ति क्रमेण हयग्रीवो हनूमान् कलिनरसिंहश्च देवाः। जम्बूद्वीपे अष्टौ उपद्वीपाः सन्ति। स्वर्णप्रास्थः, स्वमुक्तस्थः, आवर्तनः, रमणः, कौकः, पाञ्चजन्यकः सिंहलः, लङ्का च।

ततो जम्बूद्वीपाद्द्विगुणः प्लक्षद्वीपः तत्र तनूनपात् सप्तजिह्वो देवः। तत्र शिवादयो वर्षाणि, मणिकूटादयो गिरयः।

ततः शाल्मलीद्वीपः, क्रौञ्चद्वीपः शाकद्वीपः, दधिद्वीपः, पुष्करद्वीपश्च। तत्र वर्तते लोकालोको पर्वतः। सूर्यकिरणं लोकालोकं पर्वतं नातिक्रमते।

पृथिव्यां पक्षिणः शतयोजनमुत्तुङ्गं यान्ति, तदूर्ध्वं मेघाः, ततोऽनिलः, तदूर्ध्वमन्तरिक्षम्। तत्र सन्ति भूतादयः। ततोऽयुतयोजनमुत्तुङ्गे सिद्धाः सन्ति, ततो राहुः ततः पिशाचः, ततो गुह्यकः, ततो गन्धर्वः, ततो विद्याधरः, ततोऽप्सरसः, ततो रविभुवर्लोके। निशाकरोस्ति लक्षयोजनमुपरि, लक्षत्रये नक्षत्राणि, द्विलक्षमुपरि उशना

ततो बुधः, ततः कुजः, ततो गुरुः, ततः सूर्यः, तत एकादशलक्षोर्धे सप्तर्षिः, ततस्त्रयोदशलक्ष्यादूर्ध्वं ध्रुवः। आदित्यादाध्रुवं स्वर्लोकः। भूलोकाधः, अतलं, वितलं, सुतलं, तलातलं, धरातलं, महातलं, रसातलं, पातालञ्च। तत्रैव अतले बलेर्मुखात् तिस्रः स्त्रियः समागतवत्यः, कामिनी, स्वैरिणी, पुंश्चली च। वितले हाटकेश्वरः, सुतले बलिः, तलातले मयः, महातले काद्रवेयः, रसातले दैतेयः, पाताले बलिः, ततोधः शेषः। भुवोधस्तात् जलादुपरि नरकाः। ते सन्ति मुख्यतः २८ रूपाः—तामिस्रः, अन्धतामिस्रः, भैरवः, कुम्भीपाकादयः।

ततः पश्चाद् नरकयातनावर्णनथम च तदनु स्वर्गस्य स्वर्गफलस्य च वर्णनमस्ति।

—:०:—

महाकाव्ये सुभाषितानि

१. अन्तेवासिन्युपाध्यायः प्रजावत्यां च नन्दिनी ।
निसर्गेणैव वहतश्चण्डिमानमकारणम् ॥
—८।६

२. प्रयाति मार्गेण सता सदश्वे
कशानिपातोऽतितरां प्रसह्यः ॥
—६।६

३. सन्तः पुराणेन पथाचरन्ति ॥
—६।१७

४. जानन्ति सन्तो वनिता लतेव ।
विनावलम्बं कथमेव तिष्ठेत् ॥
—६।१८

५. लतां य आरोपयते सयत्नं
फलावधिप्रौढ़तरं करोति ॥
—६।२२

६. त्वं गान्धारगतो नियोजितमनाः
क्रीणासि भो घोटकान् ॥
—६।९९

७. सदागतिं शक्यति को निरोद्धुम् ॥
—१०।४

८. जालस्थमीनास्तरलीभवन्ति ॥
—११।१०३

९. विवादस्तत्त्वबोधाय न विरोधाय योगिनाम् ॥
—१२।६२

१०. सर्वास्ववस्थासु दया न दुष्टा ॥
—१७।६२

११. बालेन निह्नूय हृते पदार्थे ।
पित्रोः प्रकोपो भवति प्रभूतः ॥
—१८।९५

१२. समाजे खलु विरूयानां
नासिकावान्न हस्यते ॥
—१८।११३

१३. ते भेदभाज उदिता गुणतारतम्यात् ।
बोद्धापि तद् व्यवहरत्यबुधेन तुल्यम् ॥
—१८।११४

१४. भवन्ति शास्त्रे स्वत एव विग्रहाः ॥
—१८।२०

१५. पात्रेण येन केनापि पयः पानं हि तृप्तिदम् ॥
—१४।६७

१६. महतामनुकम्पया महत्त्वं
नितरां फल्गुरपि प्रपद्यते हि ॥
—१६।१७

१७. विरक्तभाजः सम्भावनीयाः खलु सर्वथैव ॥
—१७।१७

१८. वसुप्रिया विदधति किं न पातकम् ॥
—२०।४

१९. मन्यन्ते गौरवं कस्य
प्रभुत्वमदमोहिताः ॥
—२०।४४

२०. कियद्दिनं किन्नु भुवि प्रभुत्वम् ॥
—११।६

२१. द्विजोन्त्यजो वा यवनो विजित्य
मनो जगन्नश्वरमेव बुध्या ।
जानाति यः प्रेमपरं तमीशं
स वै महात्मा स च वन्दनीयः ॥
—१०।३६

२२. स्वान्ते कठोरे मदमत्सराद्यै
र्न रोहति ज्ञानसुपर्वशाखी ॥
—१०।३५

२३. पक्षी स्वगत्या च पशुः स्वगत्या
नरः स्वगत्या च सरः प्रपद्य ।
तोयं पिबेत्तृप्तिमपि प्रयाया-
न्नागच्छतः कस्यचिदस्ति तृप्तिः ॥
—१८।१३०

—:०:—

प्रकृतिवर्णनम्

यथा सर्वत्र महाकाव्ये प्रकृतिवर्णनं दृश्यते तथैवात्रापि सरससरसं प्रकृतिवर्णनं समक्षमायाति। प्रकृतिपदस्य सामान्यो विशिष्टश्च चार्थं भवति। सामान्याप्रकृतिस्तु पृथिव्यप्तेजोवाय्वाकाशकादिगात्मरूपा या सर्वत्रैव दृष्टिपथमवतरति। विशिष्टा प्रकृतिस्तु तस्या भिन्ना। साहित्यशास्त्रे प्रकृति पदेन संसारे दृश्यमानस्य वस्तुनः स्वाभाविकरूपमेव गृह्यते। इत्थमत्र महाकाव्ये वस्तुनः स्वाभाविकरूपस्य वर्णनं तरलतरलं लोचनपथमञ्चति।

प्रथमप्रस्तावस्य २० श्लोकात् २९ श्लोकं यावत् पुनरेकोनविंशतितमे प्रस्तावे चास्माकं नयनपथमञ्चति प्रकृतिः। तत्र क्वचित् मनोहारिवनं, समुन्नतस्कन्धो वृक्षः, फलोल्लसन्तरुः, आम्रः, आतकाम्रः, पनसः, लकुचः, कदम्बः, अशोकः, तालः, तमालः शालः, निम्बः, प्लक्षः, आमलकः, पिप्पलो, जम्बुः, वट आदयः फलवृक्षाः समक्षमायान्ति, अन्यत्र मल्लिका, चंपकः, कुन्दः, विल्वः, वृन्दा, जपा, नकुलः, सरम्भआदयः पुष्पवृक्षाः, मन्दसगन्धवाताः दृश्यन्ते, इतरत्र कपोतः, खंजनः, कोकिलः, शुकः, बर्हि, नीलकण्ठः, चञ्चरीकः, तमालः स्वस्थक्रीडामग्नाः दृश्यन्ते, अस्त्यत्र मृगः, खड्गः, गजः, सिंहः, शशः, क्रोडः, मर्कटः, महिषश्च वन्या इतस्ततो भ्रमन्ति।

कर्हिचित् अखिलजीवसुखप्रदैका स्वच्छोल्लसत्सुरभिपुष्पयुता गभीरा ऐरावती विमलवारितरंगतीरा भागीरथी दृष्टिपथमवतरति।

तत्रैव वने क्वचित् विनिर्धूततमोमलाः प्रबुद्धतत्त्वा मुनयस्तपस्यन्तः समवलोक्यन्ते।

कदाचित्तद्वनं विशिष्टं स्थलमिव निर्द्वन्द्वं निर्वेदं च समक्षमागच्छदतितरामानन्दमाददाति।

यत्र—

एवं पाययति स्तनं स्वतनयं व्याघ्री कुरङ्गी शिशून्।
अन्यं विभ्रति वभ्रुषु प्रतिदिनं प्रीतिं परां मूषिकाः॥
यस्मिन् नृत्यति बर्हिणोऽहि निवहो निःसंभ्रमं वीक्षते।
क्रीडन्तः करिणांगणेषु कुतुकं कुर्वन्ति कण्ठीरवाः॥

पुनरेकोनविंशतितमे प्रस्तावे जलाल पारे समुद्रं गत्वा झंझावाते नावं निमज्जन्तं पश्यति। अनायासेन स्वयमागतं भोज्यपदार्थं पश्यति प्रकृतेश्चापूर्वां छटां च पश्यन्नतितरामानन्दमनुभवतीति वर्ततेऽत्र महाकाव्ये प्रकृते सचित्रं सजीवं ललितललितं च वर्णनम्॥

महाकाव्येऽत्र रसः

महाकाव्येऽत्र कश्च रसोऽङ्गीभूतः के च त अङ्गभूता इति विचारात्पूर्वं तावदत्र रसस्वरूपं तल्लक्षणोदाहरणानि च प्रस्तूयन्ते। सचासौ रसो मम्मटानुसारं यथा—

कारणान्यथकार्याणि सहकारीणि यानि च।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥
विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः।
व्यक्तः स तैर्विभावाद्यैः स्थायीभावो रसः स्मृतः॥ इति

भरतेन तु "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः इत्युक्तम्"॥ अयमसौ रसोऽत्र चतुर्धा व्याख्यातः। तत्र सर्वप्रथमं –

भट्टलोल्लटस्य निर्गलितोऽर्थः। यथा असत्यपि सर्पे सर्पतयावलोकितात् दाम्नोऽपि भीतिरुदेति तथा सीताविषयिणी अनुरागरूपा रामरतिरविद्यमानापि नर्तके नाट्यनैपुण्येन तस्मिन् स्थितेव प्रतीयमाना सहृदयहृदये चमत्कारमर्पयन्त्येव रसपदवीमधिरोहतीति। श्रीशङ्कुकस्य निष्कर्षः। यथा कुज्झटिकाकुलिते देशेऽसतोऽपि धूमस्याभिमानात् धूमनियतस्य वह्नेरनुमानम्, तथा नटेनैव सुनिपुणं "ममैवेते विभावादयः" इति प्रकाशितैस्तत्रासद्भिरपि विभावादिभिस्तन्नियता रतिरनुमीयमानापि निजसौन्दर्यबलात्सामाजिकानामास्वाद्यमानतया चमत्कारमादधती रसतामेतीति रतेरनुमितिरेव रसनिष्पत्तिः।

भट्टनायकस्यैष सारः। शब्दस्याभिधारूपव्यापारवत् काव्यनाट्ययोस्तद्विलक्षणं भावकत्वभोजकत्वनामकं व्यापारद्वयमतिरिक्तमस्ति। काव्यार्थबोधोत्तरमेव तत्राद्येन भावकत्वव्यापारेण विभावादिरूपसीतादयो रामसम्बन्धिनी रतिश्च सीतात्वरामत्वसम्बन्धांशमपहाय सामान्यकामिनीत्वरतित्वादिनैवोपस्थाप्यते। अन्तेन भोजकत्व व्यापारेण तु, उक्तरीत्या साधारणीकृतविभावादिसहकृतेन सा रतिः सहृदयैरास्वाद्यते इति रतेरास्वाद एव रसनिष्पत्तिः।

अभिनवगुप्तपादस्य मतस्य स्थूलत इदं मर्म। रतिकारणादीनामनुभवादसकृदनुमिता रतिः संस्काररूपेण सहृदयहृदयमधिरोहति। अथ कियता कालेन सुनिपुणमनुष्ठितयोः,रामादिव्यक्तिविशेषसम्बन्धिरतिकारणविभावादिप्रतिपादकयोरपि काव्यनाट्ययोः पूर्वोक्तभावकत्वव्यापारेण रामसीतादिविशेषांशपरिहारेण रतिकारणसाधारणकामिनीत्वादिना प्रतीतैः विभावादिभिः सहृदयहृदयावस्थिता सा रतिर्व्यञ्जनया, अभिव्यक्ता सामाजिकानामास्वाद्यतामायातीति एतादृशास्वाद एव

रसनिष्पत्तिरिति। पूर्वमते असत्या अपि रतेरेवास्वादः। अत्रमते तु वासनया स्थिताया एवेत्यनयोर्भेदः।

—काव्यप्रकाश वामनटीका

इत्थं रसस्वरूपं निरूप्य सर्वेषां रसानां लक्षणानि नानकचन्द्रोदयनामक-महाकाव्यादुदाहरणानि च प्रस्तूयन्ते।
अत्र भरतः—

श्रृङ्गारस्य लक्षणम्

ऋतुमाल्यालङ्कारैः प्रियजनगान्धर्वसेवाभिः।
उपवनगमनविहारैः श्रृङ्गाररसः समुद्भवति॥

नानकचन्द्रोदयादुदाहरणम्

मलयजरससेकान्मालतीदामतश्च
वरतनुपरिरम्भस्तेन सम्भावितोऽभूत्।
सुखमपि मदिराक्ष्या वीक्ष्य तस्याः प्रियेण
न किमपि बहु मेने शारदः पूर्णचन्द्रः॥

—३ प्रस्ताव

अथवा

निशम्य कोलाहलमुल्लसन्मना
तडिच्छविः शैशवशेषशोभना
सरोजराजन्नयनाथ नानकी
गवाक्षनिक्षिप्तमुखी निरैक्षत॥

—२ प्रस्ताव

हासस्य लक्षणम्

विपरीतालङ्कारैर्विकृताचाराभिधानवेषैश्च।
विकृतैरर्थविशेषैर्हसतीति रसः स्मृतो हासः॥

नानकचन्द्रोदयादुदाहरणम्

"त्वं गान्धारगतो नियोजितमनाः
क्रीणासि भो घोटकान्"

करुणस्य लक्षणम्

इष्टजनस्य विनाशात् शापात् क्रोधाच्च बन्धनाद् व्यसनात्।
एतैरर्थविशेषैः करुणाख्यरसः समुद्भवति॥

नानकचन्द्रोदयादुदाहरणम्

योगीन्द्र नानक पितर्यदि सत्यशक्ति-
स्त्वं मे तदा भव मुहूर्तमुपेतजीवः ।
बालं हि तान्यननुशिष्य कुतः प्रयासि
निष्कारणा करुणता तव शोभते किम् ॥

—१९ प्रस्तावे

रौद्रस्य लक्षणम्

आयुधखड्गाभिभवाद्वैकृतभेदात् विदारणाच्चैव ।
संग्रामसम्भवादर्थादिभ्यः संजायते रौद्रः ॥

नानकचन्द्रोदयादुदाहरणम्

कोणैराहन्यमानाः प्रलयजलधरध्वानधीराश्च भेर्यः
पाणीन् वीरव्रजस्यत्सरुधृतिरभसोल्लासितश्चक्ररुग्रान् ।
धानुष्कैर्धुर्नितानां शरनिकरकिरां सर्वतः शिञ्जीनीनां
निःश्वासैः सैन्ययोः किं स ततनितदिशां कोपि शुश्राव किञ्चित् ॥

अथवा

पानीयप्रस्थ एव प्रथितपटुभटध्वाननिर्धूनिताद्रि ।
प्राग्युद्धक्रुद्धदन्तावलदलिततरुर्वाबरं प्रत्यगृह्णात् ॥

वीररसस्य लक्षणम्

उत्साहाध्यवसायादविषादित्वादविस्मयान्मोहात् ।
विविधादर्थविशेषाद्वीररसो नाम संभवति ॥

नानकचन्द्रोदयादुदाहरणम्

यवनीर्हर प्रसर धुन्वतीः प्रजा
धनिनश्च दण्डय पुराणि निर्दह ।
ललितांश्चकार विषयाननुक्षणं
परिधाविता सपदि मुद्गलावली ॥

अथवा

आयाहि प्रहर प्रतीच्छ जगतीं पश्याधुना नश्यसि
त्रस्यस्यत्र विकत्थनं तव वृथा त्वां रे करोमि द्विधा ।
उद्गूर्णासिकराः करालवदना रक्तारुणश्मश्रवो
जल्पन्तो भुवि भीरुभैरवभिदि छिन्ना निपेतुः क्षणात् ॥

भयानकस्य लक्षणम्

विकृततरसत्वदर्शनसंग्रामारण्यशून्यगृहगमनात् ।
गुरुनृपयोरपराधात्कृतकः स भयानको ज्ञेयः ॥

नानकचन्द्रोदयादुदाहरणम्

ज्वालां द्रष्टुमगादगाधजडता विध्वंसिनी देवताम्
आब्रह्मप्राणियपर्यन्तमखिलक्षितियत्प्रोतमेवेहतेत्र ।
श्रौतस्मार्तप्रसिद्धप्रवचनमनसां हर्षमुल्लासयन्ती
कालव्यालालिमाला कुपथगतधियां दृश्यते सा कराला ॥

वीभत्सस्य लक्षणम्

अनभिमतदर्शनेन च गन्धरसस्पर्शदोषैश्च ।
उद्व जकैश्च बहुभिर्वीभत्सरसः समुद्भवति ॥

नानकचन्द्रोदयादुदाहरणम्

भिन्नबाहुचरणाः क्षतो रसो
भिन्नकुक्षिगलितांत्रवल्लयः ।
देहिमे जलमिति प्रजल्पिते
वीक्षिता गलचलत्कुशाशवः ॥

अद्भुतस्य लक्षणम्

यस्त्वतिशयार्थयुक्तं वाक्यं शिल्पं च कर्मरूपं च ।
तत्सम्बद्धैरर्थै रसोद्भुतो नाम सम्भवति ॥

नानकचद्रोदयादुदाहरणम्

ज्वालां विलोकयितुकाम उपागतोऽहं
श्रुत्वा विरक्तवरमन्वसरं यतीन्द्रम् ।
पृष्टोऽभ्यधां यमिनमन्वयनामनी स्वे
शङ्काकलङ्कमथशोधितवान् गुरुर्मे ॥

—१ प्रस्ताव

शान्तरसस्य लक्षणम्

[१]निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः ।

नानकचन्द्रोदयादुदाहरणम्

त्रिसंध्यस्नानाद्रीस्तनुकनकतन्तुप्रतिभटो
जटाः शुभ्रां भूतिं धवलमुपवीतं च दधतम् ।
निषण्णं शार्दूलत्वचि हरिणकृत्या परिवृतं
दयादृष्ट्या दैन्यं सपदि शमयन्तं च जगताम् ॥

—:०:—

१. यत्तु अत्र वदन्ति शान्तरसस्य स्थायी निर्वेदो न युज्यते, तस्य निर्वेदस्य स्वस्मिन् स्वातिरिक्ते च हेयत्वज्ञानात्, देहावच्छिन्ने आत्मनि तुच्छत्वबुद्धित्वाच्च तथा च सुखरूपत्वाभावान्न तत्स्थायिकस्य रसत्वम् इति तत्तु चिन्त्यमेव विषयेषु (स्वस्मिन् स्वातिरिक्ते च) अलं प्रत्ययरूपस्य वा निर्वेदस्य शोकवत् समाधानात् । वस्तुतो रत्यादिकमुपजीव्य हर्षादेरिव तत्त्वज्ञानजनिर्वेदमुपजीव्य शमादिप्रवृत्तेः स एव स्थायी न शमः । अथ च तत्त्वज्ञानजन्यनिर्वेदस्यैव शमरूपत्वात् । न खलु ब्रह्मज्ञानजन्य निर्वेदस्य वैवर्ण्योच्छ्वासादिकार्यजनकता स्वप्नेऽपि संभवति ।

तदुक्तम्—स्थायी स्याद्विषयेष्वेव तत्त्वज्ञानाद्भवेद्यदि ।
इष्टानिष्टवियोगाप्तिकृतस्तु व्यभिचार्यसौ ॥

का० प्र० वामनी

भक्तिभावस्य लक्षणम्

रतिर्देवादि[1] विषया व्यभिचारी तथाञ्जितो भावः ।

नानकचन्द्रोदयादुदाहरणम्[2]

शरणं करुणाकरो हरिः
मम नान्यं कलयामि कंचन ।
गरुडध्वजतो गतिः परा
मम नास्त्येव समस्तजन्मसु ॥

अत्र महाकाव्ये शान्तो रसोऽङ्गी । शृङ्गाररौद्रवीराद्भुतयस्त्वङ्गभूता इति । गुरोर्नानकस्य जगदिन्द्रजालं पश्यतो जीवनदर्शनम् उदासिमतप्रवर्तनं च शान्तरसं प्रधानभूतमुपन्यस्यति । रसानां सर्वेषां तु प्रागेव प्रदत्तानि सन्ति तावल्लक्षणानि । अत्र केचिद्वदन्ति यदत्र भक्तिभाव एव प्रधानो, रसास्तु सर्व एवाङ्गभूता इति तन्न समीचीनम् यतोऽहि प्रारम्भतोऽवसानं यावत् भक्तिभावस्य चर्चा द्वयोरेव प्रस्तावयोः कृता वर्तते यत्र शान्तरसस्य सर्वेष्वेव प्रस्तावेषु महत्त्वं दृश्यते ।

—o—

१. आदिशब्दान्मुनिगुरुनृपपुत्रादिविषया । कान्ताविषयस्तु व्यक्ताः शृङ्गारः
—मम्मटः

२. अत्रोदाहरणं कुतः प्रस्तावानुद्धृतमिति अमुक्तम्णिकातो बोद्धव्यम् ।

महाकाव्येऽत्र गुणः

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।
उत्कर्षहेतवस्तेस्युरचलस्थितयो गुणाः ॥

इति मम्मटोक्तदिशा 'रसोत्कर्षकत्वे सति रसाव्यभिचारिस्थितित्वम्, अव्यभिचारेण रसोपकारकत्वं चेति लक्षणद्वयं फलितं गुणस्य । स चासौ गुणस्त्रिविधः ।

"माधुर्यौजः प्रसादाख्यास्त्रयस्ते न पुनर्दश"

इति मम्मटोक्तेः । तत्र माधुर्यं शृङ्गारे । द्रुतिहेतुत्वात् तथाचात्यन्तद्रुतिहेतुत्वात् करुणे विप्रलम्भे शान्ते च ।

ओजः वीररसे दीप्त्यात्मविस्तृतेर्हेतुत्वात् । तथा च वीभत्से रौद्रे च तस्यैवात्मविस्तारस्याधिक्यात् । प्रसान्दस्तु सर्वत्रैव विहितास्थितिः"समर्पकत्वं काव्यस्य यत्तु सर्वरसान् प्रति । स प्रसादो गुणो ज्ञेयः सर्वसाधारणप्रियः" इत्यानन्दवर्धनोक्तेः ।

महाकाव्येऽत्र मुख्यतः प्रसाद एव गुणः । शान्तरसस्य प्रधानान्माधुर्यमपि सदैव प्रसाद इव राजते । केवलं युद्धादिवर्णने पञ्चषा एव श्लोका ओजो गुणं विभ्रति ।

तत्र प्रसादस्योदाहरणं यथा :—

पुरोऽथ पान्थैः परितश्चलद्भिः
पद्भिः स्वयात्रिप्रवरैरनेकैः ।
अरण्यमन्यैर्विविधैर्युतं तत्
समुत्सुकान्तः करणैः स दृष्टवान् ॥
१९।१

अन्यदुदाहरणं यथा :—

निशम्य कोलाहलमुल्लसन्मना
तडिच्छविः शैशवशेषशोभना ।
सरोजराजन्नयनाऽथ नानकी
गवाक्षनिक्षिप्तमुखी निरैक्षत ।
१।२

—०—

रीतिरत्र काव्ये

आलङ्कारिकाणां मते वृत्तिः रीतिश्च पर्यायवाचकौ एव। तत्र अनुप्रासो हि द्विविधो भवति छेकगतः वृत्तिगतश्च। तत्र वृत्तिस्तावत् :—

(१) मधुरादिरसानुगुणनियतमसृणादिवर्णगतो रसविषयो व्यापारो व्यञ्जनाख्यः"
—प्रदीपे।

(२) "नियतरसविशेषव्यञ्जकत्वेन परिगणिता वर्णास्तद्गतस्तन्निष्ठो व्यापारः सहकारी, आनुपूर्वी विशेषः स एव वृत्तिः"

(३) "वृत्तिश्च माधुर्यादिव्यञ्जकसुकुमारादिवर्णगतत्वेन मधुरादिरसोपकारकः शब्दस्य संघटनाख्यो व्यापारविशेषः।"

एता उपनागरिका, परुषा कोमलाख्याश्च वृत्तयः वामनादीनां मते वैदर्भी गौड़ी पाञ्चाल्याख्या रीतयो मताः। इत्थमत्र माधुर्यव्यञ्जकवर्णैर्युक्ता पाञ्चाली ओजः प्रकाशकैर्वर्णैर्युक्ता गौडी शेषैः प्रसादवद्भिर्वर्णैर्युक्ता वैदर्भी।

नानकचन्द्रोदये वैदर्भीरीतेः प्राधान्यम्। गौणरूपेण तु अन्ये अपि द्वे लोचने पथमञ्चतः।

तत्र तावत् वैदर्भीरीतेरुदाहरणम् :—

"अधिगतः शिविकां स हिरण्मयीं
हरिदयालुरशोभत पण्डितः।
परिणये दशकन्धरविद्विषो
गुरुवशिष्ठ इवातिप्रतिष्ठितः।

—४६।५

अन्यच्चोदाहरणं यथा :—

प्रसाधिता पाणिरगात्सुकेशी
केशानसंस्कृत्य जनेन कापि।
आदर्शमन्या दधती करेण
गवाक्षमाक्षिप्य परां रुरोध"

—९६।५

—:०:—

अलङ्काराश्चात्र महाकाव्ये

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातु चित्।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ॥

एतेन मम्मटोक्तलक्षणेन अलङ्काराणां रसव्यभिचारिस्थितित्वं नियमेन रसोपकारकत्वाभावश्च।

तत्र शब्दालङ्काराः षट्। तथाहि :—

"वक्रोक्तिरप्यनुप्रासो यमकं श्लेषचित्रके
पुनरुक्तवदाभासः शब्दालंकृतयस्तु षट्"

—काव्यप्रकाशसंकेत (सोमेश्वर)

अर्थालङ्कारास्तु काव्यप्रदीपादौ परिगणिताः एकषष्टिः (६१)मम्मटोदिताः।

नानकचन्द्रोदये शब्दालङ्कारस्यार्थापेक्षया बाहुल्यम्। अर्थालंकारष्वपि रूपकोपमार्थान्तराणां बाहुल्यमत्र महाकाव्ये।

महाकाव्यादमुष्य शब्दालङ्कारस्योदाहरणं यथा :—

"सकलकर्मसुधर्मसुनिष्ठितः
विशदबुद्धिविलासविचेष्टितः"

—४।१

अन्यदुदाहरणं यथा :—

"मायानटीनाथमिदं ततो नु
न मत्सरस्तत्र ममास्ति कश्चित्"

—५५।१

अर्थालंकारेषु तावदुत्प्रेक्षा यथा :—

ताः क्षत्रियाण्यो मृगशावनेत्राः
सुवर्णवल्लीसुकुमारदेहाः।
अन्यत्र गच्छेदितिशङ्कयेव
कटाक्षदाम्ना वरमभ्यबध्नन् ॥

१००।५

इत्थमेवान्यान्यप्युदाहरणानि द्रष्टव्यानि सन्ति।

—०—

ऋतुवर्णनम्

ऋतुवर्णनमत्रापि महाकाव्येऽङ्गभूतमिव विदधत् शोभां काव्यस्य सहृदयानां समक्षमागच्छति। पञ्चमप्रस्तावेऽत्र महाकाव्ये ऋतुवर्णनं नितरां हृदयहारि हरतीव चेतांसि सभ्यानाम्!

तत्र वसन्तवर्णनं यथा :—

परागपिष्टातभरेण रञ्जयन्
दिग्वारनारीमुखमुन्मुखः परम्।
पिकालिगीतौ सुरभिः समाययौ
कुसुम्भकौसुम्भपटो विटो यथा॥

अथवा

स्मर नरपतिशासनं समन्तात्
पिकनिकटे परिघोषयत्यदोषम्।
त्यजतु किमपि माननी न मानं
प्रविशतु किञ्च विशालवेश्म मुग्धा॥

ग्रीष्मवर्णनं यथा :—

पांशुः स्पृशन्नपि पदे परितापहेतुः
व्याजेन दुर्जन इवातितरां सुशीलः
सन्तापिनोऽपि दिवसाः परिणामरम्याः
दीर्घास्तपोव्यतिकरा इव ते बभूवुः॥

वर्षर्तुवर्णनम्

मेधाद्यैर्हरितेन्द्रनीलमलिनैराकाशमाच्छादयन्
फुल्लैरर्जुनसर्जनीपकुटजैः सर्वा दिशो भासयन्।
मत्ताँश्चातककेकिदर्दुरगणान्कुर्वन्नखर्वस्वरान्
आषाढः समुपेत्य सो धुरि वनं तापं जनस्याहरत्॥

शीतवर्णनम्

कन्यां तुलादिचतुरः प्रविहाय कृष्णां
भीमादिकानिव निरीक्ष्य हतं प्रतापम्।
पूषोत्तरां दिशमुपेत्य चिराय शीतं
श्वानं युधिष्ठिर इवानुगतं निनाय॥

—:०:—

नानकचन्द्रोदयस्य महाकाव्यत्वम्

सर्गबन्धो महाकाव्य"मित्यादिना यन्महाकाव्यस्य लक्षणमुक्तं तत् सर्वमत्र काव्येऽक्षरशः संघटते। अत्र महाकाव्ये एकविंशतिः प्रस्तावाः सन्ति। श्लोकसंख्यास्तु अन्यत्रेवेह भिद्यन्त एव। छन्दसामपि सर्वत्र भेदाः दृश्यन्ते। छन्दसां विचारेऽस्त्यत्रैकं वैशिष्ट्यं यदेकस्मिन्नेव प्रस्तावेऽनेकेषां छन्दसां प्रयोगाः कृता वर्तन्तेऽत्र।

नायकोऽस्त्यत्र स्वयं नानक एव योऽस्ति धीरप्रशान्तो नायकः। अत्र कृतं वर्तते वर्णनं जन्मनो मरणं यावन्नानकस्य। यद्यपि २०, २१ प्रस्तावयोः नानकस्य देहावसानात्पश्चान्नवसंख्याकानां गुरूणां आजन्मनो मरणं यावद् वर्णनं कृतमस्ति तथापि ते नैव कदाचिदपि भवेयुर्नायका महाकाव्यस्य। तथा सति नायकवैविध्यं स्यादत्र काव्ये। अत एव प्रायः इण्डियाऔफिसपुस्तकालयस्य हस्तलेखे (MSS) केवलमेकोनविंशतिरेव प्रस्तावाः सन्ति। नायिकास्त्वत्र नानकपत्नी सुलक्षणी एव। या च पुत्रद्वयं प्रसूय नानकस्य योगिवर्यत्वप्राप्तौ सततं प्रयत्नपरा समतिष्ठत। प्रायेण रसास्तु सर्व एव विद्यन्तेऽत्र काव्ये येषां वर्णनं प्रागेव कृतमस्ति। प्रधानस्त्वत्रास्ति शान्त एव रसः। शृङ्गारवीरादयस्त्वप्रधानाः। हास्यरसस्य द्वित्राण्येवोदाहरणानि प्राप्यन्तेऽत्र येषां निरूपणं कृतमस्ति रसवर्णने। गुणाः सन्ति त्रयोऽपि। परमत्र वर्तते प्राचुर्यं प्रसादस्यैव। इत्यमत्र सर्वथा महाकाव्यस्य लक्षणं संघटते।

काव्यं हि नाम मम्मटोक्तदिशा "तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि" इति। तदित्थं निष्पन्नम्—

१. सरसं स्फुटालङ्कारसहितम्। २. सरसम्, अस्फुटालङ्कारसहितम्।
३, सरसम्, अलङ्कारशून्यम्। ४. नीरसं स्फुटालङ्कारसहितम्।
५. नीरसम्, अस्फुटालङ्कारसहितम्। ६. नीरसम्, अलङ्कारशून्यम्।

एते षड् भेदाः काव्यस्य। अत्र मम्मटमते प्रथमद्वितीयचतुर्थपञ्चमानां काव्यत्वम्[१]। नानकचन्द्रोदयमिदं महाकाव्यं द्वितीयलक्षणसंघटितमिव विदुषां लोचनपथपञ्चति।

---

१. "अत्र केचित् कविकर्म काव्यमिति समाख्यानुरोधात् शब्दे एव काव्येत्वं नत्वर्थे। तस्य तत्कृत्यसाध्यत्वात्। तस्मात् आस्वादजीवातुः पदसन्दर्भः काव्यलक्षणं वदन्ति। तन्न। तथाहि। आस्वादबोधकत्वमेव काव्यत्व प्रयोजकरूपम्। यच्च शब्देऽर्थे चाविशिष्टम्। तत्रापि रसोद्बोधकत्वाङ्गक्लृप्तेरिति, अर्थेऽपि दृश्यकाव्ये इव काव्यत्वम्। कविकर्मव्यवहारस्तु तत्प्रकाश्यत्त्वाद्भाक्त एव। शब्दनित्यत्ववादिमते शब्दरूपेपि काव्ये कविकर्मव्यवहारस्य भाक्तत्वात्। एवमर्थेऽपि काव्यत्वे सिद्धे काव्यं पठति काव्यं रचयति, काव्यं शृणोति इत्यादि व्यवहारस्तु काव्यपदस्य शब्दमात्रपरत्वात् इति।

—काव्य प्र० नाम्न पृ. १४.

महाकाव्यस्यैतिहासिकता

पुराणानि, रामायणं महाभारतं चोपजीव्य यानि काव्यानि लिखितान्यभूवन् तत्र जातं काव्यधर्मस्यैव बाहुल्यम्। परमिदं महाकाव्यं काव्यगुणैः सममेव प्राचुर्येणैतिहासिकं तथ्यमावेदयति। पं० देवराजशर्ममहोदयोऽयं गुरोर्नानकशिष्याद् द्वारकादासान् नानकजीवनवृतान्तं श्रावं श्रावं गुरुग्रन्थसाहिबं च समालोच्य स्वाप्रतिभप्रतिभया महाकाव्यमिदं रचितवान्। अत एवात्रैतिहासिकं तथ्यं प्राचुर्येण वर्तते। गुरोर्जन्म समारभ्य देहत्यागान्तं सर्वं तथ्यमेव वर्तते काव्येऽत्र। केवलं द्वित्राण्येदाहाणानीदृशानि सन्ति यत्रातिशयोक्तिः कृता वर्तते कविना। विश्वविजाय प्रयतमानस्य नानकस्य यात्रावर्णनप्रसङ्गे बहुधापतिताः सन्त्यत्युक्तयः। तद्यथा वैकुण्ठगमनं, तत्र विष्णुदर्शनं तस्योपदेशग्रहणं, ध्रुवलोकगमनं, ध्रुवेण वार्ताकरणं, जनकेन सह साक्षात्कार, समुद्रलंघनं पादाभ्याम्, लंकायां विभीषणेन वार्ताकरणम्, तथा च क्षणेनैव पक्षकात्सुमेरुगमनं,मक्कातः स्वगृहगमनं क्षणेनैवेत्यादि। ये खलु नानकस्य पूर्वजन्मवृत्तान्ताः सन्ति ते तु भगवतो बुद्धस्य जीवनवर्णने दर्शनवर्णने चावेदितमस्ति तथैवात्रापि नानकचन्द्रोदये वर्वति भूयानैतिहासिकोंऽशः। अत एवेदमैतिहासिकमेव महाकाव्यं सर्वथा भवितुमर्हतीति। ये खलु नानकस्य गोरक्षशिष्यैः सह शास्त्रार्थविषयाः मक्कायां म्लेच्छाचार्यैः सह वार्ताविषयाः, अन्यैश्च पाखण्डिभिः सह ये चर्चाविषयास्ते तथा येतावच्चमत्काराः प्रदर्शिताः सन्ति ते च नैवात्युक्तिं स्पृशन्ति। यतोहि सतामस्त्येवेतादृशो महिमा। भाषात्रकाव्ये पाण्डित्यपूर्णापि लोकानुरञ्जिनी वर्तते। सन्ति केचित् संज्ञाशब्दा ये स्वेनैव रूपेण प्रदर्शिताः सन्ति। यथा जबराईल, कोरान,इत्यादि। बहुधा भाषात्र सुसंस्कृता सुनिबद्धा च राजते भाषया भावव्यञ्जना समधिकं स्पष्टमञ्चति लोचनपथम्। अतः सामञ्जस्यपूर्णोऽस्ति भाषाभावयोरत्र काव्ये। शैली खल्वत्र भाषायाः भावं संयोजयन्ती लोचनपथमवतरति। वर्ततेऽत्र राजशेखरस्येव शैली चतुरता च। इत्थमिदं भाषादृष्ट्या, शैलीदृष्ट्या, ऐतिहासिकतथ्यदृष्ट्या च सर्वाङ्गीणं विराजमानमागच्छति समक्षमस्माकमक्ष्णोः। अर्वाचीनमिदं कार्यं संस्कृतस्य सर्वाङ्गीणसम्वर्द्धने सविशेषं स्थानमावेदयिष्यतीति निश्चप्रचम्।

—:०:—

भूमिकालेखने सहायकाः सिखधर्मस्य परिचयप्रदातॄणां ग्रन्थानां सूची

१. The quint esseunce of sikhism = shiromani Gurudwara Pravandhak Cmmittee Amritsar.

२. Critical study of Adigranth = Dr.Surinder singh, Readr Delhi University

३. Sikhism its ideals and instuctions = Tejsingh.

४. Outline of sikhism = Surinder singh, Professor punjabi, Chandigardh.

५. संत साहित्य = डा० सुदर्शनसिंह मजीठिया ।

६. उत्तरी भारत की संत परम्परा = परशुराम चतुर्वेदी ।

७. G. S. Durayl = Indian Sadhus.

८. Civil and religious Institutons of the sikh = Wilson Jourual of the R. A. Society 1818।

९. The Gospal of the Sathu = Surindar singh

१०. ब्राह्मनिज्म एण्ड हिन्दुइज्म = मोनियर विलियम् ।

११. दि सिखरिलिजियन = ए० ए० मेकालिफ ।

आक्सफोर्ड १९०९

१२. I. R. A. S. भाग १८, फ्रेडरिक पिकनार ।

१३. फिलासाफी आफ दि सिखिज्म = शेरसिंह ।

१४. हिस्ट्री आफ दि सिखस् = जे० डी० कनिंघम ।

१५. ट्रान्सफार्मेशन आफ सिखिज्म = गोकुलचन्द्र नागर ।

१६. नाथ सम्प्रदाय = हजारीप्रसाद द्विवेदी ।

१७. दि हिन्दू व्यू आफ लाइफ = राधाकृष्णन् ।

१८. पंजाबी भाषा विगि यन अते गुरमति गियान = मोहनसिंह ।

१९. नानकचन्द्रोदयम् = देवराज शर्मा ।

—o—

किञ्चिन्निवेदनीयम्

म० म० पं० गोपीनाथकविराजैः श्रीव्रजवल्लभद्विवेदिमहोदयाः समाज्ञप्ताः नानकचन्द्रोदयस्यास्य सम्पादनं कारयितुम्। तदानीं श्रीव्रजवल्लभद्विवेदिन आसन् प्रकाशनाधिकारिणः (इदानीमिमे, योगतन्त्रविभागे व्याख्यातारः सन्ति) पदे। स च मां सम्पादनमनुष्य कर्तुं तदानीन्तनेभ्य उपकुलपतिभ्यः श्रीसुरतनारायणमणित्रिपाठिमहोदयेभ्यः आज्ञामादाय न्ययोजयत्कार्येऽत्र। अतः सर्वप्रथममहमस्म्येतेषां कृतज्ञः। अनुसन्धानसंचालकस्यादेशानुशारं तदनु सम्पादनं कर्तुमहं समुद्यतोऽभूवम्। यौ तावद् हस्तलेखौ मयाधिगतौ तयोरासन् बहूनि अस्पष्टाक्षराणि, भ्रमाः, स्फुटार्थाश्चांशाः। परमहं सावधानेन महता परिश्रमेण च समारब्धान् सम्पादनं संशोधनं चास्य कर्तुमिति। कार्यमिदं कर्तुमहं बहुशःसमुत्साहितः पण्डितश्रीजगन्नाथउपाध्यायमहोदयैस्तदानीन्तनबौद्धदर्शन विभागाध्यक्षै (एते सम्प्रति पालिविभागे प्राध्यापकाः सन्ति) रस्मदध्यक्षैश्च। ये खल्वासन्नत्र भ्रमाः अस्फुटार्थांशाश्च तान्दूरीकर्तुं सुव्यवस्थितं पाठं च विधत्तमतीव मार्गप्रदर्शनं कृतवन्तः सन्तीदानीन्तनाः सञ्चालकमहोदयाः पण्डितप्रवराः श्रीबदरीनाथशुक्लमहोदयाः। इतः पूर्वं महाकाव्यमिदं नागतमासीत् प्रकाशम्। अतः कठिनकठिनं कार्यमिदं ललितललितं कर्तुं मया सिखधर्मस्य ग्रन्थाः समासादनीया आसन्। तदेतत्प्राप्तुं मया समादरणीयाः सन्तफतहसिंह महोदयाः समभ्यर्थिताः। एतेषामाशीर्वादं प्राप्य प्रकामं प्रसन्नोऽहं यथायोग्यं कार्यमाचरम्। गुरुवर्याः सभाजनीयाः सन्तमहोदया मह्यं सुचारुकार्यं कर्तुं ग्रथांश्च प्रददुः। एतेषामाशीर्वादस्वरूपमेवेदमस्ति कार्यमिदं भवतां (पाठकानां) पुरतः शोभमानम्। इतः परमहं हार्दं धन्यवादं वितरामि प्रो० सुरिन्दरसिंहकोहली महोदयेभ्यः। एते चण्डीगढ़विश्वविद्यालये पञ्जाबीभाषाप्राध्यापका मत्कार्यसम्पादनाय बहुविधं प्रयत्नं कृतवन्त इति रक्षत्वैनं गुरुर्नानको नितराम्। प्रस्तुतग्रन्थमुद्रणकार्ये हार्दधन्यवादस्य पात्राणि सन्ति प्रेसकार्यकर्तारो विशेषतः श्रीहरिवंशत्रिपाठिमहोदयः प्रूफसंशोधनकार्ये कृतबहुपरिश्रमः धन्यवादार्होऽस्ति।

गुरुनानकस्य पञ्चशतशतीजयन्तीः पुनीतसमारोहावसरे (यः समारोहः ५।११।६९ तः सम्पत्स्यते) पुस्तकमिदं सम्पाद्य मया सहृदय-हृदयसमक्षं प्रस्तुवन्नितरां मानन्दमनुभूयत इति। अतः परं संस्कृतानुरागिणः प्रार्थ्यन्ते यद् याश्च त्रुटयः सञ्जातास्तदर्थमहमत्र क्षन्तव्य एवेति।

अकिरदविषमां यो
ज्ञानवैराग्य धारां।

स जयति करुणाब्धि-
र्नानको योगिवर्यः ॥

देश्यैः सुबोधमधुरैः परमात्मतत्त्वं
वाहीकवर्गमपि बोधयताञ्जसैव
द्वैतान्धकारमपनीयत नानकेन
सन्दर्शितस्तनुभृतामपवर्गमार्गः ॥

विदुषामास्रवः
सम्पादकः संशोधकश्च
ब्रजनाथ झा एम. ए; आचार्यः
बिहारप्रान्ते दरभङ्गामण्डला-
न्तर्गतमहरैलग्रामवास्तव्यः ।

अन्तरार्ष्ट्रिय-विभागः
वाराणसेयसंस्कृतविश्वविद्यालयः
वाराणसी
२ अक्टूबर १९६९

—:०:—

श्रीगणेशाय नमः

श्रीदेवराजशर्मविरचितं

नानकचन्द्रोदयमहाकाव्यम्

अथ प्रथमः प्रस्तावः

[1]यस्याज्ञानवशादसावनवधिर्दुर्वारदैन्यास्पदं
संसारः सुखदुःखमोहगहनः प्राचीन उज्जृम्भते ।
दृष्टे यत्र विवस्वतीव तिमिरं तूर्णं तिरोधीयते
सत्यं ज्ञानमनन्तमेकममलं तद्भासतो वो महः ॥ १ ॥
औदार्यार्जवकीर्तनीयकरुणः शौर्यादिलक्ष्मीगुणः
शास्त्रार्थव्यवसायिसज्जनिपुणः श्रीभागमल्लाभिधः ।
शश्वत्स्वीयसमर्हणीयचरणध्यानानुरक्तः कृती
राजासीन्निजधर्मकर्मसुदृढः प्रख्यातकीर्तिः सुधीः ॥ २ ॥
प्रख्यातान्तस्तिमिरतरणिः पूर्वविद्याविलास-
प्रेमासक्तः सरसजनतासंस्तुतो ब्रह्मनिष्ठः ।
साङ्गोपाङ्गश्रुतिकृतिपटुः[1] स्वीयवात्सल्ययुक्तः
शान्तो दान्तः प्रभवति गुरुर्धर्मदासाभिधानः[2] ॥ ३ ॥

---

१. पदुः—क

२. तत्र परब्रह्मणः स्मरणं कृत्वा कविः भागमल्लनामकं राजानं गुरुं धर्मदासं सुरतरामं हरिदासं नानकं श्रीचन्द्रं च स्मरति चिकीर्षितस्य ग्रन्थस्य निर्विघ्नेन समापनं जायतामिति बुध्या ।

1. प्रारम्भिकाः सप्तश्लोकाः 'क' इति हस्तलेखे न सन्ति । एते केवलं 'ख' इति हस्तलेखे दृश्यन्ते ।

यत्र द्वितीयसर्गादिकविंशतिप्रस्तावपर्यन्तं प्रथमश्लोके सरस्वत्या वर्णनं कृतमस्ति । कविना तत्र प्रथमप्रस्तावस्य प्रथमश्लोके सत्यज्ञानानन्तामलरूपस्य महसो वर्णनं लोचनपथमञ्चति । तत्र कारणमिदमेव यदुदासिमतप्रख्यापकस्य महाकाव्यस्य प्रारम्भे परब्रह्मणः परमैश्वर्येण भाव्यमेव ।

सकल[१]कर्मसुधर्मसुनिष्ठितो
विशदबुद्धिविलासविचेष्टितः
सुरतरामसमाख्य उदारधी-
र्जयति सन्ततमात्ममुदान्वितः ॥ ४ ॥

ज्ञानं गुह्यतमं मतित्वममलं ध्यानं तथाध्यापनं
सानन्दाध्ययनं [२]सुथोगमयनं सद्वृन्दसम्माननम् ।
संभाव्यात्मगतौ रतः समभवद्भस्मावृताङ्गः सदा
सिद्धश्रीहरिदासयोग्यतुलधीर्दैगम्बरीवृत्तिकृत्[1] ॥ ५ ॥

श्रीमद्बुद्धिसुधाकरः पटुतरः सर्वागमज्ञानभृद्
वेदान्तैकविचारचारुचतुरश्चैतन्यचिन्तामणिः ।
सद्वर्णाश्रमसिद्धशुद्धविलसत्साम्राज्यतत्त्वोत्सुकः
सर्वैश्वर्यसमन्वितो विजयते श्रीनानकाख्यः सुधीः ॥ ६ ॥

श्रीचन्द्रः प्रभवत्यनेकगुणवद्वृन्दै[३]स्तुतः संमतः
सद्विद्याभ्यसने सदैव जनताकारुण्यकल्पद्रुमः ।
धैर्यस्थैर्यतयेप्सितस्थितिरतिस्वच्छस्वभावोर्जितः
श्रीमद्बुद्धिसमीहितेष्टविमलज्ञानप्रधानप्रधीः ॥ ७ ॥

बालाख्येन पुराङ्गदं प्रतिकथा प्रोक्ता निजप्राकृत-
ब्राह्मया नानकसंगि[४]तात्मविशदज्ञानाम्बुधेः श्रीगुरोः ।
गङ्गाराममुदाद्य सैव भवता गीर्वाणवाणीवृता
श्राव्या मे कृपयेत्युवाच नृपतिः श्रीभागमल्लाभिधः ॥ ८ ॥

---

१. सकलधर्मसुकर्म—ख.

२. सुथोगमपनं—ख. । श्लोकोऽयं "क" इत्यत्र नास्ति ।

३. विद्वत्स्तुतः—ख.

४. गता—ख. ।

1. षष्ठीसमासप्रसङ्गे पुंवद्भावो नेत्यभियुक्तोक्तेर्न पुंवद्भावः ।

श्रीशब्दाम्बुधिसम्भवद्भ्रमतमो हृद्ज्ञानचन्द्रोदयो
विद्वद्वृन्दविवेकवैभवभवत्नोत्कर्षहर्षप्रदः ।
सच्चिद्ब्रह्मविलासिविश्वविजयप्रोद्भासिराशिप्रभु-
गङ्गाराम उदासिवर्यविदितः काशीप्सितस्थानकृत् ॥ ९ ॥
सोऽयं सुधीः सकलशास्त्रसमृद्धसिद्ध-
विद्याविवेकनिपुणो मुदमादधानः ।
स्वाभीष्टदेवमभिवाञ्छितभुक्ति-मुक्ति
साम्राज्यदं[2] विजयते प्रणमन् प्रवीणः ॥१०॥
श्रुत्वा वचस्तदखिलप्रियमेत्र गङ्गा-
रामैः स्वकीयजनसौख्यदनानकीया ।
सा श्राव्यतेऽद्भुतकथा नृपभाग मल्लं[3]
प्रत्यब्द[4]संस्कृतपदावृतवृत्तवृन्दाः ॥११॥
आदौ प्रणम्य सदयं गुरुधर्मदासं
ख्यातप्रभावहरिदासदिगम्बरं च ।
श्रीचन्दसूनुसहितं गुरुनानकं च
सत्सङ्गतं[5] सुरतराममुदारबुद्धिम् ॥१२॥
कलिमलिनमतीनां शोधयन् मानसानि
स्वयमुदयमुपेतः शास्त्रयोनिः स्वयंभूः ।
अकिरदविषमां यो ज्ञानवैराग्यधारां
स जयति करुणान्धिर्नानको योगिवर्यः ॥१३॥
प्रादुर्भावावधिमधुरिमोङ्गारगुर्व्यः कथास्ताः
प्रस्तूयन्ते विमलयशसो नानकस्यानवद्याः ।

---

१. द्भ्रम—ख. ।
२. साम्राज्यदो—क. ।
३. मह्यम्—क. ।
४. प्रत्यद्य—क. ।
५. सङ्गतां—क. ।

याभिः शुद्धिं दधति मलिनाः स्वर्धुनीस्पर्धिनीभिः ।
सन्तोऽनन्तं हृदि शमसुखं कर्णकोणाङ्गताभिः ॥१४॥

[1]देश्यैः सुबोधमधुरैः परमात्मतत्त्वं
[2]वाहीकवर्गमपि बोधयताञ्जसैव ।
द्वैतान्ध[1]कारमपनीयत नानकेन
सन्दर्शितस्तनुभृतामपवर्गमार्गः ॥१५॥

धर्मिष्ठानां परमधनिनां वेदवाक्याश्रयाणां[२]
शौर्योदार्यप्रथितयशसां [3]बाहुजानां कुलेऽभूत् ।
अव्यासक्तो विषयजसुखे शैशवात् साधुसेवी
नित्यानित्ये मनसि विमृशन्नङ्गदो[4] नामधीरः ॥१६॥

निर्विस्मेषु परं प्रसादसुमुखः संसारिषूपेक्षको[३]
नित्यं साधुसमागमैकरसिको जिज्ञासुचेताः कृती ।
प्रत्यब्दं स सहस्रशः सुकृतिभिः संसेवितो यात्रिभिः
[४]ज्वालां द्रष्टुमगादगाधजडताविध्वंसिनीं देवताम् ॥१७॥

आब्रह्मप्राणिपर्यन्तमखिलमिति यत्प्रोतमेवेहतेऽत्र
श्रौतस्मार्तप्रसिद्धप्रवचनमनसां हर्षमुल्लासयन्ती ।
कालव्यालालिमालाकुपथगतधियां दृश्यते या कराला
[5]ज्वाला काचिद्विशालाऽनलतरलकलाकोटिचिच्छक्तिरेषा ॥१८॥

---

१. न्धकार—ख., धकार—क. ।   २. श्रवाणां—क. ।
३. षु प्रेक्ष—क. ।   ४. जालां—क. ।

1. देश्यः, देशे भवो देश्यो लोकभाषाविशेषः ।
2. वाहीकवर्गः—वाहीको देशवासी जनः । अत्र ब्राह्मणक्षत्रियवैश्येभ्य इतरो जन इत्यर्थः । पञ्चनददेशीयो जातिविशेषः ।
3. बाहुजः—क्षत्रियः ।
4. अङ्गदः—सर्वप्रथमम् उदासिमतव्याख्याता नानकशिष्यः ।
5. अरण्यमध्ये ज्वालानाम्नी देवी । या ज्वालामुखीति नाम्ना प्रथितास्ति ।

पुरोऽथ पान्थैः परितश्चलद्भिः
पंद्भिः[1] स्वयात्रिप्रवरैरनेकैः ।
अरण्यमन्यैर्विविधैर्युतं तत्
समुत्सुकान्तःकरणैः स दृष्टवान् ॥१९॥

समुन्नतस्कन्धपलाशिराशिभिः
प्रशस्तपुष्पस्तवकप्रकाशिभिः ॥
फलोल्लसत्पल्लववारितातप-
[1]स्थलैर्मनोहारि वनं विराजते ॥२०॥

आम्रातकाम्रपनसैर्लकुचैः कदम्बै-
[2]र्निवैरशोकधवतालतमालशालैः ॥
प्लक्षाम्लिकामलकपिप्पलजम्बुवृन्दै-
र्युक्तं समुल्लसति तत्तरुभिर्वटाद्यैः ॥२१॥

सन्मल्लिकाचम्पककुन्दविल्वै-
र्वृन्दाज[3]पाद्यैर्वकुलैः सरम्भैः
संशोभते तद्विपिनं युतं तैः
शीतोल्लसन्मन्दसुगन्धवातैः ॥२२॥

कपोतैर्वृतं खञ्जनैः कोकिलाद्यैः
शुकैः क्वचिद्बर्हिभिर्नीलकण्ठैः ॥
क्वचिच्चञ्चरीकोल्लसत्[4]पुष्पिताभिः
[5]श्रितं शोभते काननं तत् तमालैः ॥२३॥

---

१. पङ्क्ः—क. ।

२. निम्बै—ख. ।

३. जपालै—क. ।

४. ल्लसित्पु—ख. ।

५. लताभिः श्रितं शोभते काननं तत्—ख. ।

1. श्लोक २० तः २४ यावद् वनवैभववर्णनं, २५ श्लोके इरावतीतीरवर्णनं ततः २७ यावत् तत्रत्यस्थलवर्णनं विद्यते ।

राजते परिवृतं मृगसंघैः
क्वापि खड्गगजसिंहशशाद्यैः ॥
क्रोडमर्कटगणैर्महिषौघैः
संयुतं क्वचिदलं गहनं तत् ॥२४॥

ऐरावतीविमलवारितरङ्गतीरा
स्वच्छोल्लसत्सुरभिपुष्पयुता गभीरा ॥
यत्रोल्लसत्यखिलजीवसुखप्रदैका
तत्सन्निधौ सततमाश्रमिणो जयन्ति ॥२५॥

स्थलं तदद्वैतमुनिप्रभावतो
निर्द्वन्द्वनिर्वैरितया विजृम्भते ॥
क्वचिद्विनिर्धूततमोमलैः क्वचित्
प्रबुद्धतत्त्वैर्मुनिभिर्मनोहरम् ॥२६॥

एकं पाययति स्तनं स्वतनयं व्याघ्री कुरङ्गी शिशू-
नन्यं बिभ्रति वभ्रुषु प्रतिदिनं प्रीतिं परां मूषिकाः ॥
यस्मिन् नृत्यति बर्हिणे[1]ऽहिनिवहो निःसम्भ्रमं वीक्षते
क्रीडन्तः करिणाङ्गणेषु कुतुकं कुर्वन्ति कण्ठीरवाः[2] ॥२७॥

कृशैः शरीरैरकृशैस्तपोभिः
केशैः पिशङ्गैर्विशदैर्यशोभिः ।
शुद्धैर्मनोभिर्मलिनैर्विभूत्या
गात्रैश्च यत्रा[3]वसना वसन्ति ॥२८॥

धूमपैरूष्मपैरश्मकुट्टै रदो—
लूखलैरुञ्छजीवैः शिलाजीविभिः ॥

१. बर्हिणो—क. ।
२. कम्बीरवाः—क. ।
३. पत्रा—ख. ।

यत्र यायावरैर्वायुतोयाशनैः
काष्ठमौनाश्रयैस्तप्यते सत्तपः ॥२९॥

स ददर्श तपोवेद्यां देवदारुतरोरधः ॥
यमिनं यमिनं मेने तपस्तीव्रेण तेजसा ॥३०॥

निबद्ध[2]पद्मासनमुन्नतोरसं
स्वनासिकान्यस्तदरोन्मिषद्दृशं
प्रसारिते जानुगते कराम्बुजे
दधानमीषत्सरलां शिरोधराम् ॥३१॥

अयं [1]किमग्निः प्रकटोऽग्निहोत्रिणां
बभूव भ[3]क्त्याचिररात्रतोषितः ॥
समष्टिरेषा नु तपस्वितेजसा-
मुपार्जितानां नियमैरनेकशः ॥३२॥

प्रसादिता मे प्रतिवर्षयात्रया
बभूव साक्षात्पुरुषाकृतिः[4] पुरः ॥
कृतार्थयन्ती किमुहेतिदेवते-
त्यमुं स दृष्ट्वा बहुधा व्यकल्पयत् ॥३३॥

त्रिसंध्यस्नानार्द्रास्तनुकनकतन्तुप्रतिभटा
जटाः शुभ्रां भूतिं धवलमुपवीतं च दधतम् ॥
निषण्णं शार्दूलत्वचि हरिणकृत्या परिवृतं
दयादृष्ट्या दैन्यं सपदि शमयन्तं च जगताम् ॥३४॥

---

१. कष्ट—ख. ।
२. द्धमग्रा—क. ।
३. भक्ता—क. ।
४. कृतिपुरः—ख. ।

जपावसाने श्रवणेऽक्षमालिकां
विधाय मायामयकञ्चुकोज्झितम्[1] ॥
विलोकयन्तं परितो विसृत्वरं
चिरं चिदानन्दमयं[2] निजं महः ॥३५॥

ध्यानावसानसमये स समीहमानो
बद्धाञ्जलिः स्थिरमनाः पुरतोऽवतस्थे ॥
दृष्टिः सुधोर्मिमधुरा निपपात तस्य
भक्तेषु मङ्क्षु महतां हि मनो दयार्द्रम् ॥३६॥

उन्निद्रपङ्केरुहसुन्दराभ्यां[3]
विलोचनाभ्यां शिशिरीकृतः सः ।
पुरः समित्पुष्पफलानि धृत्वा
पपात साष्टाङ्गप्रपातकेन ॥३७॥

सकुन्दशुभ्रैर्दशनैः प्रकाशयन्
दिशो विमुष्मन्[4] दुरितं दयादृशा ॥
स्मितावदातैर्वचनैर्विशोधयन्
मनांसि लोकस्य जगाद तापसः[I] ॥३८॥

कुतः समागच्छसि भद्रकोऽसि
प्रयासि कं देशमिहागतः किम् ॥
प्रयोजनं किं हृदि धारयित्वा
धरातले धावसि यत्र तत्र ॥३९॥

इति तेन तपस्विना स पृष्टः
परमानन्दसमुद्रमध्यमग्नः ॥

---

१. कञ्चुकोकितं—ख. ।
२. नन्दमहो—ख. ।
३. सन्दरा—क. ।
४. स्नन्—क. ।
I. श्लो० ३४ तः ३८ यावत् मुनेर्नानकस्य वर्णनम् ।

मनसा कथिताखिलार्थसिद्धि-
विनयेनावनतः कृती जगाद ॥४०॥

जानन् जनस्य सकलस्य मनीषितं यत्
पृच्छस्यमुं परमनुग्रह एष नान्यत् ॥

कालत्रयं कलयते हृदि सार्थजातं
तुभ्यं ब्रवीम्यहमहो भगवान् वियातः ॥४१॥

आयामि मङ्गलद जङ्गलतः प्रदेशात्
क्षत्रप्रसूतिरहमङ्गदनामधेयः ॥

ज्वालामुखीं भगवतीमवलोकयिष्यन्
यामि स्वहार्दतिमिरावरणापनुत्यै[1] ॥४२॥

पुण्यैरनेकजनुरन्तरसङ्गृहीतै-
र्नीतो बलेन गल[2]हस्तमिहोत्सृजद्भिः ॥

धावन् वनेषु मधुने सविधे विधात्रा
क्षिप्तः सुधाम्बुनिधिरोधसि सोहमस्मि ॥४३॥

क्वाहं विमोहबहुलैर्ग्रहिलो विकल्पैः
क्व त्व निरावरणतत्त्वविबोधसिन्धुः ॥

सम्भाषणात्तदपि मां शिशिरीकरोषि
वेवेक्ति कल्मविटपी नु[1] किमुचनीचान् ॥४४॥

आशैशवान्मृगयते भगवन् यमर्थं
दासस्तमाकलय भृत्यकृपाविधेयः ॥

अज्ञैः कृतेषु विविधानुपपत्तिमत्सु
प्रश्नेषु हन्त परमार्थविदां न रोषः[2] ॥४५॥

---

1. अङ्गदः स्वहार्दतिमिरावरणापनुत्यै ज्ञानलाभाय गत इत्यर्थः ।
2. गलहस्तम्—अर्धचन्द्रेण बलात् प्रेषितो यथा कथ्यते "विधात्राक्षिप्तः" इति ।

१. तु–क. ।   २. दोषः–क. ।

विपत्तिसंयोगवियोगदुःखैर्जरामृतिव्याधिदरिद्रताभिः ।
मानापमानैर्गहनो भवोऽयं भवेन्न केनातिविषादहेतुः ॥४६॥

कामिन्यः कमलेक्षणाः कलगिरो वालाः प्रभूतं धनं
निर्व्याजाः सुहृदो हया पृथुरया मत्ता महादन्तिनः ॥
सौधाः शारदचन्द्रविम्बधवलाश्चेतोनुकूला[१] जनाः
शल्यानीव तुदन्ति मर्मणि मृतौ दोषैर्विहस्तीकृतम्[1] ॥

आपातरम्ये स्फुरिते कदाचित्
सुखे[२] हि खद्योत इवान्धकारे ॥
बाला[३] रमन्ते कृतबुद्धयस्तु
ग्लानिं परां प्रत्युत तत्र यान्ति ॥४८॥

नमन्ति भूपाः शतशः सभायां
नदन्ति मत्ताः करिणश्चवार्याम् ॥
अकिञ्चनस्येव तथापि राज्ञः
प्राणव्ययो दुःसहदुर्दशा च ॥४९॥

शतं तुरङ्गान् विधिवत् विशस्य
शचीपतिर्योऽध्युषितः सुधर्माम् ॥
स[४] संहतः कर्ममहोर्मिजालै—
र्दीनः कणान् याचति यत्र तत्र ॥५०॥

पिपीलिकायाः परमेष्ठितो[५] वा
शरीरमासाद्य भवे भ्रमन्तः ॥
राकां तमत्यन्तमदुःखभाजो
न केपि मे बुद्धिमधिश्रयन्ति[६] ॥५१॥

---

१. कूला–क. ।
२. सुखे–क. ।
३. वाला–क. ।
४. सहतः–क. ।
५. परमेष्ठि–ख.
६. अधिश्रियन्ते–ख. ।

1. इतोऽङ्गदस्य मनसि प्ररूढमुदासिमतमित्येतेन व्यज्यते ।

भवः किमेष स्वत एव सिद्धः
कृतोथ केनापि महात्मना वा ॥
कृतेरभावान्न जडोस्य कर्ता
फलं विनान्यस्य तु न प्रवृत्तिः ॥५२॥
तस्याप्तकामस्य न कश्चिदर्थो
लीलाप्यबालस्य न तस्य योग्या ॥
किं कोशकारस्य यथैव कोशः
स्वस्यैव बन्धाय तथैव लीला ॥५३॥
निपातितो हा जगदन्धकूपे
जीवो वराको न ततः परार्थः ॥
ईशस्य कारुण्यमकारणं हि
चिरं श्रुतोयं श्रुतिडिण्डिमो[1] मे ॥५४॥
माया नटी नाथमिदं ततो नु
न मत्सरस्तत्र ममास्ति कश्चित् ॥
पात्रीकृतं यत् प्रभुमेव रण्डा
विडावयत्येष तु[१] वज्रपातः ॥५५॥
ज्ञानेन साध्यो यदि नाम मोक्षः
स्वर्गादिवत्सादिरसावपि स्यात् ॥
सिद्धे तु तस्मिन् श्रवणादिभिः किं
श्रुतिर्व्यथा[२] हा श्रुतिरादधाति ॥५६॥
स्वमेव विस्मृत्य न मन्यतेऽन्यं
कश्चित्त्रिलोक्यामथवैतदस्तु ॥
ब्रह्मातिरिक्तो न परोस्ति पूर्वं[2]
वद स्वमन्ताकमसावपूर्वम् ॥५७॥

---

१. विडम्बत्ये—क. । 1. श्रुतिडिंडिमः—श्रुत्युक्तिः ।

२. श्रुतिव्यर्था—श्रुत्युक्तिर्नगता सार्थकतामिति भावः । 2. उभयत्रायमेव पाठः ।

जीवः परं विस्मरणस्वभाव-
स्ततोधिकं विस्मरणस्वभावः ॥
उक्तः परात्मेति ततः कृते किं
यत्नेन तस्यैक्यमवाप्यते न ॥५८॥

श्रुत्यर्थः शतधा श्रुतः श्रुतिपथं गीतापि गीता बुधैः
नीता लोकपुराणशास्त्रवचनैर्ज्ञातं जगन्नश्वरम् ।
नाहंताममते गते प्रवितते[१] मोहो मुहुर्वर्धते
वैराग्यं क्व शमः क्व मोक्षपदवी दूरे क्व बोधोदयः ॥५९॥

जीर्णज्वरोयं भवनामधेयो
जहाति यावन्न जनं कुतश्चित् ॥
तापः कथं शाम्यतु तावदस्या
कथन्तरां वा रुचिरा रुचिः स्यात् ॥६०॥

परस्परं विप्रतिपत्तिमन्ति
शास्त्राणि शास्त्रेष्वपि च प्रबन्धाः ॥
अहो प्रबन्धेष्वपि बुद्धिभेदात्
विसंवदन्ते विवृतिप्रवृत्ताः[1] ॥६१॥

अलौकिके वस्तुनि वस्तुविद्भिः
शास्त्रं परं चक्षुरुदीरितं यत् ॥
तद्बुद्धिभावेन गुरोरलाभात्
गतं वितण्डा[२]बहुलैः प्रलापैः[३] ॥६२॥

---

१. मवितते–क. ।
1. विवृतिप्रवृत्ताः = भेदाभेदाः विसंवदन्ते ।
२. वितण्डा = अशास्त्रीयः स्वबुद्धिवादः ।
३. अङ्गदस्य प्रश्नेपु निम्नलिखिताः विचाराः सन्तिः–
क. कामिन्यादयः शल्यानीव तुदन्ति ।
ख. राज्ञः अकिंचनस्य च प्राणव्ययः समानः ।
ग. भवः स्वतः सिद्धोऽथवास्य कश्चित् कर्ता ।
घ. श्रुतिडिंडिभः श्रुतः परं स व्यर्थ इव ।
ङ. नश्वरस्य जगतः का सार्थकता ?
च. कथं बोधोदयः ?
छ. विवदन्ते परस्परं शास्त्राणि ।

यथा रज्जौ सर्पो भ्रमविलसितो ब्रह्मणि तथा
प्रपञ्चः प्राञ्चो मे यदभिदधते तत्र विशयः ॥
भ्रमो यन्न ब्रह्मण्यपि तु नियतं जीवनिलयः
कुतः पूर्वं जीवः स हि भुजगवद् भ्रान्तिरचितः ॥६३॥

वेदान्तशास्त्रार्थविचारतत्परैः
समावृतः शान्तजनैरहर्निशम् ॥
आध्यात्मिकज्ञानविधानवित् सुधीः
शिष्यं स्वकीयं स उवाच नानकः ॥६४॥

मोचयत्सुजनेष्वायुः सौम्य त्वं सुव्यवस्यसि ॥
तव चेष्टेयमाचष्टे पवित्रां प्राक्तनीं [1]क्रियाम् ॥६५॥

विरज्यमानो विषयेषु सम्यग्
दुष्टे[2]ष्विहामुत्र विवेक सक्तः ॥
शमादिसेवी गुरुशास्त्रनिष्ठः
तरेद् भवाब्धिं भगवत्सहायः ॥६६॥

शास्त्रैररित्रैर्गुरुनाविकेन
नीतां प्रसन्नेश्वरसौम्यवार्ताम् ॥
आरुह्य धीनावमबिभ्यदुग्रैः
कर्मोर्मिभिः पारममुष्य पायात् ॥६७॥

---

1. श्लो० ६५ तः ९६ पर्यन्तं गुरोर्नानकस्याङ्गदं प्रत्युपदेशाः समक्षमायान्ति ।

१. चरितः—ख.

२. घिहा—क. ।

रागो भवे हन्त भवे विरागः
सङ्गः सतां खल्वसतामसङ्गः ।
निरन्तरं च श्रवणादिसेवा—
विमुक्तिपुर्या[1] प्रथितः सुपन्थाः ॥६८॥

अज्ञानजातस्य भवामयस्य
ज्ञानं विना भेषजमस्ति नान्यत् ॥
आलोक एव [२]भ्रमयन्नभस्य
न दण्ड[३]काष्ठादिरुदासहेतुः ॥६९॥

[2]अन्तर्वाणिगणा वदन्ति गहितान् शास्त्रेभ्युपायान् बहून्
मोक्षार्थं गुरुमाश्रितोनुभवति प्रध्वस्तमोहान्वयम् ॥
विक्रीणन्ति महौषधीर्हि वणिजः सामान्यतस्तद्गुणान्
जानन्तोपि कृतक्रियास्[४]सुभिषजो गच्छन्ति नीरोगताम् ॥७०॥

उपेयबोधाय भवन्त्युपाया
व्यवस्थितत्वेन हठोस्ति तेषाम् ॥
गन्तव्यदेशं पथिभिर्विचित्रै—
र्यानैश्च गच्छन्ति जना यथेच्छम् ॥७१॥

यत् सच्चित् स्वप्रकाशं विमलमविकृतं देशकालाद्यमेयं[५]
बोधानन्दाद्वितीयं निगमपथजुषां ब्रह्म तन्निर्विकल्पम् ॥
मायामूले प्रपञ्चे विमतिरतितरां स्वस्वबुद्ध्यू हि तेस्मिन्
संवादः कुत्र तेषां ननु परिमिमते मार्गतृष्णां [६]पयो ये ॥७२॥

---

१. न्था–क. । २. श्रमय–क. । ३. दंडकाष्टा–क.
४. सभि–क. । ५. धमे–क. । ६. पयोधे–क. ।

1. "पुर्या" इत्येव पाठो वर्तते कखेत्युभयत्र ।
2. अन्तः = अन्तःकरणे, वाणी = शास्त्रविहिता वाक् यस्य सः शास्त्रविद् शास्त्रज्ञ इत्यर्थः ॥

ब्रह्मास्मीत्यपरोक्षबोधजनितो मोक्षः सशोकक्षतिः
ब्रह्माप्तिश्च सबोधजौपनिषदो वेदाविरुद्धः परः ॥
शोकस्य श्रमजस्य या परिहृतिर्लाभश्च यो ब्रह्मणः
सिद्धस्याप्युभयस्य साधनमिदं [1]नानर्थकं लोकवत् ॥७३॥

अनिर्वा[2]च्यानादिः प्रकृतिरिति मायेति गदिता
परेशे सा[3]ऽविद्या भवति बहुधा जीवनिलया ॥
तयाविष्टो जीवः कलयति परब्रह्मणि जगन्न-
संस्कारा जीवान् जहति किल कल्पेऽपि तनवः ॥७४॥

पूर्वपूर्वभववासनावशा-
दुत्तरोत्तजनुः प्रपद्यते ॥
जीव एष करुणाकरस्तु त-
न्मुक्तये कथयति श्रुतिस्मृतीः ॥७५॥

जीवादृष्टानुरोधादयं विषमो ननु निर्घृ[4]णः ॥
भृत्यसेवानुसारेण दातेव परवा[5]न्ने च ॥७६॥

अयि मायया किमपराद्धमीश्वरे
ननु जीववर्गनतनाद्य[6]वृत्तया ।
प्रतिबिम्बितो धुनिरविर्मलीमसः
तरलश्च तेन किममीषुमालिनः ॥७७॥

स्वप्ने शिरश्छेदमवा[7]पितोपि
स्वप्ने यथा जागरणे समानः ।
तथापरं बुद्धिविपर्ययोस्य
न वास्तवः कोपि विकारलेशः ॥७८॥

---

१. नन–क. । २. मिश्र–क. । ३. शेषाविधा–ख. ।
४. नद्व–क. । ५. पखान च–क. ।
६. नाद्यवृ–ख. । ७. नाप–क. ।

निद्रानिवृत्तौ यतनीयमस्य
न स्वप्नशोकस्य[१] निवर्तनाय ॥
निवृत्तनिद्रः स्वयमेव बोद्धा—
न निद्रितः[२] श्रोष्यति वो वचांसि ॥७९॥
मदेन सन्निपातेन भूतावेशेन निद्रया ॥
उन्मादेन च रागेण स्वमन्यं[३] मन्यते जनः ॥८०॥
अनन्यभक्त्या भवमोचनस्य
निष्कामसत्कर्मविशुद्धचित्तः ॥
विरागमासाद्य जगत्यहृद्ये[४]
हृद्येवेदेवं[५] सुलभं लभस्व ॥ ८१ ॥
अध्यारोपापवादौ श्रुतिषु निगदितौ
ब्रह्मणो बोधनार्थम्,
माया तस्मिन् विवर्तो जगदिदमखिलं
जीवभावश्च तस्य ।
नाज्ञो बोद्धुं समर्थः कथमपि हि विना
यं च कोशादिशैलीम्[६],
ज्ञाने सत्येष सत्यं स्वयमिह मनुते
ब्रह्म सर्वं न चान्यत् ॥ ८२ ॥
चि[1]दंशमादाय विहाय चान्य-
मुपाधिमन्तः करणान्यविद्याम् ।
सदैव सोम्ये निजगाद वेद
तस्यावदत्तत्वमसीत्यभेदम् ॥ ८३ ॥

---

१. स्वमशोक–क. । २. वात्रच–क. । ३. स्वमपं–क ।
४. त्य—क
५. वदेतं—क
६. केशादि—क
1. वेदान्तशास्त्रस्येवोदासिमतप्रपञ्चः समक्षमायाति ।

न ब्रह्मणो विस्मरणं स्मृतिर्वा
बोधोदयस्तज्ज्ञनिहानिहीनः ॥
मायानिलाज्जीवतरङ्गराजि-
र्विचारिता सापि ततो न भिन्ना ॥ ८४ ॥

वासनातंतुमातत्य[1] कोशकार इवाविशत् ॥
जीवो ब्रह्म सदप्यत्र व्योमेव दुरवग्रहम् ॥ ८५ ॥

अपरोक्षब्रह्माणो वदन्ति यस्मै स याति भवपारम् ॥
गुरुशिष्यव्यवहारो गड्डलिकानां प्रवाह इव नान्यः[2] ॥८६॥

अमात्यवश्यो राजेव स्त्रीवश्यश्च पुमानिव ॥
अन्तःकरणतादात्म्याज्जीवो याति विडम्बनाम् ॥ ८७ ॥

न देहेन्द्रियप्राणबुद्ध्यादिरूपः
सदानन्दचैतन्यबोधोऽहमात्मा ॥
इदं बाल्यपाडित्यमौनैर्व्यवस्ये-
त्तटस्थो[3] न दूये न[4] चारब्धभोगे ॥ ८८ ॥

अहं निराकारविदेव साधो
तत्त्वज्ञ लोकानुभवप्रमाणः ॥
प्रारब्धशेषेण धृतं शरीरं
तस्मिन्नहन्ताममते गते मे ॥ ८९ ॥

स्वाप्नं शरीरे सुखदुःखभोगं
जानन् यथा जागरितो न तेन ॥

---

१. वासनान्तं—क वासनां तामित्यपि पाठः "व" इत्यत्र ।

२. नान्त्यः—क

३. तदस्थो—क

४. त—क

हर्षेण शोकेन च युज्यते हि
ज्ञाने तथाऽज्ञानदशा[1] प्रपञ्चम् ॥ ९० ॥
प्रत्यक् परानन्दमयो महेशो
विभुर्विभाति श्रुतिगीतकीर्तिः ॥
दृश्यं जगद् सर्वमिदं मृषैव
द्विचन्द्रगन्धर्वपुरीसमानम्[1] ॥ ९१ ॥
सु[2]खस्य लाभान्मुदितः प्रतीचः
प्रारब्धनिक्षिप्तशरीरयात्रः ॥
पश्यन् प्र[3]बुद्धो जगदिन्द्रजालं
न द्वेष्टि नाकाङ्क्षति नो बिभेति ॥ ९२ ॥
स्वयमविकृतो भिन्नाभिन्नं बहु दर्शयन्
कुतुकमकुलं मायी लोके यथा खलु खेलति ॥
सृजति सकलं स्वस्मिन् स्वेनानुविद्धमसङ्गतं
तदपि महतां मायालीलामुपेत्य तथा प्रभुः ॥ ९३ ॥
शास्त्रं गुरुश्च गोविन्दस्त्रयो हि त्रिगुणात्मिकाम् ।
मायां निर्धूय धन्यस्य दिशंति श्रियमद्वयाम्[2] ॥ ९४ ॥
महेश्वरान्नान्तरमस्ति किञ्चि-
त्तथापि हार्दस्य पदं स एव ॥
यद्यप्यतीतोऽसि विधिं निषेधं
शास्त्रं तव स्यात्तदपि प्रमाणम् ॥ ९५ ॥
विनयेन तस्य परमं प्रसेदि[4]वा-
नथ नानको गुरुरुवाच तं पुनः ॥
उपकार एष सहसेवया गुरो-
र्वचनस्य यत्तु परिपालनं सदा ॥ ९६ ॥

---

१. दशा—क २. सखस्य—क. ३. बुद्धे—क ४. प्रदि—क.

I. तदिदं सर्वं जगत् द्विचन्द्रदर्शनवत् , गन्धर्वपुरीवद्वा भ्रान्तमेवेत्यर्थः ।

2. शास्त्रं, गुरुः गोविन्दश्च मायां निर्धूय धन्यस्याद्वयां श्रियं दिशन्ति ।

इत्थं स शिष्यमनुशिष्य कियद्दिनानि
तस्थौ[1] गृहीतवचनः शिरसा नतेन ॥
संसेवितो नियतवाङ्मनसेन नित्य-
मीशात्पृथक् परमतो हि मतो नतेन ॥ ९७ ॥

अथैकदा नानकपारिकाङ्क्षी
यदृच्छयोत्थाय गतः कुतश्चित् ॥
देहे यतीनां ममता यतो नो
शिष्ये कुतः कुत्र कुटीकटादौ ॥ ९८ ॥

अङ्गदस्तु परिहीणमाश्रमं तेन देवतरुणेव सागरम् ॥
चुक्षुभे स यदि वीक्ष बाधते ज्ञानिनोऽपि विरहः सतां खलु ॥ ९९ ॥

एते चञ्चलचेतसा किमु मया यत्नेन नोपासिताः
सङ्गाद्विभ्यति साधवस्तदथवा तूर्णीं क्वचिन्निर्गताः ॥
तत्सान्निध्यसुखं ददातु यदि वा दैवं क्व मे दुर्बलं
चिन्तामित्यकरोत् गुरोर्गुणगणात् संस्मृत्य संस्मृत्य सः ॥१००॥

विलोकितं तस्य दयारसोक्षितं
वचांसि वैराग्यकराणि शृण्वताम् ॥
वपुः कृतार्थी करमाशु पश्यतां
स्मरन् स तीर्थेषु[2] निनाय वासरान् ॥१०१॥

पश्यन्ननेकनगराश्रमतीर्थसाधून्
सिद्धोऽपि सद्गुरुवियोगविषण्णचेताः ॥
आत्मानमप्रकटयन् विगतैषणत्वाद्
ग्रामेऽवसत् षडुर इत्यभिधानभाजि ॥१०२॥

---

१. तस्था—क.   २. सतीर्थ्येषु—ख.

तत्र स्थितः स गुरुनानकजन्मकर्म
श्रोतुं समुत्सुकमतिः कृतकृत्यताकृत् ॥
प्रत्यक्षदृष्टतदशेषचरित्रचित्र-
मन्विच्छति स्म पुरुषं स्वमनोनुकूलम् ॥१०३॥

कौपीनधारी धृतकालकम्बल-
स्तुम्बीधरः श्वेतशिरोरुहो वशी ॥
अत्रान्तरेऽन्विष्य चिराय तापस-
स्तमभ्यगात् कोऽपि विरक्तिभूषणः ॥१०४॥

प्रवेशितो मर्मविदाथ केन
चित्योधनत्वादनिगूहनाकृतिः[२] ॥
फलानि पुष्पाणि निवेद्य पादयो
नमाम भक्त्या स विनिद्रलोचनः ॥१०५॥

विनीतवेषं विषयैरबद्धं
तृणीकृताशेषजगद्विभूतिम् ॥
सभाजयामास तदाङ्गदोऽमुं
पप्रच्छ च स्थानकुलाभिधानम् ॥१०६॥

सोऽवदत् [1]तलवंडीति नगरी भुवि विश्रुता ।
चन्द्रभानोः[2] सुतस्तस्यां बालसिन्धु[3]रहं विभो ॥१०७॥

वर्णं चतुर्थमपि मामकरोत्कृतार्थं
चित्रं बलेन गुरुनानकबालमैत्री ॥
स्पर्शोपलव्यतिकरेण विधेर्विलासा-
ल्लोंहानि हन्त कलयन्ति सुवर्णभावम् ॥१०८॥

---

१. लुब्धी—क   २. कृती—क.

1. तलवंडी = ग्रामः, नानकस्य जन्मभूमिः ।
2. चन्द्रभानुः = बालसिन्धोः पिता ।
3. बालसिन्धुः = नानकशिष्यः ।

वैकुण्ठवास इव विश्वमये न शून्ये
सङ्गे सतो[1] मम वयो गतमेतदस्य ॥
केनापि दुर्ललसितेन विधेरिदानीं
सीदामि तस्य विरहेण [2]विदूयमानः ॥१०९॥

श्रुत्वा भवं तमधिरोपितमासने स्वे
निर्धूतमोहगहनं गुरुनानकेन ॥
[1]तस्यावलोकनसुखं समवा[3]प्तकाम-
स्त्वामागतोऽस्मि सुचिरेण विचिन्त्य सोऽहम् ॥११०॥

इत्य[4]ङ्गदस्तस्य वचो निशम्य
प्रसादविस्फारितनेत्रपद्मः ॥
उत्थाय तं सादरमालिलिङ्ग
जगाद च स्वागतपूर्वमेतत् ॥१११॥

अवग्रहे वृष्टिरियं प्रथीयसी
सुवर्णकुम्भाधिगतिर्दरिद्रतः ॥
उदीर्णदाहस्य सुधारसच्छटा
ममातिदूनस्य तवाद्य सङ्गतिः[5] ॥११२॥

गुरोः पदाम्भोरुहदर्शनोत्सवै-
रतृप्त एवाहमवार्यरंहसा ॥
वियोजितो दुश्चरितेन केनचित्
न जातु विन्दामि भुवि भ्रमन् रतिम् ॥११३॥

---

१. सता—क
२. व—क
३. समवास—क
४. इत्थंगद—क
५. संगतिः—क
1. गुरुनानकावलोकनसुखं समवाप्तकामोऽङ्गदः स्वं कृतकृत्यं मेने ।

तदद्य मां जीवय जन्मनः कथा
गुरोर्मदीयस्य वदन् प्रथीयसीः ॥
समग्रमालोकितवान्भवानहो
त्वमद्य दैवेन हि दत्तसन्निधिः ॥११४॥

न तत्पदाम्भोरुहरक्तचित्तयो-
र्विनोदिनी केवलमावयोः कथा ॥
अमङ्गले मङ्गलमिच्छतां भवे
भवेदियं कामदुघेव[1] कामदा ॥२१५॥

आतिथ्यं विधिवदुपेत्य बालसिन्धुः
स्वस्थात्मा मृदुनि [2]महासने निषण्णः ॥
सिद्धानामथ गृहमेधिनां समाजे
प्रारेभे कथयितुमद्भुताः कथास्ताः ॥११६॥

इति श्रीजगद्गुरुनानककथायां नानकचन्द्रोदयसमाख्यायां
बालसिन्ध्वङ्गदसमागमो नाम प्रथमः प्रस्तावः

—:*:—

१. दुवेव—क० ख० इत्यत्र 'दुघेव' इति पाठः ।
२. महानसे—क० ।

अथ द्वितीयः प्रस्तावः

स्तुता देवेन्द्राद्यैः धवलकमलस्वासनगता
लिपिव्याहारादिव्यवहृतिविधानैकशरणा ॥
सदा श्रीवागीशा निजजनमनोभीष्टफलदा
जयत्येषा देवी जगति निखिलानन्दजयदा[१] ॥ १ ॥

इरावती नाम च चन्द्रभागा
नद्यौ पुराणप्रथिते पृथिव्याः[२] ॥
ययोस्तरङ्गैस्तरलैरजस्रं
सञ्जायते चामरवीजनश्रीः ॥ २ ॥

मध्ये तयोर्जनपदो बहुशस्यशाली
शालीक्षुमिष्टफलवृक्षवनैरनूनः ॥
सौराज्ययुग् "जयतिवार"[1] इति प्रसिद्धः
सिद्धस्थलं वरतुरङ्गमजन्मभूमिः ॥ ३ ॥

संसेविताः प्रतिगृहं परमातिथेयैः
यस्मिन् प्रवासविपदं[३] न विदन्ति पान्थाः ॥
सौहार्द्रहृद्यचरितैरनुवध्यमाना
[४]लौकैः कुटुम्बमखिलं न खलु स्मरन्ति ॥ ४ ॥

---

१. यजुदा—क० ।

२. पृथिते प्रथिव्यः—ख० ।

३. प्रवासविवदन्ति—क० ।

४. लौकै—क० ।

1. "जयनिवार" जैतवार इति प्रसिद्धो ग्रामः । द्वितीयप्रस्तावतो ग्रन्थान्तं यावत् सर्वत्रैव प्रारम्भश्लोके सरस्वत्या वन्दनं कृतमस्ति कविना ।

[1]दुर्गैर्युतो बहुविधैर्नितरां निरीतिः
सत्सेतुबन्धसरसीरमणीयमार्गः ॥
यः सार्थवाहशिविरे श्रमनोदनार्थे
छायां बिभर्ति नगरस्य महावनेऽपि[1] ॥ ५ ॥

स्त्रीपुंसकान्तिपरिभूतरतिस्मरोद्यः
शश्वत्सभिक्ष इति दुर्लभभिक्षवर्गः ॥
नीरोगता विफलवैद्यगणेऽपि यस्मिन्
सर्वज्ञतार्थपरिशीलितवैद्यविद्याः ॥ ६ ॥

शब्दार्थरत्नखनिमन्यजनैर्दुरापा-
मानन्दभूमिमभितो विगतत्रितापाः ॥
आब्रह्मबुद्धिविभवैकविधिप्रधाना
यत्रोत्तमा ब्रुवति शान्तपदं दधानाः ॥ ७ ॥

सनिगमागमगीतसरस्वती
वसुमती सुमती हि जनस्थितिः ॥
जयति यत्र सुवर्त्मनतोन्नता
परिवृता सरसा सरसान्विता ॥ ८ ॥

उपवने पवनेषु समुल्लसत्
किशलयोज्ज्वलपुष्पफलैर्वृते ॥
समुदिते मुदिते ऽप्यनृभिर्कृते[2]
जनपदस्य हितस्य शमेधति[3] ॥ ९ ॥

---

१. दुर्गे—क० ।
२. स्तृभि कृते—क
३. शमेधते—क

1. श्लो० ३ तः ११ यावत् 'जयतिवार' स्थलवर्णनं नितरां ललितं कृतमस्ति कविना । अत्रैव स्थले तलवण्डी नाम्नी नगरी यत्र नानकोऽजायत ।

सर्वर्तुसम्प्राप्तसदुत्सवाढ्यै-[१]
स्सौजन्यजन्यैर्जनतार्जवाद्यैः ॥
सौंदर्यदर्या[२]द्भुतकुञ्जपुञ्जै-
र्वाराभिधस्तत्रवृतो विभाति ॥ १० ॥

क्षीरच्छलादमृतमेव किरन्ति गावो
यस्मिन् धरन्ति सुरशाखिधुरां वदान्याः ॥
देवा इवोज्वलरुचः प्रमदाः पुमान्सः
स्वर्गस्य यः प्रतिनिधिर्विधिना व्यधायि ॥ ११ ॥

पञ्चभिः कुलकम् ॥

तस्मिन् विस्मितविश्वकर्मधिषणा विश्वस्य सारः परं
सम्बाधं सरवर्त्मसम्विदधती सौधैः सुधांशूज्वलैः ॥
प्राकारेण परिष्कृतातिमहता धाराधरान् रुन्धता
विख्याता [1]तलवण्डिकेति नगरी जागर्ति सर्वार्तिहृत् ॥१२॥

[2]अनेकवर्णोज्वलसन्नशोभा
वर्णैश्चतुर्भिः परिशोभितापि ॥
अष्टापदाकारसदापणापि
नानाप्रतिच्छन्यमहानिषद्या ॥ १३ ॥

नानादेशजनैर्युता बहुवणिङ्नीतैः[३] सुभाण्डैश्रिता
दिश्यैर्गायकनर्तकैरनुगता सच्छिल्पिसंघैः श्रिताः ॥
दैवज्ञैः कविकोविदैर्गुणिगणैर्भूयश्च वैद्यैर्वृता
दृष्टा योगकलेन विश्वकुतुका[४] लोकाय या कल्पते ॥ १४ ॥

---

१. दुत्सवामै—क. । २. दर्पा—ख. ।

३. ङ्नीतैः—क०

४. कुतका—क०

1. तलवंडिका नगरी स्वर्गस्य प्रतिनिधिर्यत्र जन्माग्रहीन्नानकः ।

2. विरोधाभासेन ग्रामवर्णनं प्रारभते कविर्यत्र जातिगतभेदभावाभावः ।

जुह्वानाज्वलनं श्रुतिस्मृतिविदः सन्तोषशीलाद्विजा
राजन्या बहुजन्यजन्ययशसा ख्याताः प्रजारक्षिणः ॥
वार्तायां कुशलाविशः प्रमुदिता देवद्विजाराधने
[1]शूद्रा यत्र भजन्ति भव्यचरिता वर्णत्रयं निर्मदाः[1] ॥ १५ ॥

राका शारदशीतरश्मिवदनाः सम्फुल्लपद्मेक्षणा
विद्युत् गौररुचोगुरुस्तनभरास्तामुष्टिमेयोदराः ॥
वीणा वल्गुगिरो गजेन्द्रगमनाः शृङ्गारसारश्रियः
प्रत्यक्षानि वसन्ति यत्र दयिताः कामास्त्रदेव्यःकिमु ॥ १६ ॥

जितेन्द्रिया दीनजने दयालवो
यशोर्थिनो धर्मधनाः सुनीतयः ॥
वसन्ति यस्यां परमार्थदर्शिनः
सहस्रशः सत्पुरुषा महाकुलाः ॥ १७ ॥

षड्भिः कुलकम् ॥

तस्यां वंशो वेदिनां क्षत्रियाणा-
मास्तेयावत्सृष्टिशुद्धः[2] प्रसिद्धः ॥
श्रेणी गुण्या मौक्तिकानामिवासी-
त्तस्मात्पुंसां सा सभा भूषणानाम् ॥ १८ ॥

कलावपि ध्वस्तसमस्तधर्मे
न वेदमार्गात्प्रचलंति किञ्चित् ॥
ते क्षत्रियास्तेन गताः प्रसिद्धिं
स्वकर्मणावेदिन[3] इत्युदाराम् ॥ १९ ॥

---

१. निर्मलाः—क०

२. मुद्धः—क०

३. मेदिन—क०

1. शूद्रा यत्र वर्णत्रयं भजन्ति—वर्णत्रयसेवातत्पराः सन्ता लसन्तीत्यर्थः ।

धावद्भिर्विषयग्रहाय सततं संक्षोभयद्भिर्मनः
कश्चित्कालमनिग्रहेण[१] वलिभिः पातप्रदैस्तत्क्षणम् ॥
योगानाचरता सदैव सुजयैर्भोगैर्न तृप्तिं गतै-
र्वंशेऽस्मिन्बहवो बभूवुरजिता पक्षैर्विपक्षैस्तथा ॥ २० ॥

वेदी यत्र किल ज्वलत्यतिमहाः संग्रामवेदीगतः[२]
संस्कारं विधिवद्द्विजैर्दहनवन्नीतो युतो हेतिभिः ॥
हूयंते यवनावनीयसमिधः स्नेहैः खलानां भृता-
स्तत्र स्वास्थ्यमुपैति शान्तिकरणाङ्को विप्रसत्संहतिः॥ २१ ॥

क्रुद्धाः शत्रुषु संयुगे यशसि ते लब्धाः परंपातका-
द्भीता भूसुरपादयोर्नतिजुषो मृष्यन्ति वक्रं धनुः ॥
किञ्चैकं शरणागतं विजहति द्रव्यं वदान्योत्तमाः
सङ्गृह्णन्ति चिराय केवलमहो धर्मे स्वकर्मस्थिराः ॥ २२ ॥

तस्मिन्कुले पुरुषरत्नखनौ बभूव
वाराणसी यतिरिति प्रथितो महौजाः ॥
तस्मादजायत सतः शिवरामभक्तः
कुन्देन्दुनिर्मलयशाः [1]शिवरामवर्मा ॥ २३ ॥

जातस्ततस्तलमतिर्मतिमद्भिरीड्यः
[2]कालो जगत्यभिधयाय यशावलक्षः ॥
ओजस्वितां हि सहजामपि बाहुजस्य
सत्त्वाधिकः स विजहौ विनतस्वभावः ॥ २४ ॥

---

१. मतिग्रहेण—क० ।
२. वेदीं गतः—क० ।
1. शिवरामवर्मा शिवरामभक्तोऽभूत् ।
2. शिवरामपुत्रः कालः ।

दम्भप्रधानसकलाचरणेऽनृतेन
संमिश्रिते विरसमेव हि लोकतन्त्रे ॥
आशैशवात्सुजनसङ्गरतिर्नितान्तं
नारायणे प्रणिदधौ स मनो मनस्वी ॥ २५ ॥

क्षत्रस्य कर्मपरराज्यधनापहार-
हिंसामलीमसमुपेक्ष्य विरज्यमानः ॥
[1]ग्रामांल्लिलेख कतिचित्तलवंडिकाया
राज्ञा[१] सुबन्धुरिव सप्रणयेन बद्धः ॥ २६ ॥

साध्वी शिरोमणिरभूल्ललनागुणाना-
मेकाश्रयः कुलवती सुभगास्य भार्या ॥
तौ दम्पती न विषयेष्वतिसक्तचित्ता-
वाचेरतुश्चिरतरं[२] गृहमेधिधर्मान् ॥ २७ ॥

कालादजायत बहोर्दुहिताथ काला-
द्रौरी यथा हिमवतः कमनीयकान्तिः ॥
सा नानकीति कथिता प्रथिता गुणोघैः
पित्रोः प्रसादमतनोदजनं सुशीला[2] ॥ २८ ॥

काले गते कतिपयेऽथ तयोरकस्मा-
त्स्त्रीपुंसयोर्मनसि वासनया बभूवे ॥
स्यादावयोरदितिकश्यपयोरुपेन्द्रः
ख्यातो यथैव तनयो विनयोपपन्नः ॥ २९ ॥

सिद्धैर्द्विजैरभिहिताभियमाननेका-
नाचेरतुस्तदवधिव्रतदानयज्ञान् ॥

---

१. राज्ञः–क० ।
२. जरं–क० ।
1 लेखपालः समजायत । 2. नानकीति कालपुत्री ।

दीनाननाथविकलानवधूतनग्ना-
नन्नै[1]:शुभैस्ततृपतुः स्वसमीहिताय ॥ ३० ॥

तौ कायवाग्घृदयभक्तिपरावभाक्तां
नारायणं सकलवाञ्छितकल्पवृक्षम् ॥
नानाजनु[2]र्जनितपुण्यविपाकसाध्वी
सेवास्य साधयति नाम हि कं न कामम् ॥ ३१ ॥

ग्लानिं निशम्य सुकृतस्य कृतामधीभिः
पा[3]खण्डिभिः स्वमतिबद्धमतैरशास्त्रैः ॥
अंशं स्वकीयमवतारयितुं नृलोके
तौ निश्चिकाय पितरौ हरिरात्मभक्तौ ॥ ३२ ॥

भक्तेष्टसाधनविधौ विधृतव्रतस्य
मन्तव्यमद्भुतमिदं न जनार्दनस्य ॥
एवंविधा कतिनतस्य यशोविमिश्रा
गाथाः पुराणगणिताः कवयो गृ[4]णन्ति ॥ ३३ ॥

पत्युर्हर्षोत्कर्षहेतुः सखीनां
नेत्रानन्दं चन्द्रिकेवार्पयन्ती ॥
आशावल्लीं वर्द्धयन्त्याश्रिताना-
मन्तर्वत्नी कालपत्नी बभूव ॥ ३४ ॥

आपन्नसत्वा परमस्य पुंसः
सा तेजसा कुक्षिगतेन रक्ष्या ॥
अभूदधृष्या सकलान्तरायै
विदिद्युते चाप्रतिमप्रभाभिः ॥ ३५ ॥

---

१. नग्नैः–क० ।
२. जन–क० ।
३. वाखण्डधिः–ख० ।
४. गणंति–क० ।

स्वप्ने सुरैर्गगनवर्तिभिरर्च्यमानं
संस्तूयमानमृषिभिः स्वमहो ददर्श ॥
सा जागरेकमपि सारमिवोद्वहन्तं
विश्वाधिकं समधिगम्य विसिस्मियेच ॥ ३६ ॥

पथ्येषु सौस्यमधुरेषु हविष्यमेध्ये
स्वाहार्यवस्तुषु दधार रतिं सुशीला ॥
सा शृण्वती विरतिभाक् खलु विश्ववार्ता-
माश्वासमौपनिषदीषु कथासु लेभे ॥ ३७ ॥

[1]पाण्डिम्ना परिशोभिता विदधती दीप्त्यातमिस्रक्षतिं
जीवं जीवकुलैरिवाश्रितगणैराश्रीयमाणा निशम् ॥
प्राचीवोदयदिन्दुमण्डलपुरः प्रोत्सर्पिचन्द्रातपा
तापं सापहरन्त्यतीव नयनानन्दं जनस्यातनोत् ॥ ३८ ॥

प्ररूढगर्भश्रमचारुलोचना
समुन्नमद्दक्षिणकुक्षिमण्डला ॥
सुतार्थिनं नाथमनन्दयत्प्रिया
ह्रिया तिरश्चीनमुखी विलोकिता ॥ ३९ ॥

गर्भश्रमेण सकलाभरणानि हित्वा
तन्वी स्थितापि सुषमां न कथं दधातु ॥
त्रैलोक्यभूषणमणेरुदयस्थितेन
सैवैव भूषितमभून्महसाद्भुतेन ॥ ४० ॥

---

१. विसिस्मिये—क०   २. सौम्य—क० ।
३. सुकथा—क   ४. पद्मैव—क० ।
1. श्लो० ३७ तः ४१ यावत् अन्तर्वत्न्या वर्णनम् ।

उपसूतिकाभिरतिसाधुबुद्धिभि-
विविधोपचारचतुराभिरावृताम् ॥
प्रसवोन्मुखीं सुसमये समीक्ष्य तां
मुमुदे स वेदिकुलवर्द्धनो भृशम् ॥ ४१ ॥

आकस्मिके सर्वजगत्प्रसादे
शंखादिशब्देषु सुमङ्गलेषु ॥
असूत साध्वीसुतमुत्तमं सा
तमोहरं ज्ञानमिवात्मचिन्ता ॥ ४२ ॥

अलौकिकं सौरभमुद्गिरन्तो[१]
[1]ववुः शनैः स्पर्शसुखाः समीराः ॥
जयध्वनिर्व्योम्नि बभूव तारः
पपात पुष्पप्रकरोऽप्युदारः ॥ ४३ ॥

अरिष्टदीपास्तनयस्य धाम्ना-
मम्लुर्यथा धामनिधावुदीते ॥
[2]जाताः समन्तादुपसूतिकास्ता-
श्चित्रार्पिताश्चित्रमिदं विलोक्य ॥ ४४ ॥

मग्नोपि [१]हर्षाम्बुनिधौ ममज्ज
सचैलमाश्वम्भसि कालवर्मा ॥
[3]विधाय तृप्तिं विधिवत्पितॄणां
नान्दीमुखानामनृणो बभूव ॥ ४५ ॥

---

१. धर्षोबुनि–क० ।

1. तुलना–"वाता ववुः स्पर्श सुखामनोज्ञाः"–बुद्धचरित. १।१३ ।

2. श्लो० ४३, ४४ इत्यत्र प्रकृतेः प्रसन्नतावर्णनम् ।

3. श्लो० ४५ ततः ५१ पर्यन्तं कालस्य प्रीत्यै बालस्य जातकर्मादिवर्णनम् ।

उद्दाममङ्गलमृदङ्गनिनादरम्यं
गीतं पुरन्ध्रिनिवहेन ततः प्रणीतम् ॥
शृण्वन् सभूरिषु कृतावलिजातकर्म[1]
पाकोद्विजैरभिहितोऽकृत जातकर्म ॥ ४६ ॥

वर्धस्व दिष्ट्या तनयोदयेने-
त्युदीर्य वस्त्राभरणानि भृत्याः ॥
प्रसह्य जहुर्नच वेदिवर्यः
किञ्चित्तदाऽदेयममन्यत[2] स्वम् ॥ ४७ ॥

विधाय मेधाजननादिकर्म
बालं विनालं जनको विलोक्य ॥
सुवर्णवसांसि पयस्विनीर्गा-
र्ददौ द्विजेभ्यो मुदितो नितान्तम्[1] ॥ ४८ ॥

न केवलं तस्य महोत्सवोभू-
दजस्रमावादितपंचवाद्यः ॥
सुजन्मना तेन कृतप्रहर्षा[3]
सबालवृद्धा तलवंडिकैव ॥ ४९ ॥

स सप्तधान्यैर्बलिभिर्विचित्रै-
र्विधाय तृप्तिं खलु योगिनीनाम् ॥
उत्खातखड्गैर्निशि रक्षितायां-
षष्ठ्यां जजागार पुरन्ध्रिवर्यः ॥ ५० ॥

---

१. ज्ञातकर्म—क० ।
२. मनन्यतस्यं—क० ।
३. हविप्र—क० ।
1. अत्रत्यवर्णनम् अश्वघोषप्रणीतस्य भगवतो बुद्धस्य जन्मवर्णनेन सह साम्यमेधते ।

आहूय बन्धून् गणकान् बुधांश्च
संपूज्य गौरीं गणनायकं च ॥
स द्वादशेऽह्न्यकरोत्सुतस्य
नामप्रसिद्धं जगतीतले यत् ॥ ५१ ॥

बालं विलोक्यात्मदृशा द्विजेन[१]
केनाप्यहो नानक इत्यकस्मात् ॥
अवादि कालोऽपि विशेषबुद्धि-
स्तदेव नामानुमतश्चकार ॥ ५२ ॥

[1]नास्त्यकं दुःखमेतस्येत्यनको नापरः पुमान्[२] ॥
इति बुध्वा हि विप्रेण तत्त्वज्ञेन[३] तदीरितम् ॥ ५३ ॥

कालस्ततः कुलनमस्थितमात्मवन्तं
दैवज्ञशास्त्रपरपारगतं कृतज्ञम् ॥
मिश्रं नतो [2]हरिदयालुमुवाच विद्वन्
बालस्य वर्णय कथं ननु जन्मकालः ॥ ५४ ॥

सोऽब्रूत सौम्य शृणु जन्म मम प्रमत्तो
निर्णीतवाँस्तदुपसूतिकया च लक्ष्म्या ॥
चिह्नैर्दृढीकृतमथोक्तमहो कुमाराः
के के मया विजनिता न परं त्ववेहि ॥ ५५ ॥

बालोऽयमद्भुतगतिर्जनितो जहास
त्रासाकुलः कुलवधूनिवहो जगाद ॥

---

१. द्विजेन–क०
२. नात्म्यकं–क०
३. न स्वज्ञेन–क०
1. ना अर्थात् नरः अनक इव ।
न + अकं दुःखमेतस्येत्यनको नानकः सुखाद् दुःखाच्च बहिर्गत इत्यर्थः ।
2. हरिदयालुर्विद्वान् ज्योतिर्विद् ।

उत्पात एव उत वंशविवर्धनःस्या-
द्विप्रं बहुज्ञमिति पृच्छतु शीघ्रमेव ॥ ५६ ॥
जानाम्यहं तु सुभगं कथनेन किं नु
साक्षाद्विलोकयसि किं न तवापि गोप्यः ॥
उक्त्वेति[1] वस्त्रपिहितः स हि शीतभीत्या
मध्यं[2] नवो मणिरिवानवमो व्यदर्शि ॥ ५७ ॥
सोऽहं निरूप्य सकलानि सुलक्षणानि
गच्छेति तामचकथं ग्रहसंस्थितिज्ञः ॥
सामुद्रिकाद् यदिह जातकतश्च दृष्टं
तद्वो ब्रवीमि तरणेश्चरणौ प्रणम्य ॥ ५८ ॥
ललाटमर्द्धेन्दुनिभं सुतुङ्गं
नासोन्नता भ्रूयुगलं विभक्तम् ॥
लाक्षारुणान्ते नयने विशाले
ग्रीवास्य कम्बुप्रतिमा विभाति ॥ ५९ ॥
वक्षो महाहेमशिलासमान-
माजानुगौ वृत्ततरौ च बाहू ॥
दीर्घाङ्गुली शोणनखाभिरामौ
सम्वर्तिका ताम्रतलौ च पाणी ॥ ६० ॥
स चामरच्छत्रयुतौ[3] ससूर्य-
चन्द्राङ्कितौ चास्य शिशोः करौ यत् ॥
आश्लिष्टमूलौ यवमालयात्रि-[4]
स्तत्सार्वभौमो भवितैष नूनम् ॥ ६१ ॥

---

१. उक्तेति—क०
२. मन्दानवो—क०
३. चच्छ—क०
४. जयमालपात्रिः—ख०

असङ्गताग्रे पितृमातृरेखे
तदस्य सक्तं न मनः कुटुम्बे ॥
अत्युन्नतं पाणितलं वसूनां
व्ययं च दानव्यसनेन वक्ति ॥ ६२ ॥
पाणौ शिशोर्दर्पणमत्युदारं
पश्यामि तज्ज्ञानिधुरंधरोऽयम् ॥
योगीश्वरः स्यादवनीश्वरो वा
चक्राणि सर्वासु[१] यदङ्गुलीषु ॥ ६३ ॥
सिंहोदरस्यास्य मृदू यदन्ध्री
कूर्मोपमौ सूक्ष्मघनाङ्गुलीकौ ॥
तलोन्लसत्स्पष्टमहोर्द्धरेखौ
महात्मभिर्वन्द्यतमौ ध्रुवं तत् ॥ ६४ ॥
बालोऽधुना किं बहुवर्णयेयं
द्वात्रिंशतालक्ष्मभिरेष लक्ष्यः ॥
भविष्यतीति प्रतिभाति भावी
नूनं जगद्गीतयशा महात्मा[1] ॥ ६५ ॥
[२]कृशानुभे [2]कार्तिकपौर्णमास्यां
सुरेज्यवारे परिघे च योगे ॥
सिंहे [3]विलग्ने [३]करणेववाख्ये
ज्ञातः सुतो वेदिकुलप्रदीपः ॥ ६६ ॥

---

१. च–क०

२. कशानुभे–ख०

३, व्य–क०

1. हरिदयालः ५९ श्लोकतः ६४ यावत् बालस्य ललाटाद्यङ्गानि वर्णयित्वा "नून स महात्मा भविष्यती" ति जगाद ।

2. कृत्तिकालक्षणे ।

3. तिष्यर्द्धे ।

[1]मूर्तौ भूमिसुतः सितः [2]शनियुतो[3]दुश्चिक्यगोमित्रगो
मित्रः शीतमयूखसूनुसहितः [4]प्रत्यर्थिभावे शिखी ॥
देवेज्योदपितानिकेत[5]निलयो मेषूरणे चन्द्रमा ।
राहूरिः फगतो ग्रहस्थितिरियं श्रीनानकस्योदिता ॥६७॥

---

1. लग्ने ।
2. तृतीयस्थानगः ।
3. तुर्यस्थानगः ।
4. षष्ठे स्थाने केतुः ।
5. सप्तमस्थानीयो बुधः ।

श्रीनानकस्य जन्मलग्नम्

१५२६

[1]उपेन्द्रदत्तो नक्षत्रनाम्ना योऽयं निगद्यते ।
स नानक निराकार इति ख्यातिं गमिष्यति ॥ ६८ ॥

अखण्डखण्डपरशोः शिरोभूषणमुश्चगम् ।
पञ्चखेटाः प्रपश्यन्ति जगदीशस्ततः शिशुः ॥ ६९ ॥

[2]अमूर्तिगः पूर्णमूर्तिस्तूर्णं चूर्णितवैरिणम् ।
नरेन्द्रं केन्द्रगश्चन्द्रस्तनुतेऽतंद्रतेजसम् ॥ ७० ॥

[3]उच्चस्थाच्छीतकिरणात्कर्मगः शर्मकृद्गुरुः ।
तं पश्यन्नर्मनिपुणं धर्मनिष्ठं नृपं चरेत् ॥ ७१ ॥

उपचये सितसूर्यसुतौ स्थितौ
स्वगृहगोच्चगतो सुहृदौ परम् ॥

---

1. ६६६७८ यावत् जन्मलग्नानुसारं नानकस्य भाविनो जीवनवर्णनम् ।
2. अजन्मलग्नगः ।
3. शासं–क०

अतुलवाग्विभवं जनपूज्यतां
परमऋद्धिमपि प्रविधास्यतः ॥ ७२ ॥

कौमारे प्रतिभास्यति स्वयमहो शास्त्रं श्रुतीनां गणो
धर्मे प्रीतिरतीव चास्य भविता नार्थे कुटुम्बे तथा ॥
सिद्धीनां निवहः समाधिसहितो ज्ञानं पुरोत्पद्यते
ख्यातं भूवलये प्रणस्यति सदा म्लेच्छस्तथार्यो जनः ॥७३॥

सिद्धान् बोधयिता विमार्गगमनांस्तत्तन्मतं खण्डय-
न्मूढानां हृदयाद्धरिष्यति तमो विष्णोर्यशोगीतिभिः ॥
जानीमो जगदीश एव जगतीमुद्धर्तुमद्धाभव-
द्वाच्याः केन गुणा हि नानक निराकारस्य लोकोत्तराः ॥७४॥

नृपालयोगाविविधाधनं मह-
त्परन्त्वयं सर्वविरक्तपुङ्गवः ॥
तृणाय मन्ता भुवनत्रयश्रियं[1]
सत्ता परब्रह्मसुखेन निर्वृतः ॥ ७५ ॥

यथा मणिर्ग्रावगणे न बुध्यते
खनौ यथा हेम न वाळुकाकुलम् ॥
अयं कुटुम्बेषु तथा न लक्ष्यते
विचक्षणो वेत्स्यति कश्चिदेव तम् ॥ ७६ ॥

समये तरवः फलत्यलं
समये वर्षति वारिदावली ॥
समये प्रकटीभवन्त्यहो
अवतीर्णस्य[2] महात्मनः कलाः ॥ ७७ ॥

---

१. त्रयं—क०
२. ऽवतीर्ण—ख०

किमधिकमभिदध्यामेषकालः कलिर्य-
न्नहि वदति सुमेधाः सत्यमप्यद्भुतं यत् ॥
प्रकटयति विभुत्वं बालके तत्र काले
कथमिव भविता नो जीवतामक्षि साक्षि ॥ ७८ ॥

इदं मया शास्त्रगुरुप्रसादेता
निवेदितं किञ्चन बुद्धिसौष्ठवात् ॥
नहीदृशां कश्चन वेद चेष्टितं
नमो नमोस्मै मम योऽस्तु सोऽस्तु सः ॥ ७९ ॥

श्रुत्वेति कालाय परं प्रसीदते
ददौ स मिश्रः शिशुजन्मपत्रिकाम् ॥
अपूजयत्सोऽपि विचित्रभूषणै-
र्धनैश्च वस्त्रैश्च महार्घधेनुभिः ॥ ८० ॥

श्रुत्वाङ्गदो गददिदं व्रजबालसिन्धो-
र्भ्रातः समानय गुरोर्मम जन्मपत्रम् ॥
दृष्ट्वा तदप्यनुदिनं गुरुदर्शनस्य
प्रीतिं यतोऽनुभवितास्मि सखे विखेदः ॥ ८१ ॥

बालसिन्धुरुवाचेदं कालः कालगतिं गतः ॥
लालः सम्प्रति तद्भ्राता विद्यते तं व्रजाम्यहम् ॥ ८२ ॥

कथाया विच्छेदाद्विमनसि जने श्रोतरि तदा
समाश्वासं शीघ्रागमनकथनादेष रचयन् ॥
प्रवासी तीर्थेषु भ्रमणरसिकः कालमलघुं
ययावात्मारामः[1] सपदि तलवंडीं स्वनगरीम् ॥ ८३ ॥

प्राप्तस्तत्रदिनैरयं कतिपयैर्लालस्य वेश्मागम-
त्तेनाश्लेषसभाजनादिभिरलं सत्कृत्य सम्भोजितः ॥

---

१. कथानेक—क० २. महार्ह—ख०

1. आत्मारामः = बालसिन्धुः

आयातैश्चिरमुत्सुकैर्निजजनैः प्रेम्णा समावेष्टितो
नानादेशकथां विशिष्य कथयन्निन्ये त्रियामां यमी ॥ ८४ ॥

कृतनित्यक्रियं प्रातः स्नातो यातसुहृज्जनः ॥
आलोलो[1] न जगत्यस्मिन् बालो लालमभाषत ॥ ८५ ॥

अङ्गदः षडुरसि स्थितः कृती
नानकेन गुरुणा प्रतिष्ठितः ॥
पत्रमस्य जनुषः[2] स याचते
देहि दर्शनममुष्य चाचर ॥ ८६ ॥

श्रुत्वेति लालोऽभिदधे स बालं
स्मृत्वा गुरुं नानकमुद्गताश्रुः ॥
सुतौ परित्यज्य कथं स्वकीये
निवेशयामास पदे परं सः ॥ ८७ ॥

बालस्तमाहस्म निशम्यतां भो
मम त्वभाजा कथिता कथेयम् ॥
तस्यात्मनिष्ठस्य जगत्कुटुम्बं
दयादृशा कोपि न वास्तवस्तु ॥ ८८ ॥

लालस्तदाकर्ण्य तथेत्युवाच
विमृश्य तस्मै विससर्ज पत्रम् ॥
जगाद विज्ञप्तिमिमां कुरुष्व
महात्मनस्तस्य पुरो महीयाम् ॥ ८९ ॥

गार्हस्थ्यपञ्जरे बद्धा गृह्यका इव मानवाः ॥
तेषां सुदुर्लभं देवतीर्थसज्जनदर्शनम् ॥ ९० ॥

---

1. आलोलः = कालः
2. चनुषः–गुरोः

प्रणामपूर्वं पूजेयं तस्मै देया ममेति सः ॥
नारिकेलफलं किञ्चिद्वसु चास्मै न्यवेदयत् ॥ ९१ ॥

अथ प्रतस्थे स च बालसिन्धुः
[1]कालेन केनापि समाजगाम ॥
तमङ्गदो जीव जयेत्युदीर्य
समालिलिङ्गोत्पुलकः प्रसन्नः ॥ ९२ ॥

तत्रत्यवृत्तमभिधाय निवेदनीयं
दत्वा सपत्रमिदमित्यददात्करेऽस्य ॥
पत्रं शिरस्यथ निधाय विधाय पूजां
सुश्राव देववदहर्निशमार्जिहत्सः ॥ ९३ ॥

सहाङ्गदैः श्रोतृजनैः प्रसन्नः
कथां पुनस्तां कथयाञ्चकार ॥
बालस्य बालः किल नानकस्य
चरित्रपीयूषरसानुषक्ताम् ॥ ९४ ॥

नीलकुंचितघनालकावृतः
कज्जलाविलविलोचनः शिशुः ॥
भूषितो जनभवेन विन्दुना
दोलयापि हृदये निजे धृतः ॥ ९५ ॥

मुष्टिद्वयस्य चरणौ क्षिपतः प्रकामं
स्मेरस्य च क्षणमहो रुदतः क्षणं च ॥
तस्यावलोक्य मुखपद्म मर्मेयकान्तेः
का ते जनानजनुषः फलसिद्धिमापुः ॥ ९६ ॥

सुवर्णमणिमेखलातरलनूपुरारविणं
निपीय किमपि स्तनं धरणिधावमानं शिशुम् ॥

1. कालेन केनापि = कियता कालेनेत्यर्थः । नतु कालेन तन्नाम्ना जनेनेति ।

दधार न परिश्रमादनुसरन्त्यमुं धातृका
जहास मुदितस्तदाङ्गनगतः समस्तो जनः ॥ ९७ ॥

अवलम्ब्य दण्डमथ सञ्चलतो
वदतश्चटूनि कलवर्णपदम् ॥
परिशिक्षया च जनकं नमतो
जननी चुचुम्ब तनयस्य मुखम् ॥ ९८ ॥

कृतमण्डनः कनककुण्डलोज्वलो
नवचूडया ललितकाकपक्षकः ॥
शिशुभिः समेत्य सवयोभिरश्रमा-
द्गणितं लिपिं च स गुरोरशिक्षत ॥ ९९ ॥

उपदिष्टं सकृदेव बालको
न विसस्मार गुरुं प्रमोदयन् ॥
पितरौ सर्वसुहृज्जनास्ततः
सुमनीषां मनसैव तुष्टुवुः ॥१००॥

दिने दिने वृद्धिमियाम कोशो
लालस्य तस्मिन् किल वर्द्धमाने ॥
[1]अलौकिकैकान्तमतिप्रभावैः
ख्यातिश्च जाता तलवंडिकायाम् ॥१०१॥

भवनादपनीय पञ्चवर्षो
वसुवस्त्राभरणान्य[1]सन्नमन्यत् ॥
विससर्ज स भिक्षुकेभ्य ईष—
त्पितरि क्रोधपरे परं रुरोद ॥१०२॥

स्वभार्यामवदत्कालो गृहवस्तु न रक्षसि ॥
तयोक्तं जनितश्चोरो मा[2]मुपालभसे कथम् ॥१०३॥

---

१. भरणान्यमत्र—क०   २. मानुपालभ मे—क०

1. बाल्य एव स बालः ख्यातिं गतोऽलौकिकैकान्तमतिप्रभावैरित्यन्वयः ।

दैवज्ञमासाद्य जगाद कालो
विपर्ययो ज्यौतिपिकोदितेषु ॥
यच्छत्रधारी तनयस्त्वयोक्तः
स चौर्यमभ्यस्यति बाल्य एव ॥१०४॥
स्मित्वा ततो हरिदयालुरुवाच कालं
सम्प्रत्युपालभस एवमनिश्चयान्माम् ॥
सम्पत्सु नानक जनुर्जनितासु सौम्य
न प्रक्ष्यसि प्रमुदितो हि कदापि वार्ताम् ॥१०५॥
वितरणव्यसनादपलप्य स
स्वगृहवस्तु ददौ द्रुतमर्थिने ॥
तदवलोक्य चुकोप पिता परं
न परुषं जननी तमभाषत ॥१०६॥
तिष्ठन् गृहे हरति वस्तु तदेष तिष्ठे-
त्कार्ये कचिन्नियत इत्यवधार्य चित्ते ॥
गोचारणाय निदिदेश पिता सुतं स्व-
माज्ञां स तामुरसि कृत्य ययौ वनाय[1] ॥१०७॥
घटोघ्न्यस्ता गावो गलतरलसास्नः शुशुभिरे
सिताः पीता नील्योऽरुणतनरुचः शाद्वलगताः ॥
अराजद्बालोऽसौ परिकरनिबन्धेन रुचिरो
व्रजन् पश्चातासां करकलितयष्टिर्हरिरिव ॥१०८॥
गावश्चरन्ति स्म जनस्य शस्यं
सचेदुपालम्भममुष्य चक्रे ॥
कृषिं विलोक्यापचितां ततोपि
स्वयं ललज्जे च विसिस्मिये च ॥१०९॥

---

1. चौर्यकर्मणापि नानको गृहवस्तूनि याचकेभ्यो ददौ। इति दृष्ट्वा पिता परं चुकोप। अथ च तमादिशद्वने गाश्चारयितुमिति।

वैशाखे विकसितवन्यपुष्पगन्धै-
रामन्दे वहति समीरणे सुगन्धौ ॥
धावित्वा मृदुलतनुर्नितान्ततान्तः
सुष्वाप क्वचिदयमाप्तगाढनिद्रः ॥११०॥

सुतस्य मौलौ सहसा फणीन्द्र-
श्छायां फणामण्डलतश्चकार ॥
कान्तिस्तदा कापि हरेरिवासीत्
संबिभ्रतः शेषफणातपत्रम् ॥१११॥

शाखीन्तरापातनिदाघरक्षा
कृता फणीन्द्रेण शिशुः स [१]शिश्ये ॥
पीलोरधो यस्य न तस्य दृष्टा
छायाधुनापि व्यतिवर्तमाना ॥११२॥

सस्यं परिच्छद्य तदा प्रजानां
स "रायबोलार" इति प्रसिद्धः ॥
निवर्तमानस्तलवंडिकाया
राजा स्वयं सुप्तममुं[1] ददर्श ॥११३॥

न्ययोजयत्कञ्चन पश्य कोऽयं
सुप्तो मृतो जीवति वेत्युदीर्य ॥
आगत्य दृष्ट्वा स गतो नृपस्य
तूर्णं समीपं कथयाञ्चकार ॥११४॥

---

१. शिष्ये—क.

1. रायबोलारः = बोलारराय इति नाम्ना प्रसिद्धस्तलवण्डिकाया राजा। स दृष्टवान् फणीन्द्रच्छायायां गाढनिद्रं नानकम्।

गाश्चारयंस्तातनिदेशवर्ती[1]
श्रान्तो महाराज महातपेन ॥
कालस्य बालः श्वसिति प्रसुप्तो
रक्षत्यमुं फुल्लफणः फणीन्द्रः ॥११५॥

निशम्य सर्वे प्रसिता बभूवुः
नृपश्च तं देशमुपाजगाम ॥
कोलाहले स्फुर्जति सैनिकानां
बालो जजागार गतो भुजङ्गः ॥११६॥

सम्भ्रान्त उत्थाय नृपं निरीक्ष्य
ननाम तं नानकचन्द्रवर्मा ॥
नृपोवरूढः सहसा तदाश्वा-
दमुं हृदा सादरमालिलिङ्ग ॥११७॥

जगाद चेदं किल कालभाग्या-
न्न केवलं तात कृतावतारः ॥
अस्माकमश्रूर्जितपूर्वपुण्यै-[2]
रीशः कृतार्थाः कुरुषे महात्मन् ॥११८॥

कार्याय कस्मैचिदुपात्तदेहो
धरातले कश्चन किं सुरोसि ॥
पुराकृतानां तपसां विपाकात्
सिद्धोसि किं वोपगताष्टसिद्धिः ॥११९॥

उतावतीर्णोसि महाप्रभावो
रिरक्षिषुः सागरमेखलां क्ष्मा- ॥
मिमे वयं कोशकुटुम्बसैन्य-
देशान्वितास्ते करवाम किं नु ॥१२०॥

---

१. वर्तुनी—क. २. अस्माकमार्जूजित—ख.

अथाचचक्षे विनयेन तस्य
प्रीतः परं वेदिकुलप्रदीपः ॥
पश्यन्ति सर्वत्र सतां प्रसङ्गा-
द्देवं परं निर्मलमानसा ये ॥१२१॥

भृत्यस्य ते सूनुरहं न सिद्धः
सिद्धस्त्रिलोक्यां जगदीश एकः ॥
तस्यैव भक्त्याखिलशक्तिभाजः
सिद्धिस्फुलिङ्गाः परितः स्फुरन्ति ॥१२२॥

को नाम विश्वस्य विहाय राज्यं
धराधिपत्यं नृप कामयेत ॥
मातङ्गपृष्ठादवरुह्य तुङ्गा-
द्वालोऽयमारोहति को नु बालः ॥१२३॥

त्वमस्मदीयोऽसि वयं त्वदीया
न संप्रतीदं कथनीयमस्ति ॥
ततः कुटुम्बं च वयं च सर्वे
त्वयैव नित्यं परिपालिताः स्मः ॥१२४॥

तया सुराज्ञा तलवंडिकेयं
राजत्वती धर्मविवेकभाजा ॥
वयं प्रजायत्सुखमास्म हे ते
स चापि पुण्यस्य परं प्रभावः ॥१२५॥

ताः[1] सूनृतास्तस्य गिरो निशम्य
राजा परं विस्मयमान ऊचे ॥
आत्मानमीदृग् विवृणोति नेति
त्वं योऽसि[2] सोऽसि प्रणता वयं त्वाम् ॥१२६॥

---

1. ता इत्यनेनानिर्वचनीया इति व्यज्यते ।
2. मानुषो भव देवो वा भवेति ध्वन्यते ।

कालस्य बालो बहुमानितोद्य
बोलाररायेण नृपेण नत्वा ॥
गत्वा नगर्यामगदन् जनाय
मोहो महानल्पधियां ततोऽभूत् ॥१२७॥

[1]एतद्यशो नवमवर्षमुपेयुषोस्य
श्रुत्वा जनो नवमदभ्रमतिर्ननाम ॥
कृष्णस्य नन्द इव तस्य तु तत्ववेदी
तातस्ततो व्यधितकृत्यकदर्थितानि ॥१२८॥

इति श्रीजगद्गुरु नानककथायां नानकचन्द्रोदयसमाख्यायां
राजबहुमानो नाम द्वितीयः प्रस्तावः

---

1. बोलाररायेण राज्ञा बाल्य एव प्रथितयशाः सञ्जातो नानकः ।

अथ तृतीयः प्रस्तावः

दुग्धेन्दुकुन्दधवलैः स्वमहःप्रभावैः
प्रक्षाल्य मानसमलं निजभक्तिभाजाम् ॥
विश्वं करामल[1]कवत्परिदर्शयन्ती
वाचं विभूषयतु मे वचसामधीशा ॥ १ ॥

कृषीमकार्षीद् गुरुणा निदिष्टो
व्रीहीनसौ स्तम्बकरीं [१]श्वरत्सम् ॥
मृगेषु नारत्वदपीक्षमाणः
क्षेत्रेषु तिष्ठन् भरतो यथा प्राक् ॥ २ ॥

उपनीय गुरूनुपनीय सुतं
निगमाध्ययने नियुयोज पिता ॥
चतुरो निगमान्स्वयमेष पठन्न-
भवद्बहुवैदिकविस्मयकृत् ॥ ३ ॥

आश्चर्यं तत्पण्डितानां मतानी-
[२]द्यव्याचरव्यावश्रुतानि श्रुतानि ॥
[३]यन्म्लेच्छा नामाचचक्षे मतानि
त[४]च्चित्रीयां चक्रिरे ते नमन्तः ॥ ४ ॥

---

१. स्ववत्सरम्–ख.
२. त्यद्या—क.
३. सत्लेछो—क.
४. तद्वित्री—क.
1. करे स्थित आमलको यथा परितोऽभितो दृश्यते तथैवेति भावः ।

बालसिन्धुमनुगं सुमेधसं
 रूपकाणि च[१] गृहाण नानक ।।
भाण्डमानय विशिष्टलोभदं
 विक्रयं कुरु वृथा स्थितोऽसि किम् ।। ५ ।।
एवमादिशदमुं पिता ततो
 नानकः प्रचलितो मया सह ।।
ताव[२]द्दष्टपरनीवृतौ शनै-
 रव्रजाव[1]पृथुकौ पृथून् पथः ।। ६ ।।
 युग्मम् ।।

नद्यस्तीर्णा विमलसलिलायानयात्रैरनेका[३]
दृष्टा ग्रामाः कृषकै[४]बहुलाः शस्यसम्पन्मनोज्ञाः ।।
पर्याक्रान्तान्यवलविभवैः पत्तनान्युत्तमानि
व्यालोल्कैः प्रतिभयमथ प्राप्तमारादरण्यम् ।। ७ ।।
तस्यां तमभिलष्यंतावविशाव[५] यथा यथा
तथा तथा दुस्तरं[६]तद्विषयास्वादनोपमम् ।। ८ ।।
न सिक्ताः केनापि प्रचुरदलसांद्राः क्षितिरुहा
न संदृष्टा वैद्यैः शबरशिशवः स्थूलवपुषः ।।
मृगाः संजीवन्तो मृगरिपुषु रिङ्गत्सुपरितो
जगद्रक्षादक्षं कमपि परमस्मिन्निजगदुः ।। ९ ।।

१. नि--क०
२. दहष्ट—क०
३. अनेके—ख०
४. कृषिक—क०
५. वसिव्यथया—क०
६. ड्कर-क०
1. पृथुकौ = पृथुरेव पृथुको लम्बो घनश्च ।

व्याघ्रव्यालवृकैरुपस्थितमृतिश्वभ्रैः प्रयातप्रदं
शैलारोहवरोहणैरनियमादुच्चत्वनीचत्वकृत् ।
भृङ्गैर्मङ्गलगुञ्जितैः सुरभिभिर्वातैः क्वचिच्छर्मदं
भ्राम्यन्तौ विपिनं भवोपममिदं न क्वापिशान्तिं गतौ ॥ १० ॥

अवरोधमिवोत्तमं मृगीणां
परितः प्रोन्नतशालसंपरीतम्[1] ।
अविशाव घनं वनं तदन्त-
र्विहगैर्वल्गुवचोभिराचितद्रु ॥ ११ ॥

कौपीनमात्रावरणान् जटाधरा-
नादिग्धगात्रान्भसितेन भास्वता ॥
आलोक्य तत्राथ ननाम नानक—
स्तपस्विनस्तद्गुरुमित्यभाषत ॥ १२ ॥

के यूयं विजने वने स्थितिजुषो वस्त्रं न किं धार्यते
मार्गः कः खलु नाम किञ्च भवतामन्नं कुतो लभ्यते ॥
कस्यार्थे क्रियते तपः प्रतिदिनं को वात्र वो रक्षिता
निर्व्यापारमिहस्थितैः किमु सुखं युष्माभिरासाद्यते ॥ १३ ॥

एवमुक्तो नानकेन नानकेनापि संलपन् ॥
उवाच स हितं साधुः सहितं साधुतागुणैः ॥ १४ ॥

निर्वाणिनो वयमपेतजटावधूता
नामापि सच्चरणरेणुरिति स्फुटं मे ॥
विश्वम्भरोत्रमिह यच्छति कर्मसाक्षी
प्रीत्यै च तस्य तनुमः सततं तपस्याम् ॥ १५ ॥

---

१. सम्परातः—क०

पश्यन्ती जगदिन्द्रजालमतुलं नृत्यद्भिरेतैर्जनै-
रर्थार्थं बहुरूपधारिभिरहो नीयामहे कौतुकम्[१] ।।
प्रारब्धं विदधाति नः परिजनः[२] सर्वामनुक्तःक्रियां
साम्राज्यं परिभुज्यते हत परं[३] सन्तोषसिंहासने ।। १६ ।।

मच्छस्त्रग्रथितामुद्रास्तत उन्मुच्य नानकः ।।
उवाच किमतो भाण्डं बालसिन्धोऽति लाभदम् ।। १७ ।।

वसु सपदि बुभुक्षितेषु पात्रे-
ष्वहह वितीर्णमभाग्यतो नयेन ।।
अपहृतसकलर्द्धिनेव चौरै-
रिह च परत्र च तेन रोदितव्यम् ।। १८ ।।

अथ तमहमवादिषं वृथात्वं
कथयसि नानक धर्मवादमुच्चैः ।।
असति वसुनि धार्मिका न किं किं
विदधति पापमधर्मभीरवोपि ।। १९ ।।

डिंडिमो [1]नृःस्पृहत्वस्य ज्ञानवैराग्ययोश्छटाः ।।
धर्माधर्मपरिष्कारः कुक्षिपूर्तेर्विजृम्भितम् ।। २० ।।

कालोयं कलिरवधेहि भो धनस्य
मावज्ञां कुरु किल सर्वसाधनस्य ।।
[४]यच्छून्यैर्गुणकुलसज्जनत्वपूर्णै-
र्विक्षिप्तैरिव धनिनो न संलपन्ति ।। २१ ।।

---

१. कौतुकाम्—क०
२. परिचयः—क०
३. हृतपरं—क०
४. मच्छून्य—क०
1. निःस्पृहत्वस्येति युक्तः पाठः ।

अर्थेन हि वियुक्तस्य पुरुषस्याल्पतेजसः ॥
विच्छिद्यन्ते क्रियाः सर्वाः ग्रीष्मे कुसरितो यथा ॥ २२ ॥

यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः
यस्यार्थः स पुमान् लोके यस्यार्थः स च पण्डितः ॥ २३ ॥

यस्यार्थः स च विक्रान्तो यस्यार्थः स च बुद्धिमान् ॥
यस्यार्थः स महाबाहुर्यस्यार्थः स गुणाधिकः ॥ २४ ॥

चण्डः पिताऽलौकिकचेष्टितैस्ते
विरज्यमानं प्रसभं पुरैव ॥
अनेन सर्वस्वविसर्जनेन
किमाचरेत्तन्[1]मनसावधेहि ॥ २५ ॥

ते देव दानं शंसन्ति धर्मज्ञा अपि सर्वशः ॥
न स्वस्य न कुटुम्बस्य येन पीडा प्रजायते ॥ २६ ॥

इति मे वाचमाकर्ण्य कर्णप्रियमुवाच सः ॥
वालसिन्धो शृणु भ्रातस्तातप्रेषितमद्वचः ॥ २७ ॥

आपद्धर्मधिया बुधा विदधते यत्तत्रदोषास्पदं
विश्वामित्रमुनेरिव श्वपिशिताहारक्रियोपक्रमः ॥
अन्यद्दाम्भिकचेष्टितं सुमनसां सद्वृत्तमन्यत्सखे
साक्षी सर्वगतः प्रमाद्यति न चेद्दम्भो मुधा तन्यते ॥ २८ ॥

कृते प्रयत्नेपि न लभ्यते धनं
विनापि यत्नं यदि लभ्यते क्वचित् ॥
तदा[1]न्वयेन व्यतिरेकतो ध्रुवं
न दैवतोन्यत्तदवाप्ति साधनम् ॥ २९ ॥

---

१. किमाचरत्–क०

1. तत्सत्त्वे तत्सत्ता तदभावे तदभाव इत्यन्वयव्यतिरेकः ।

दानेन पीडापि विमर्शणीया
भविष्यतो भूरि सुखस्य हेतुः ॥
आरोग्यकामा न किमाग्रहेण[1]
भैषज्यमश्नन्ति कषायतिक्तम् ॥ ३० ॥

वाणिज्येऽस्मिन्नलाभश्चेत्ततस्तात: प्रकुप्यतु ॥
वृद्धौ शतगुणायां त्वं स च वा विमना: कुतः ॥ ३१ ॥

तारका इव ता मुद्रा इत्युक्त्वा निदधौ नवाः ॥
स्मेरो नानकचन्द्रस्तं तापसौ मन्दमालपत् ॥ ३२ ॥

किमर्थमेतत्प्रददासि मह्यं
कुमारकस्त्वं कुत आगतोऽसि ॥
न संग्रहो नः खलु सौम्य धर्मः
सिद्धान्नपात्रं सुमते वयं स्मः ॥ ३३ ॥

सन्तोषेण परिव्राजां प्रसन्नमुखपङ्कजः ।
अथ नानक आचष्ट[2] सम्मतासम्मतो मया[3] ॥ ३४ ॥

विश्वम्भरेण प्रहितोऽत्र दात्रा
तवास्म्यहं दर्शनमात्रतुष्टः ॥
नाम्ना निराकार इति स्फुटेन
वदन्ति मां [1]नानक पूर्वकेण ॥ ३५ ॥

विस्मितः स ततोऽपृच्छन्निराकारप्रथा कुतः ।
अवदन्नानकस्तं च परिव्राजकपुंगवम् ॥ ३६ ॥

---

१. किमापदेण—क०

२. आचष्ट—क०

३. यथा—क०

1. नानकः स्वं निराकार इति पदेन सम्बोधयामास । तत्र हेतुं ३७ श्लोके स्वयमेव ददाति ।

द्वापरे निर्द्वापरोहं[1] निराकारमचिन्तयम् ॥
कलौ जातः कारणेन तामेव प्रथितिं गतः ॥ ३७ ॥

वनाद्धि निर्गत्य ततो नगर्या
गोधूमचूर्णादिसवेशवारम् ॥
आनीय तेभ्यो व्यतराव[१] तैश्च
विसर्जितौ स्वं गृहमागमाव[२] ॥ ३८ ॥

ऊचे शिष्यस्तेषु कश्चिद्गुरुस्त्वं
कस्माच्छीघ्रं बालकोऽयं विसृष्टः ।
सप्रत्यूचे तं[३] महात्मानमुच्चै-
स्तेजस्वन्तं कारयेयं स्वकर्म ॥ ३९ ॥

स्थितः सरोरोधसि नानकस्तु
मामब्रवीद्गच्छ सखे गृहं त्वम् ॥
अहं विना तेन न शोभमानो
धर्मेण हीनोऽर्थ इव प्रपोतः ॥ ४० ॥

भाण्डं किमादाय समागतोऽसि
स्थितः स कुत्रेति विपृच्छते माम् ।
कालाय तत्सर्वमवादिषं स
तडागतीरं सहसा जगाम ॥ ४१ ॥

नमन्तमागत्य विनीतवेषं
स नानकं रक्[४]दृगित्युवाच ॥

---

१. व्यतरन्ततश्च—ख.
२. आजगाम—ख.
३. सप्रस्तु—क.
४. रक्—क.
1. निर्द्वापरः एकाकी निराकारमचिन्तयमिति भावः ।

किं पण्यमानी[1] तमपेतभीते
पराजितार्थेषु महावदान्य ॥ ४२ ॥
वरातकोऽद्यावधि नार्जितस्ते
धनार्जनस्येति न वेत्सि कष्टम् ॥
गृहादुपाहृत्य यथाकथञ्चि-
दुन्मन्तवन्मुश्चसि किं धनानि ॥ ४३ ॥
स एवमादीन्यभिधाय कोपात्
क्रूराणि तस्यान्यसमंजसानि ॥
चपेटमुद्यम्य[2] रुदन्तमेनं
व्रजेति चोक्त्वा[3] भवनं निनाय ॥ ४४ ॥
बोलाररायेण निशम्य सर्वं
विषण्णचित्तेन दयालुभावात् ॥
आहूय कालः कथितः सभायां
चण्डोऽतिमात्रं तनये कुतोऽसि ॥ ४५ ॥
तं कोमलं बालमतत्त्ववेदिन्
दुनोषि किं भो परुषैर्वचोभिः ॥
सुपल्लवं चन्दनपादपस्य
क्रूरैः कराग्रैः शरर्दपमेव[4] ॥ ४६ ॥
द्यूतादिकं दुर्व्यसनं यदि स्या-
त्तथापि बाले पितरौ दयालू ॥
न नानकः प्राकृत एष यस्मिन्न-
वाच्यवादान्प्रलपस्य बुद्धिः ॥ ४७ ॥

---

१. पुण्यसानी—क.
२. चपेहामु—ख.
३. चोत्का—क.
४. शरदयं—क.

कियन्ति जन्मावधिने धनानि
दत्तानि तान्यद्य गृहाण मत्तः ॥
यतः क्रुधा साधुभिरीडनीये
मा नानके दुर्वचनानि[1] वाचः ॥ ४८ ॥

उन्मेद[१] आनय ममार्थगृहाद्धनानि
दद्यामनादृत[२]सुताय धनप्रियाय ॥
तेनाहृतं धनचयं वितरन्नवादी-
देतद्गृहाण कृपयाऽनुगृहाण बालम् ॥ ४९ ॥

सोऽब्रूत किं लज्जयसे भृशं मां
धनं मदीयं भवदीयमेव ॥
बालो विनश्यन् गृहमेधिमार्गा-
न्न शिक्षणीयः कतमो नयोऽयम् ॥ ५० ॥

राजावदद्बाल इति भ्रमस्ते
सिद्धोऽथवा कश्चन देव एव ॥
स चावतीर्णः सदने तदस्य
प्रसादमेवानुदिनं प्रतीच्छ ॥ ५१ ॥

स्थित्यैव तस्याखिलसंपदस्ते
भवेयुरित्येतदहं तु वेद्मि ।
उद्वेजितः स्थास्यति नात्र नूनं
भाग्यं क्व तादृग् हि भवादृशानाम् ॥ ५२ ॥

---

१. उन्मद—इव.

२. मनाहूत—क.

1. एतेनेदं व्यज्यते यत्पित्रा भर्त्सितोऽपि राज्ञा प्रोत्साहितो नानकः पुनर्दानमदात् ।

विसर्ज्य तं नानकमाजुहाव
प्रोत्थाय बद्धाञ्जलिरित्युवाच ॥
इदं गृहं नानक तावकीनं
जानीहि नः कर्मकरानिहास्व ॥ ५३ ॥

भवत्स्वरूपा विदुषः पितुस्ते
क्षमस्व दुर्वाक्यमदूरदृष्टेः ॥
अमार्मिकेणाचरिता महान्तं
तिरस्क्रिया नैव दुनोति नूनम् ॥ ५४ ॥

नानको निजगादेदं विनयावनतं नृपम् ॥
तवैवास्मि गृहे तस्मिंस्त्वद्बाहुपरिपालितः ॥ ५५ ॥

शास्ति दुर्नयमालोक्य पिता नास्ति क्रमो मम ॥
यतः प्रसीदति भवान्मयि वात्सल्यवारिधिः ॥ ५६ ॥

तस्य वाचमिमां शृण्वन् स्नेहसौजन्यपेशलाम् ॥
विससर्ज नृपः प्रीतो बहुमानपुरस्सरम् ॥ ५७ ॥

वार्षिकं करमादातुं महाराजप्रयोजितः ॥
ससैन्यो जयरामोऽथ तलवंडीं समागमत् ॥ ५८ ॥

आतिथ्यमद्भुतमकारि करोऽपि दत्तः
संस्थापितः कतिपयानि दिनानि हार्दात् ॥
बोलाररायसहितो जयरामवर्मा
बभ्राम तस्य नगरस्य निरीक्षणाय ॥ ५९ ॥

पश्यन्तौ विपणिमनुत्तमामुदारान्
प्रासादाननुपमशालभञ्जिकाढ्याम् ।
सम्बाधं विविधजनैः प्रतोलिकासु
कालस्योपगृहमुपागतौ गजस्थौ ॥ ६० ॥

निशम्य कोलाहलमुल्लसन्मना
[1]तडिच्छविः शैशवशेषशोभना ॥
सरोजराजन्नयनाथ नानकी
गवाक्षनिक्षिप्तमुखी निरैक्षत ॥ ६१ ॥

कामस्य सा कनककार्मुकवल्लिरेव
यस्याः कटाक्षविशिखैर्व्रणितो मुमोह ॥
धैर्यं विहाय बहुधा जयरामवर्मा
श्वासानमुञ्चदथ रायमिदं बभाषे ॥ ६२ ॥

कस्येयमिन्दुवदना तनयाऽतनुश्रीः[2]
व्यूढा नवेति नृपते परिभावनीयम् ॥
चेत् क्षत्रियस्य न परेण गृहीतपाणि-
नीतः परं तव पुरोऽभिदधे सुमेधः ॥ ६३ ॥

निश्चित्य कालतनयां प्रजातोपयमां जनात् ॥
अवोचद्रायबोलारो जयराममिदं वचः ॥ ६४ ॥

कालस्यैषा सुभगतनया वेदिनः क्षत्रियस्य
न व्यूढा च त्वमसि कुलवानस्य संबन्धयोग्यः ॥
विप्रं पृच्छेर्गणनकुशलं शास्त्रतो योग्यता चेत्
[3]प्राप्तो भावी तव परिणयो यद्यवामो विधाता ॥ ६५ ॥

एवं तेन धराधवेन गदिते विप्रं निधिं पार्श्वगं
सोऽवादीद्वद वेदिमल्लकुलयोर्योग्यो विवाहो न वा ॥
योग्ये वर्णवशादिचिन्तयतया चेदौचिती सत्वरं
कुर्वीथा नृपतेरमुष्य वचसा वैवाहिकीं संविधाम् ॥ ६६ ॥

---

१. तड़ि—ख०
२, तनयातनुः श्रीः—क०
३, प्राप्तो—ख०

अपृच्छत्तयोर्नामिनी शास्त्रदृष्ट्या
शुभं सर्वमालोक्य विप्रो बभाषे ॥
ध्रुवं वेदिनो मल्लसम्बन्धयोग्या-
स्तपाते विवाहे गुणानां गणश्च ॥ ६७ ॥
बोलायरायः सदने स्वकीये
कालं समाहूय रहो जगाद ॥
अयं कुलीनो जयरामवर्मा
भ्रातर्विवाह्यो भवतो नवेति ॥ ६८ ॥
विवाहयोग्या यदि नानकीयं
विवाहनीया न किमित्यनेन ॥
लावण्यसौजन्य[1]निधिर्गुणाढ्यो
[1]वरोवरीयानयमित्यवैमि ॥ ६९ ॥
स्वज्ञातिमुख्यैर्निपुणं विचार्य
कार्यं त्वया कार्यमिदं मदुक्तम् ।
अपत्यसम्बन्धविधौ विशेषा-
दपेक्षिता बन्धुजनाभ्यनुज्ञा ॥ ७० ॥
कालस्तमूचे नृपते भवत्तो
ज्ञाता ममाप्तो न परोऽस्ति कश्चित् ॥
निर्धारितं पञ्चवतास्मदीयै-
रवश्यमेवाभ्युपगम्यमेतत् ॥ ७१ ॥
मल्लैः समं नो बहवो विवाहाः
पुराप्यभूवन्निति योग्यमेतत् ॥
[2]अनत्यये[2] बाधकवर्जिते हि
लोकस्य पूर्वाचरितं प्रमाणम् ॥ ७२ ॥

---

१. सौहार्द्र–क. २. अनुत्पते–क.

1. वरोवरीयान्—वरीयान् श्रेष्ठः वरः इत्यर्थः ।

2. अनत्यये—उत्पातरहित इत्यर्थः ।

ततो निश्चित्य नानक्या लग्नं वैवाहिकं बुधैः ।
दत्तवाक्यो विवाहाय जयरामं स आह्वयत् ॥ ७३ ॥

शृङ्गारितैर्मदकलैः[1] करिभिर्नटद्भिः
सद्घोटकैर्नृपतिभिः शिविकागतैश्च ॥
श्रोत्रप्रियैः प्रतिपथं विविधैश्च वाद्यै-
र्जन्यैरशोभत शुभैरथ जन्ययात्रा ॥ ७४ ॥

आसनार्घादिभिः पूजयित्वा वरं
नानकीजस्य हस्ते ददौ वेदिवर्यः ॥
कामिनीनां कले गीतवाद्यध्वनौ
वैदिकैः पठ्यमानेषु[2] मन्त्रेषु च ॥ ७५ ॥

लाजाञ्शमीदलयुतान्प्रनिधाय[3] पाणौ
यन्नानकः स्वसुरुदंचति लाजहोमे ॥
लक्ष्म्याः करे मरकतावलिहीरखंड-
दातुर्नतच्छशभृतो[4]ऽभृत सर्वशोभाम् ॥ ७६ ॥

जन्यान्भोजनपाननृत्यविनयैः सन्तोष्य सर्वांश्चिरं
जामात्रे मणिहेमखण्डतुरगान्दत्वा च कालः कृती ॥
रायस्यानुमतेर्विसर्ज्य तनयां याने नवीने स्थितां
वाष्पैर्विप्लुतलोचनामनुरुदन् वक्तुं न शक्तोऽभवत् ॥ ७७ ॥

नानको यदपि ज्ञानी न वशो हर्षशोकयोः ॥
तदप्यशोचद्विरहे स्वस्वरूपविदः स्वसुः ॥ ७८ ॥

---

१. तिलकैः—ब.
२. पद्यमानेषु—क.
३. प्रजिघाय—क.
४. तछश—क.

पितुर्गृहे भर्तृगृहे च काले
कालेऽवसत्कालसुता सती सा ॥
ज्योत्स्नेव यं पक्षमलञ्चकार
स एव शोभामधिकामुवाह ॥ ७९ ॥

मणिमयोर्मिकया[1] सह कर्करी-
मदितकांस्यमयीमथ नानकः ॥
अनुपपत्तिमते किल भिक्षवे
प्रकुपितोऽस्य पिता गणकं ययौ ॥ ८० ॥

भवति नानकराज्यमखण्डितं
हरिदयालुमुपालभतेऽत्यलम् ॥
हरिदयालुरभाषत काल किं
भृशमुपालभसे ननु बालवत् ॥ ८१ ॥

न खलु नानकतत्त्वमवागमो
भ्रमसि तत्त्वमबोधमहोदधौ ॥
यमयमिच्छति तं कुरुते नृपं
भगवतो हि कला कमलापतेः ॥ ८२ ॥

स्वयमभोगभुजोऽपि महाजना
गिरिशवत्परवाञ्छितदायकाः ॥
नहि भवानिव तृष्यति नानको
भवसुखेषु मरीचिजलेष्विव ॥ ८३ ॥

त्वममुतो न सुखं समवाप्स्यसि
ध्रुवमपत्यधियैव कदर्थयन् ॥
अविदितात्किल कामदरत्नतः
करधृतादपि नास्ति मनोरथः ॥ ८४ ॥

---

१. कथा—क०

तेनैवं प्रत्युपालब्धः स्मेरः स भवनं[1] ययौ ॥
न पीडयति पुत्रस्य स्वस्मादुत्कृष्टतोदिता[2] ॥ ८५ ॥

निशम्य बोलारनृपः कृपालुः
कालस्य कोपं तनयेऽनवद्ये ॥
आहूय तं तस्य हितानुबंधी
स सान्त्वमित्येवमुवाच वाग्मी ॥ ८६ ॥

असंशयं तर्जनताडनादि
बाले प्रयुञ्जन्ति विनेतुकामाः ॥
न सूनुमज्ञात्मसमं महान्तः
शिक्षाक्षणैस्तीक्ष्णतरैस्तुदन्ति ॥ ८७ ॥

जानासि यद्येतमथाविधेयं
विधेयमेकं भवते ब्रवीमि ॥
तत्त्वं विजानाति न नानकीयं
न नानकीयं तदयं ततोऽस्तु ॥ ८८ ॥

त्वं प्रत्यहं कुप्यसि खिद्यतेऽसौ
प्रायो ग्रहाणां युवयोर्न मैत्री ।
दूरे स्थिते प्रीतिरुदेति बन्धौ
तीर्थे सुरे चापि नृणां विशेषात् ॥ ८९ ॥

तत्रैव तद्भावि यदस्य भावि
स चापि साधुर्जयरामवर्मा ॥
निमित्तमात्रं भविताऽस्य कार्ये
कार्येऽत्र कस्यापि खलु प्रतीच्छा ॥ ९० ॥

---

१. सभवनं-क०

२. स्वमादु-ख०

तिष्ठेत् [1]सुरत्राणपुरे स काले
गन्तासि[१] तं च प्रणयप्रणुन्नः[२] ॥
चिराददृष्टं बहुनन्दितासि
नवोदितं चन्द्रमिवावलोक्य ॥ ९१ ॥
उक्त्वेति राये विरते बभाषे
कालोऽवदः सम्यगिदं सुमेधः[३] ॥
अद्यैव सद्यः प्रहिणोमि पत्रं
विलिख्य तं सौम्य सबालसिन्धुम् ॥ ९२ ॥
स्वस्तिश्री जयरामवर्मणि शुभाः कालप्रणीताशिषः ।
क्षेमं प्राज्यमिहास्ति तावकमिदं संप्रार्थ्यते ऽनुक्षणम् ॥
अभ्यासे तव नानको गत इतो निर्विस्मचेताः कृती
निर्विघ्नेत यथा न तत्र भवता सम्पादनीयं तथा ॥ ९३ ॥
इति पत्रमुपादाय नानकोऽहं च निर्गतौ ॥
कालेन क्रियता प्राप्तौ[४] सुरत्राणपुरं ततः ॥ ९४ ॥

युग्मम्

जनेन निर्दिष्टमुदारसौधं[५][2]
ततः प्रविष्टो जयरामसद्म ॥
स्वसुः पदे प्रष्टुमनास्तयैव
स नानको स्पृश्यत पादपद्मे ॥ ९५ ॥

---

१. गंता—क०
२. प्रणन्नः—क०
३. सुमेधाः—ख०
४. माप्तौ—क०
५. निर्दिष्टमदार—क०

1. सुरत्राणपुरं = जयरामवर्मणो ग्रामः ।
2. उदारसौधम् = जयरामवर्मणः प्रासादः ।

ज्येष्ठासि किं मे पदमस्पृशस्त्वं
न योग्यमेतत्कथितेति तेन ॥
साश्रूणि मुंचत्यवदत्कथंचि-
त्त्वयीश्वरांशे मम किं गुरुत्वम् ॥ ९६ ॥

भाग्यं मदीयं महदेव मन्ये
भ्रातं यदत्रागतवानसि त्वम् ॥
यं कामयन्ते किल वीतरागा
जनः स धन्यो जगतीतलेऽस्मिन् ॥ ९७ ॥

पित्रोः शुभं शंस तथा परेषां
पृष्टो भगिन्येति शुभं स शंसन्[1] ॥
उपायनं वस्तु वसूनि चास्यै
दिदेश वात्सल्यपरः प्रसन्नः ॥ ९८ ॥

पृष्टां प्रवृत्तिं तलवंडिकाया
जनस्य तस्मिन्नभिभाषमाणे ॥
आगत्य हृष्टो जयरामवर्मा
शर्मानसे श्यालमवेक्षमाणः ॥ ९९ ॥

भगिनीपतेः स चरणग्रहणाय
विनिमन्ननेन सहसा विधृतांघ्रिः[2] ॥
विपरीतमेतदकृथा इति जल्प—
न्नमुनाभ्यधीयत नरो न सुरोऽसि ॥ १०० ॥

प्रेम्णा समालिङ्ग्य चिराय साश्रुः
सभाजयन्नेतदुवाच साधुः ॥
समागमो नानक तावको मे
तपे मरुस्थस्य सुधीर्मिसेकः ॥ १०१ ॥

---

१. सुशंसन्—क०

२. विधृतोङ्घ्रि:—ख०

कालेन लिखितं पत्रं जयरामाय नानकः ॥
अर्पयामास ततः पठित्वेदमुदैरयत् ॥ १०१ ॥

इह स्थितो नानक भुंक्ष्व भोगान्
प्रदेहि मे शक्तिमवेक्ष्य भिक्षौ ॥
न किञ्चिदत्रास्ति तवार्य कार्यं
परिश्रमः कोऽपि नहि क्षमस्ते ॥ १०३ ॥

इत्येवमुक्तो जयरामनाम्ना
तं नानकः प्रत्यवादीत् प्रवीणः ॥
कार्यं विना स्वस्थवपुः सचेता
भोक्ता तटस्थैरपि सह्यते न ॥ १०४ ॥

तेन त्वया किञ्चन मेऽनुरूपं
निरूपणीयं ननु सौम्य कृत्यम् ॥
अकर्मकृज्जातु न कोऽपि तिष्ठेत्
क्षणं प्रकृत्याद्यवशः प्रणुन्नः ॥ १०५ ॥

तेनैवमुक्तो जयराम ऊचे
सौम्य त्वया किं यवनान्यधीना ॥
स उक्तवानार्यलिपिं तु जाने
नापाठिषं भो यवनाक्षराणि ॥ १०६ ॥

जयरामस्ततः स्मेरः श्यालमालपदुन्मनाः ॥
न [३]सास्ति भुवने विद्या विद्यास्त्वं यां न नानक ॥ १०७ ॥

न वारिपूर्णः कुलशो नीयमानो हि कूजति ॥
किञ्चिद्रिक्तस्तु मुखरो नेतारं क्लेदयत्यपि ॥ १०८ ॥

---

१. समानय—क०

२. प्रपन्नः—क०

३. शास्त्रि—ख०

म्लेच्छाधिराजो धनखाननामा
देशान्बहून् शास्ति समृद्धकोशः ॥
तस्याधिकारं कलयस्व सौम्य
स्फीतस्य भोः प्रात्यहिकव्ययस्य ॥ १०९ ॥

तथेति तं सम्प्रति शुश्रुवान्सं
निवेद्य निन्ये धनखानपार्श्वम् ॥
अलौकिकं तस्य महो महीयः
प्रसेदिवान् वीक्ष्य तुरुष्कराजः[1] ॥ ११० ॥

प्रसादवस्त्राभरणैस्तदैव
ददावलङ्कृत्य निजाधिकारम् ॥
नवोल्लसत्पल्लवपुष्पबन्धः
सङ्कल्पशाखीव परं रराज ॥१११ ॥

मुद्राः सहस्रं वितताार तावत्
ययाय तस्मै यवनाधिराजः ॥
प्रावर्तयद्भक्तममुष्य नित्यं
तस्यावरोधस्य च वेदिवर्यः ॥ ११२ ॥

ततो गजानां तुरगोत्तमानां
गवां वृषाणां मृगपक्षिणां सः ॥
भक्तं परिच्छिद्य ददौ निबद्ध-
मर्षेण तृप्ताः सकलं न तेऽश्नन् ॥ ११३ ॥

1. १०४ श्लोकस्य "तिष्ठेत्" इत्यारभ्य "तथेति तं सम्प्रति शुश्रुवांसं निवेद्य निन्ये" इति १०९ पर्यन्तं भागो नास्ति—"क इत्यत्र" ॥

१. तुरुष्कः = तुर्क इति भाषायाम् तेषां राजा ।

पुष्टिं परामापुरपेतरोगाः
[1]स्तम्बेरमाद्या इति तन्नियुक्ताः ॥
अन्योन्यमूचुः प्रविचिन्त्य हृष्टाः
भक्ताधिकारी किल कोऽपि सिद्धः ॥ ११४ ॥

अभूत्सुरत्राणपुरे प्रसिद्ध
स्तन्नायका[१] सा[2] किल भक्तशाला ॥
यस्याः पुरः प्रातरुदीय रात्रे-
रायाममासीज्जनसंकुलत्वम् ॥ ११५ ॥

सिताघृतादीन्गणयेत को नु
तिष्ठेद्वराकी समिता मिता तु ॥
राशीकृतासीद् घुसणो न तत्र
कस्तूरिका चेद् घनसारपुञ्जैः ॥ ११६ ॥

प्रियालवातादसनारिकेल-
स्वाद्वीसखर्जूरमुकूलकानाम् ॥
सितोपलानामपि दाडिमाना-
मनुत्तमानां गणिता न गोण्यः[१] ॥ ११७ ॥

अल्पैरहोभिर्महती समृद्धि-
रमुष्य लोकैरवलोकितासीत् ॥
धनानि विद्यास्तदद्दष्टभाजा-
मल्पोद्यमेनैव समुन्मिषन्ति ॥ ११८ ॥

भक्तस्य दानं न महाधिकार-
स्तथापि सर्वाधिकतामुवाह ॥

---

1. स्तम्बे दर्भादितृणनिचये रमते क्रीडति इति स्तम्बेरमो हस्ती ।

१. गोप्य इति क० पु०;

2. "तन्नानकीया किल भक्तशाला" इति युक्तः पाठः ।

यदेव कुर्वन्ति महानुभावाः
पदं तदेवाखिलसंपदां हि ॥ ११९ ॥
तमेकदाऽभाषत[1] निःशलाके
भ्रातर्भवान् स्वोद्यमभागिनीनाम् ॥
अहं यियासामि निजं निकेत—
मेतन्निशम्यानुमतिं प्रदेहि ॥ १२० ॥
मा नानकोऽभाषत कश्चिदामः[१]
प्रेमाकृतोभून्मयि बालसिन्धो ॥
यावच्छरीरं विकृतानपास्या–
त्प्रीतिं हि तामेव वदन्ति पक्काम् ॥ १२१ ॥
भवन्तमेतर्हि विगर्हितैर्हा
भोगैः कृतार्थः किमु विस्मरामि ॥
त्वां सार्वभौमाश्रियमप्यखण्डां
दत्वा सुमित्रं नियमेन नूनम् ॥ १२२ ॥
लीलावलोक्या कतिचिद्दिनानि
त्वयेयमप्यस्य जगद्विधातुः ॥
य उद्यमो नः सततं विधेयो
न विस्मृतः सोऽपि हि सन्निधत्ते ॥ १२३ ॥
प्रियंवदस्येति निशम्य वाणीं
स्नेहावृतोऽहं गमनान्निवृत्तः ॥
कार्याणि तस्य प्रणपादकार्यं
मनोनुरूपाणि सुसावधानः ॥ १२४ ॥

इति श्री जगद्गुरुनानककथायां नानकचन्द्रोदय-
समाख्यायामधिकारग्रहणं नाम तृतीयः प्रस्तावः ॥

---

१. दायः—क० पु० ।
1. "कदाभाषिषिनि……" इति पाठः 'क' एवं 'ख' इत्यत्र ।

अथ चतुर्थः प्रस्तावः

या [1]कच्छपीमपि निगादयति प्रवीणा
सप्तस्वरैरमृतगर्वहरा गिरस्ताः ॥
व्याकुर्वतीव जगति स्वकृपाप्रभावं
सा शारदास्तु सदया सदयाय नित्यम् ॥ १ ॥

न न्यवर्तत यत्पूर्वमाक्रोशति पितर्यपि ॥
दानव्यसनमेतस्य स्वातंत्र्ये तदवर्धत ॥ २ ॥

प्रातर्निषद्यामुखमण्डनेऽसौ
सौधे निषद्यातितरामुदारे ॥
आयासमासीत्सुरशाखिधर्मा
न याचकोऽजायत कोपि मोघः ॥ ३ ॥

औदार्यमार्यस्य निशम्य तस्य
जनो य आगात्तलवण्डिकायाः ॥
अपूरयत्तस्य मनोरथेन
साकं गृहं ग्राहितभूरिरिक्थः ॥ ४ ॥

कुन्देन्दुकर्पूरसितं यशोऽस्य
यथा तथा दिक्षु विकासमायात् ॥
तथा तथा सौरभकृष्यमाणा—
वनीयकास्तं मधुपा इवागुः ॥ ५ ॥

---

1. वीणाभेदः, सरस्वत्यास्तु कच्छपीत्यभियुक्तोक्तेः ।

भक्ताधिकारी यवनस्य तस्य
किं चक्रवर्तीव करोषि दानम् ॥
आयाद्[1] व्ययो यस्य महाननीतेः
स सत्वरं सीदति लोकतन्त्रे ॥ ६ ॥

मयेवमुक्तः स कदाचिदूचे
भ्रातर्न नीतिर्न च लोकतंत्रम् ॥
स्वप्ने मृषात्वे सकलेऽविशिष्टे
भिक्षुर्वरो[2] वा वद सार्वभौमः ॥ ७ ॥

युग्मम् ॥

वदान्यतामस्य वदन्नुपेत्य
मासोत्तरं सूचयति स्म कश्चित् ॥
चेतो भगिन्या भगिनीपतेश्च
तस्याकुलीकर्तुमसारवेदी ॥ ८ ॥

यत्क्रोधनस्यास्य धनस्य हानिं
करोत्यशंको यवनाधिपस्य ॥
भ्राता त्वदीयस्तदशंसयं मे
शिरस्यनर्थो निपतेत्कदाचित् ॥ ९ ॥

पत्यैवमुक्ता खलु नानकी तं
जगाद नैवं हृदि कल्पयेथाः ॥
भ्रातुः सतो मे न भवेदनर्थः
कस्याप्यथाप्येनमिहाह्वयामि ॥ १० ॥

---

१. धयो—क०
२. वरी—क०

युग्मम् ॥

मद्भ्रातरं तुलसि[1] गच्छ तमानयेह
त्वां द्रष्टुमिच्छति भवद्भगिनीत्युदीर्य ॥
दासी जगाम तुलसी गदिता नयेति
तस्यान्तिकं तदभिधाय निनाय तं सा ॥ ११ ॥

मया समं नानक आजगाम
सितोपलास्वादुफलानि गृह्णन् ॥
दत्वा भगिन्यै सविधे निषण्णः[१]
किमर्थमाहूतवतीत्यपृच्छत् ॥ १२ ॥

जगाद सा भूरिदिनाऽन्यपश्यं
न यत्तदाहूतवती भवन्तम् ॥
भक्ताधिकारे यवनस्य सक्त—
स्तथा यथा नेह कदाप्युपेषि[२] ॥ १३ ॥

अथावदन्नानक एतदेवं
बद्धा खगा ये खलु वागुरायाम् ॥
ते संनिधिस्था अपि नानुवन्ति
परस्पराभ्यागमभाविसौख्यम् ॥ १४ ॥

आयव्ययं शोधयितुं यवनाधिपलेखकान् ॥
स्वसः स्वसृपतिर्वक्तुव्यवहारविशुद्धये ॥ १५ ॥
नानकेनेति गदिते नानकी निजगाद तम् ॥
मासमात्रेऽधुनातीते भ्रातस्तव कुतस्त्वरा ॥ १६ ॥

---

1. तुलसी = नानकीपरिचारिका तामाह नानकी नानकमानेतुम् ।

१. जिषण्णः—क०

२. पेयुषी—क०

दारुणाद्यवनराजतो[१] भयं
मास्तु मे स्वसृपतेरिति त्वरा ॥
एवमुक्तवति नानकेऽवद-
द्विस्मितोऽथ जयरामनामकः ॥ १७ ॥

साधोः[२] प्रसङ्गाद्भवतो भयं चे-
त्तापस्तदा शारदचन्द्रतः स्यात् ॥
तथापि लोकव्यवहाररीत्या
त्वयेदमुक्तं न तदन्यथास्ति ॥ १८ ॥

आयव्ययौ शोधयितुं प्रवृत्ता
लेखान्गृहीत्वा नृपलेखकास्ते ॥
राज्ञार्पितं नानकवस्तुमूल्यं
मुहुर्मुहुः संघटयाम्बभूवुः ॥ १९ ॥

[1]शरयुगशशिनोथ रूपकाणि
स्फुटमभवन्नधिकानि नानकस्य ॥
तदखिलमपहाय याचति स्म
व्रजतुमनास्त्वरितः सतावनुज्ञाम् ॥ २० ॥

नानकीजयरामश्च ह्रीणावन्तश्च विस्मितौ ॥
बहुकृत्वः स्थितिं प्रार्थ्य स्थापयत्याहतुः स्म माम् ॥ २१ ॥

अहं पुनर्नानकमेतदाख्या-
मजानतां त्वं तदिदं क्षमस्व ॥
न नानकीं त्वं जयराममेत-
मुपेत्य गच्छेर्विमनायमानौ ॥ २२ ॥

---

१. व्य—क०
२. साधेः—क०
1. शरयुगशशिनः = १४५ रूपकाणि ।

मयैवं बोधितस्तस्थौ कृपापरवशो वशी
प्रार्थनावधिसंरम्भः साधूनां कारणोद्भवः ॥२३॥
लेखकैस्तदखिलं[1] निवेदितं
व्याजहार स निशम्य भूपतिः ॥
रूपकाणि[2] खनभोहयक्षिती[1]-
राददातु निजमप्यवञ्चकः[3] ॥ २४ ॥
पुनः प्रतिश्रुत्य निजाधिकारं
ददौ द्विजेभ्यः स धनानि धेनूः ॥
प्रसेदिवानस्य पवित्रकीर्तेः
सर्वः सुरत्राणपुरस्य लोकः ॥ २५ ॥
अनाग्रहस्तस्य निजे शरीरे
न दिव्यवस्त्राभरणादिवाञ्छा ॥
परस्य दुखं विनिवर्तयिष्य-
न्नसौ यथाशक्ति समुद्यतोऽभूत् ॥ २६ ॥
महात्मभिर्भूरिधनैरजस्रं
स चाटुकारैरुपचर्यमाणः ॥
कदापि न स्वं[2] बहु मन्यते स्म
प्रीतिं परां साधुजने बभार ॥ २७ ॥
प्रियंवदः सस्मितपूर्वभाषी
दृष्टः स्वभाग्येन जनेन येन ॥
कृतार्थमात्मानमवेत्य लोके
न तं विसस्मार कदाचिदेषः ॥ २८ ॥

१. तदिक–ख. ।
२. करणो–क. ।
३. वंचक–क. ।
1. ख-नभो-हय-क्षिती = १७००
2. "स्वं" इति पाठः "क" इत्यत्र

प्रकृतिरम्यतनुं समशोभय-
त्तरुणिमाभिनवोऽतितरामसुम् ॥
रुचिरमेव चिरं सुतपोवनं
सुरभिरेत्य नवप्रसवो यथा ॥ २९ ॥

मन्मथो वपुषि तस्य सञ्चरन्
यौवनेन बलवानपि ध्रुवम् ॥
लोहपञ्जरनिवेशितो बला-
त्केशरी–बल–पराक्रमक्षमः ॥ ३० ॥

विरज्यमानो विषयेषु नित्यं
युवापि वश्यैः करणैरकृष्टः[2] ॥
कालं प्रतीच्छन्नकरोत्स कृत्यं
न तत्परो वैतनिको यथैव ॥ ३१ ॥

वर्षद्वयं सज्जनहर्षदस्य
भक्ताधिकारं वहतो बभूव ॥
ततः सुतस्नेहसमाकुलात्मा
कालो दिदृक्षुः समुपागमत्तम् ॥ ३२ ॥

कालं समागतमसौ प्रणनाम मूर्ध्ना
मूर्धन्यजिघ्रदयमेतमथालिलिङ्ग ॥
मातुर्मुहुर्मुहुरपृच्छदनामयं[3] च
श्री नानकः सवयसां प्रतिवेशिनां च ॥३२॥

---

१. निजं–क. ।
२. कृष्ठः–ख. ।
३. दत्ताभयं–क. ।

तं पूर्णचन्द्रमिव वीक्ष्य मनोभिरामं
काल: सरित्पतिरिवोत्कलिकाकुलोऽभूत् ॥
उद्वेलतामगमदस्य च शर्मपूरो
रस्त्रैरिवोपचित[1] उज्ज्वलपूर्वपुण्यैः ॥ ३४ ॥

विश्रान्तः कृतभोजनोऽकृत कथाः पूर्वानुभूतावहूः
कालः पुत्रमपृच्छदर्जितमभूत्किं किं व्ययं प्रापितम् ॥
पुत्रोऽब्रूत यदर्जितं समगमत्तत्सर्वमेव व्ययं
पित्रोक्तं गृहमेधिनाऽपि भवता संन्यासिधर्मो धृतः ॥ ३५ ॥

नानकः सकललोकवदान्यो
नोत्ससर्ज[2] वसु यन्निजपित्रे ॥
स्नेहमस्य विनिवर्तयितुं तत्
स्वार्थ एव जगति प्रियताकृत् ॥ ३६ ॥

अथ कालमुपागतं गृहा-
ज्जयरामः प्रणनाम सादरम् ॥
पदयोः प्रणता च नानकी
पितृवात्सल्यसमुद्गताश्रुभिः ॥ ३७ ॥

कालो ददौ स्वकन्यायै द्रविणं मोदकानि च ॥
आश्वासयामास चिरं वचनैः स्नेहकोमलैः ॥ ३८ ॥

जयराम उवाच बालका-
न्स्मृतवान्नो बहुभिर्दिनैर्भवान् ॥
इह तिष्ठ निजानवन्[3] जनान्
परमानन्द इवासि मे मतः ॥ ३९ ॥

---

१. रिवोचित–क।
२. नात्ससर्ग—क०
३. ज्ञानवत्—क०

अब्रूत कालो भवतो व्यलोकयं-
श्चिरादद्दष्टात्प्रणयप्रवर्तितः ॥
तुष्टो गमिष्यामि गृहानतः परं
न शोभते मे स्थितिरत्र सत्तम ॥ ४० ॥

नानकोयमिह तिष्ठति कार्या-
त्वत्कृतादुपयमो भवतैव ॥
चिन्त्यते क्वचन चेदविगीत-
स्तन्मनोभिलषितं भविता मे ॥ ४१ ॥

गुणैरशेषैः परिभूपितस्य
तस्य प्ररूढो न निवारणीयः ॥
दोषो गुणो वैक उदारताख्यो
न मे मनो मुञ्चति तस्य चिन्ताम् ॥ ४२ ॥

राज्ञो नयेद् भूरिधनं व्ययं चे-
त्स क्रूरचित्तो यवनो भवत्सु ॥
किञ्चिद्व्ययेस्येद्[1]द्विषमन्तदानः
कलङ्कपङ्कस्य न सुध्युपायः[2] ॥ ४३ ॥

बालसिन्धुमुपाहूय तस्य मित्रमलं परम् ॥
वदाव त्वमहं चापि राजकीयधनावनम् ॥ ४४ ॥

नानकी तदनु तातमवादी-
त्त्वं पितर्वदसि नानकमेवम् ॥
अत्र तेन न परस्य कदर्यो-
प्यन्यथा व्ययमनीयत नाम ॥ ४५ ॥

---

१. पश्ये—ख०

२. सुष्ठुयामः—क०

आयव्ययविचारोभूल्लेखकैः सह भूपतेः ॥
नानकस्यैव निरगाद्राजपार्श्वे धनं तदा ॥ ४६ ॥

जयराम उवाच तदा श्वसुरं
करपीडनमस्य गुरो भविता ॥
घटना तु बहुत्र कृतास्ति मया
त्वयि यास्यति निश्चयपत्रमितः ॥ ४७ ॥

बालसिन्धुरिति नाम तवेदं
बाल एव किल यन्मतिसिन्धुः ॥
नानकं स्वसुहृदं कथयेथा
न व्ययं परधनस्य स कुर्यात् ॥ ४८ ॥

आहूयमाभिदधतुः सत्कारस्नेहपूर्वकम् ॥
जयरामश्च कालश्च कालप्राप्तमिदं वचः ॥ ४९ ॥

उदारता केयमहो परस्य
धनेषु दानव्यसनं किमेतत् ॥
प्रज्ञायते निष्ठुरचेतसो य-
स्कुर्वन्ति भूपाः कुपिताः प्रसह्य ॥ ५० ॥

त्वं देशकालकलनाकुशलः सुमेध-
स्तं बोधय प्रकृतिमेतु गृहस्थयोग्याम् ॥
पाणिग्रहाय हितबन्धुवधूसुतानां
योपाय रक्षतु धनं किमिदं करोति ॥ ५१ ॥

अहमवदमथ प्रथा कथं वो
भवति परस्य धनं ददाति वेति[1] ॥
अधिगतमधिपस्य लेखकैः किं
व्ययितमनेन धनं विचारयद्भिः ॥ ५२ ॥

---

१. स्तेति—क०

घृतमपि न किलाग्निमव्ययो[1]भूदिति
परिभावनभूतिभूरि भीतिः ॥
अहमिह न वसामि भोगलुब्धा
प्रणयति बद्धमनास्तु नानकेन ॥ ५३ ॥

क इव पवनः कियत् क्षितीशः
कियदिह तस्य च भक्तवेतनादि ॥
भवति वितरणे न नानकस्य
द्रुततरमै[2]लिविलोपिरिक्तकोशः ॥ ५४ ॥

भक्ताधिकारे लाभः कः किं ददाति च नानकः ॥
अनालोच्येति जल्पन्ति जाल्मा जानीथ तत्तथा[3] ॥ ५५ ॥

अहं न जानामि सदा सहस्थितः
कुतस्त्यमेतत्प्रददाति नानकः ॥
वराटकं वापि सहस्रमागतं
गतक्लमः किन्तु लिखामि सन्ततम्[4] ॥५६॥

जगति सुकृतनः कृतावताराः
परिणतपूर्वतपःफला निगूढाः ॥
दुरधिगमदुराचरा हि तेषा-
मितरजनैः सकलाः क्रियाकलापाः ॥ ५७ ॥

---

१. माव्ययो—ख०
२. मेलि—क०
३. ततथा—क०
४. संतत—क०
1. भक्ताधिकारः–'पटवारी' इति भाषायाम् ।

न सम्भवोन्यस्तु धनागमस्य
सिद्धिः करस्पर्शकृतास्य[1] वा स्यात् ॥
सङ्कल्पमात्रादथवोन्मिषन्ति[2]
धनानि दानाय तदीयपाणौ ॥ ५८ ॥

धनानि याचन्ति महीतलेऽस्मिन्
तावन्ति तस्यैव वशे स्थितानि ॥
निरूपयिष्यामि न वाऽस्य तत्त्वं
पुरोद्य संभावयतां जनानाम् ॥ ५९ ॥

अमुं मुहुर्मोहवशाद्भवन्तो
न खेदयत्वेष विरक्तवर्यः ॥
भाग्येन नस्तिष्ठति तावदत्र
धनं किमेतस्य पुरः किमन्यत् ॥ ६० ॥

किं म्लेच्छमृत्योभवदीदृशश्चे-
न्नाशक्यतामित्यविमर्शनेन ॥
निगूहयन्ते हि महानुभावा
जगद्भयात्स्वं विविधक्रियाभिः ॥ ६१ ॥

यदा श्रमः स्याद्धनखानचित्ते
विशोधयेत्वं निजलेखकान्याः[3] ॥
अस्माधिकं स्थास्यति तस्य पार्श्वे
भविष्यदेतद्भवतां मयोक्तम्[2] ॥ ६२ ॥

---

1. कृताथवा—ख०
2. चोन्मिष—क०
१. लेखपाला—ख
२. मानिनि—

[A]इति मया गदिते गतविभ्रमौ
　　मनसि तच्चरिते कृतसंभ्रमौ ॥
व्रज विधेहि यथामति मामिति
　　प्रतिनिगद्य वचो विरता[१] वयम् ॥ ६३ ॥

तलवंडीगते काले जयरामो महामतिः ॥
नानकस्य विवाहाय प्रयत्नमकरोत्कृती ॥ ६४ ॥

असंमतं नानकवर्मणस्तत्
　　स्वीकारितं किन्तु बलाद्भगिन्या ॥
कालस्य वंशस्थितये पृथिव्यां
　　वृद्धेन चैवं जयरामपित्रा ॥ ६५ ॥

[1]पक्षके [2]पुखरे कृतवासो
　　मूलचन्द्र इति बाहुजवर्यः ॥
स्वात्मजापरिणयाय[२] स विप्रं
　　प्रोहिणोत् विधृतनिश्चयपत्रम् ॥ ६६ ॥

वर्णवंश्यादिकं सर्वमेवोचितं
　　नानकस्यानया कन्ययेति द्विजैः ॥
बोधितः [३]पारमानन्दिरानन्दितः
　　कालमामन्त्रयिष्यन् जनं प्रैषयत् ॥ ६७ ॥

---

१. वितरातम्—क०

A. श्लो० ५० तः ६२ यावत् जयरामः कालश्च नानकं धनविषये राज्ञो विचारं, राज्ञो धनाग्रहम्, धनव्यये क्रोधंच कथितवान ।

1. पक्षके = तन्नामग्रामे ।

2. पुखरे = सुन्दरपुरे ।

२. रिगणाय—क०

३. पारमानण्दभा—क०

[1]मूलाचोणेति[1]विख्यातः पत्तके क्षत्रियर्षभः ॥
तत्कन्यायाः परिणयो नानकस्यावधारितः ॥ ६८ ॥

यूयमायात सर्वेऽपि कुलाचारविधित्सया ॥
सभार्योऽनुमुदे कालो लेख्यार्थमिति कीर्तयन्[2] ॥ ६९ ॥

युग्मम् ॥

गीतिमङ्गलमुदा[2]ऽथ बभूवुः
तस्य सद्मनि सगोत्रहितस्य ॥
सज्जता समजनि प्रयियासो—
राशु किश्व सुररक्षपुराय ॥ ७० ॥

[3]कृष्णो नानकमातुलोस्य जनको रामः स्वकीयैर्वृतः
कालो लालपुरस्सरो निजजनैस्तद्वैणिको मर्दनः ॥
आदित्ये निरगुर्बृहस्पतिदिने प्राप्ता रथैरुत्तमै—
र्देवत्राणपुरे परस्परमभूदालोकनादुत्सवः ॥ ७१ ॥

नानकं नानकीं दृष्ट्वा जयरामं च तेऽखिलाः ॥
प्रसेदुराशिषः प्रोचुरालिलिङ्गुर्यथायथम् ॥ ७२ ॥

मातामहादय उदीर्णमुदस्तदानी—
मुद्भ्रम्य नानकशिरस्यकिरन्वसूनि ॥
दासाः परे परिजना अपि तान्यगृह्णन्
ज्योतींषि शीतकिरणस्य यथा चकोराः ।७३।

---

1. मूलाचोण = क्षत्रियप्रसिद्धिः ।
2. सुररक्षपुरम् = ग्रामनाम सुरणात्रपुरस्य पर्युषिवाच क नाम ॥
१. चोणेतितिनिख्या—क०
२. कीर्तवत्—क०
३. कृ भो—क०

विश्रम्य तत्र विहितातिथिसत्क्रियास्ते
जग्मुः परेद्य सुपुरीमजितेन गुप्ताम् ॥
प्राप्ताः सदेशमवदन्निधिमिश्रमङ्ग
त्वं मूलचन्द्रनिकटे कथयागतान्नः ॥७४॥

विप्रो गतः स तमुवाच तवागतास्ते[१]
कालादयः किल कुलाचरणाय मान्याः ॥
आयान्तु मे मुदितमित्यभिधायमूल-
स्तानानिनाय[२] परिरभ्य नमन् यथावत्[३] ॥७५॥

कुलाङ्गनानां कलगीतिरेव
तोषाय तेषामलमास्त तावत् ॥
किं वर्ण्यतां तत्सहकृत्वरी चेत्
संभावना मूलकृता विशिष्टा ॥ ७६ ॥

[1]सुलक्षण्या विवाहाय वृते नानकवर्मणि ॥
[2]मूलचन्द्रेण सर्वेंपि सामञ्जस्यात्सुखावहाः[४] ॥ ७७ ॥

भोजनासनसत्कारैर्नृत्यगीतमहोत्सवैः ॥
तोषिता स्तत्र ते चक्रुः कन्यासम्माननादिकम् ॥ ७८ ॥

---

1. सुलक्षणी = नानकपत्नी ।
2. मूकचन्द्रः = पिता सुलक्षण्याः ।
१. कदा—ख०
२. निना—ख०
३. नमन्यथास्त्वसू—ख०
४. सुखाभवन्—ख०

प्रेमालापान् सत्परीहासपूर्वा–
नन्योन्येन ज्ञातयः प्रीतिभाजः ॥
चक्रुर्दैवात्[1]सङ्गता कार्यभारैः
स्वैः स्वैर्नानानीवृतः सेवमानाः ॥ ७९ ॥

मूलमापृच्छय मुदिता वरपक्ष्या[2] ययुर्गृहात् ॥
द्वयेपि चक्रुः संभारानुद्वाहाय महोत्सवान् ॥ ८० ॥

उत्फुल्लपङ्कजदृशं तपनीयगौर—
माजानुबाहुमतिविस्तृतवक्षसं च ॥
नत्वा स्थितं सदसि नानकमन्वयक्तं
राजैकदा कथय किं तव नाम सौम्य ॥८१॥

मां नानकनिराकारं कीर्तयन्ति महीपते ॥
इत्युक्ते[3] तेन सोवोचन्नास्यार्थेवगतो मया ॥ ८२

[1]पारसीकवचनैर्जयरामो
म्लेच्छशास्त्रगदितोपनिषद्भिः ॥
बोधयन् यवनराजमवादी—
च्छृण्वतां सकलतत्त्वबुधानम्[4] ॥ ८३ ॥

चैतन्यं हि गुणक्रियाकृतिपरिच्छेदैरनास्कन्दितं
सत्यं दृश्यमिदं जगद्बहुविधं यन्मायया कल्पितम् ॥

---

1. परसियनभाषायामल्लोपनिषदा प्रमाणं दददवदज्जयराम इति भावः ।

१. देवा—क०

२. वर पक्षा—क०

३. प्रत्युक्ते—क०

४. तद्विबुधानाम्—क०

जीवो ज्ञानदृशा तदेव न परो ज्ञानी जनो लीलया
कुर्वन्नस्य[१]खिलो[2]द्यमं न मनुते भेदं स्वतो ब्रह्मणः ॥ ८४ ॥

तन्निश्चित्य निराकारो नानकः कथितोऽमुना ॥
[1]आहार्ये नामरूपे हि चैतन्यं तन्निराकृतिः ॥ ८५ ॥

दुर्जनेषु यवनेषु हसत्सु
सज्जनेषु परितुष्टमनस्सु ॥
पाणिपीडनममुष्य बभूव
कच्चिदित्यवनिपः समपृच्छत् ॥ ८६ ॥

नेत्यभाषत ततो जयरामः
सस्मितं पुनरुवाच नरेन्द्रः ॥
ज्ञानगर्भितगिरश्च विरक्ताः
किं न वक्त्ययमलब्धवधूकः ॥ ८७ ॥

ज्ञानिनो [3]गगनदत्तपदाग्रा
[4]ब्रह्मवादनिनदैः कृतहेषाः ॥
कामिनीजनकटाक्षकशाभि-
स्ताडिताः पथि ऋजौ प्रचलन्ति ॥ ८८ ॥

---

1. यदा नानको निराकारस्तदा कथं तस्य रामरूपते-
ति शङ्कां समाधत्ते जयरामः ॥
2. किल पाठो युक्तः ।
3. शीर्षासनं कुर्वन्त इति भावः ।
4. सततम् 'ॐ' इति ब्रुवन्तः ।
१. स्याखिलो—क०

को न मोक्षनगरं प्रविविक्षेत्[1]
इन्द्रियाणि यदि न स्युरुदाराः ॥
रक्षिणो विषयपाशनिबद्धा-
प्रक्षिपन्ति मनुजान्भवकूपे ॥ ८९ ॥

वाग्भिरेव पदवी न दवीय-[2]
स्यङ्गकर्मभिरियं दुरवापा ॥
जीवतैव[3] समुपति[4] विबोधे
कः स्वरूपनिगमाय यतेत ॥ ९० ॥

भिक्षुकोऽधिगतमानसराज्यो
भिक्षणं यदि जहाति विमूढः ॥
क्षीयते स जठरानलतापै-
रापदं व्रजति नान्यदुपैति ॥ ९१ ॥

स्वर्णनिर्मितरसायनयोगा-
योगसाधनविमोक्षपदव्यः ॥
शास्त्रकारकथिता वितथाः किं
किन्तु सोऽस्ति विरलोऽत्र कृती यः ॥ ९२ ॥

कथ्यते स्म कथितं सदसीत्थं
चाटुकारनिवहो बहुराज्ञः ॥
नानकस्तदनु सिन्धु गभीरो
ज्ञाननिर्मलमनाः समचष्ट ॥ ९३ ॥

---

१. प्रविविक्षुः—क.
२. दवीयं—क.
३. जीवतेन—क.
४. समयैति—क.

सत्यमेव समभाषि भवद्भिः
प्रोन्नतं पदमदः प्रतिपित्सोः ॥
विघ्नजालबहुलाकिलचर्या-
पातमत्र चपलः समुपैति ॥ ९४ ॥

निरावरणमानन्दमनुभूतवतः पुरः ॥
किमुर्वशी सुकेशी वा वराकी किं[1] जगत्त्रयम् ॥ ९५ ॥

रक्षितेपि चतुरङ्गमभूमिः
सुस्थिते करिणि सत्तुरगेपि[2] ॥
कश्चिदेत्य सुभटो रणरङ्गे
खड्गमुत्सृजति नायक एव ॥ ९६ ॥

यो ब्रह्मवादमुखरः स खरो नरो न
मूढेषु किं श्रुतिशिखास्वरसैर्विकीर्णैः ॥
स्वान्तःसुखाय खलु तत्त्वमिदं विचेयं
देयं सते मतिमते भवभीरवे वा ॥ ९७ ॥

[1]राजा स्वप्ने भिक्षुतामागतश्चे-
त्कश्चित्कालं तापमाप्नोति दैन्यात् ॥
उन्निद्रोयं स्वं स्मरन्भक्षुकत्वं
स्मेरो भूयो भिक्षयावर्तते किम् ॥ ९८ ॥

न ज्ञानिनः शृङ्गमुदेति किञ्चित्
क्रियासमैव व्यवहारतन्त्रे ॥
विकुर्वतेन्य[1] क्षतिलाभशोकै-[3]
र्मिथ्येति न ब्रह्मविदो व्यथन्ते ॥ ९९ ॥

---

१. वध्या किं किं—क.
२. तुरगवरेपि—क.
३. प्रेक्षति—क.
1. यदि राजा स्वप्ने भिक्षुर्जायते तदा सन्नप्युत्थितः स किं पुनर्भिक्षां चरितुमिच्छति ?

न निगूहयितुं शक्या कृत्रिमा ब्रह्मवादिता
रागद्वेषादयश्चारा विवृण्वन्ति क्षणे क्षणे ॥ १०० ॥

यत्रास्ति [1]तेपह्नुवते नितान्तं
न यत्र ते ज्ञापयितुं यतन्ते ॥
तद्ब्रह्म विद्येयममन्दभाग्यैः
स्वर्णक्रियेवाधिगतास्ति कैश्चित् ॥ १०१ ॥

नृत्यगीतमिव जीवनहेतुः
शिल्प मे तदपि न क्षितिपाल ॥
कीर्त्यतां प्रभुजनस्य यदग्रे
त्वं सुधीरसि तदुक्तमिहैषत् ॥ १०२ ॥

गिरोगुरोश्चनः श्रुत्वा निःस्पृहस्येति भूपतिः ॥
कर्मठा यवनाः सभ्याः सर्वे मत्सरिणोऽभवन् ॥ १०३ ॥

कालेतीते तेऽवदन्भूमिपालं
सम्पत्त्या त्वं नानकं नातिशेषे ॥
ब्रह्माद्वैतं मन्यते स्वं त्वदीयै-
रिक्थैः ख्यातः कर्णवत्स्वर्णदाता ॥ १०४ ॥

श्रुत्वेति राजा प्रतिभाषते स्म ता-
भाग्यस्य नाहं प्रभुरस्मि कस्यचित् ॥
जग्राह यत्किन्तु मदीयरूपकं
व्ययं [३]ततस्तस्य विदन्तु लेखकाः ॥ १०५ ॥

अतिप्रवीणोऽखिललेखकाना-
मूचे ततो यादवरायनामा ॥

१. पुह्न—क.
२. गुरोपनः श्रु—ख.
३. तस्तस्य—क० ।
1. उभयत्र "क + ख" इत्यत्रायमेव पाठः । परन्त्वयं न युक्तियुक्त इति ।

पुण्यस्य मूल्यं नृपतेश्च वित्तं
राजाज्ञया नानक योजयस्व ॥ १०६ ॥

ओमित्युक्त्वा नानको लेखकैः स्वै-
स्तल्लेखानां स्वस्य लेखस्य चापि ॥
चक्रे सम्यग्योजनामिन्दु[१]वह्नि[1]-
वह्नि[2]द्रव्यं[2] नानकस्यात्यशेत ॥ १०७ ॥

लेखकविद्यां बह्वीं यादवरायो दुराशयस्तेने ॥
किन्तु न शेके भूते छलः पुरो धीमतां क्रमते ॥ १०८ ॥

धनखाननृपस्य पुरोऽकथय-
त्स च नानक एव महासुजनः ॥
विधुवह्निगुणा[4]स्त्वयि तस्य न ते
नृप धारय ते सकदर्यमपि ॥१०९ ॥

निशम्य तद्भूमिपतिः प्रसन्नः
प्रसादवस्त्रैस्तमलञ्चकार ॥
ऊचे स्वकीयं च गृहाण सौम्य
द्रव्यं सहस्रत्रयमस्मदीयम् ॥ ११० ॥

ततो भवानीदासेन कोशाध्यक्षेण तत्क्षणम् ॥
नानकाय नृपेणोक्तं द्रविणं प्रतिपादितम् ॥ १११ ॥

---

१. वह्नि—० ।
२. वह्निद्रव्यं—क० ।
1. इन्दुवह्निवह्निः—३११ ।
2. यादव रायः—लेखकः ।
3. भवानीदासः—लेखकः ।
4. विधुवह्निगुणाः—३११ ।

धूलिः खलानां मुख [1]आससञ्ज
स्वभावविघ्नो[2] विरराज सम्यक् ॥
आकाशकल्पः किल कालसूनुः
यशः शशाङ्कप्रसरावदातः[3] ॥ ११२ ॥

इति श्रीजगद्गुरुनानककथायां नानकचन्द्रोदयसमाख्यायां
नृपसम्प्रसादो नाम चतुर्थः प्रस्तावः ॥

---

१. प्राससज्ज—क० ।
२. स्वभावविघ्नो—क० ।
३. प्रस एव—क० ।

पञ्चमः प्रस्तावः

हंसस्थिता कुमुदकुन्दहिमावदाता
वीणागुणेषु तरलाङ्गुलिराविरास्ताम् ।
भक्तस्य मे हृदि तमांसि विधूनयन्ती
शक्तिः सपुस्तककरा परमस्य पुन्सः ॥ १ ॥

कन्यां तुलादिचतुरः प्रविहाय कृष्णां
[१]भीमादिकानिव निरीक्ष्य हतं प्रतापम् ॥
पूषोत्तरां दिशमुपेत्य चिराय शीतं[1]
श्वानं युधिष्ठिर इवानुगतं[२] निनाय ॥ २ ॥

परागपिष्टातभरेण रञ्जयन्
दिग्वारनारीमुखमुन्मुखः परम् ॥
पिकालिगीतौ [2]सुरभिः समाययौ
[3]कुसुम्भकौसुम्भपटो विटो यथा ॥ ३ ॥

ताम्रैराम्रदलैरुदीतमुकुलैस्तत्पल्लवग्रन्थिभिः
मत्तानां परितः कुहूरिति मुहुः पुंस्कोकिलानां कलैः ॥
पुष्पेषु स्फुटरेणुरञ्जितमुखैर्गुञ्जद्भिरिन्दिन्दिरैः
स्वान्तं हन्त तपस्यतामपि तदा लोलं वसन्तो व्यधात् ॥ ४ ॥

---

१. मीनादि—ख० ।

२. गर्म—क० ।

1. शीतकालः उत्तरां दिशं गतः ।

2. वसन्ततुः समागतः ।

3. कुसुमो रागविशेषो येनोपनयनसंस्कारे पटो रज्यते तेन रक्तः पट इव पीव इति भावः ।

आशासु गन्तुमनसा सहसोपगूढा
गन्धेन केरल वधूकुचकुङ्कुमानाम्[१] ॥
गोदावरी विकचपङ्कजरेणुरक्ता
वाता ववुर्मलयशैलकृतावताराः ॥ ५ ॥

फुल्लैः पलासविपिनैरपनीतपत्रै-
रङ्गारराशिरुचिरैर्हृदयानि दारात्[२] ॥
ज्वालां मुहुर्विरहिणामलभन्त कान्ता
स्नेहेन हन्त नितरां परिभावितानि ॥ ६ ॥

[1]पाटलाकरुणकाञ्चनारजं
माधवीललितसप्तलाभवम् ॥
अत्यवर्तत सुगन्धमात्रजो
योगियूथमिव नानको वशी ॥ ७ ॥

कुसुमावचये मृगीदृशो
निचितास्याः श्रमवारिविन्दुभिः ॥
विपिने विपिने विलोकिताः
पथिकानां हृदयान्यपाहरन् ॥ ८ ॥

स्मर नरपतिशासनं समन्ता-
त्पिकनिकटे परिघोषयत्यदोषम् ॥
त्यजतु किमिति मानिनी न मानं
[2]प्रविशतु किं न विलासवेश्ममुग्धा ॥ ९ ॥

---

१. कंकुमाना—क० ।

२. रंगार—क० ।

1. आतरुण इति पाठो युक्तः ।

2. उदासिमतप्रपञ्चप्रपञ्चितेप्यस्मिन् दृश्यतां शृङ्गाररसच्छटा ।

आर्त्विज्यमुत्तममुपेत्य चिरायखिंगैः[1]
[2]शृङ्गस्त्रुवानुपवहद्भिरनङ्गयज्ञे ॥
अश्लीलगीतिनिगमस्य निबद्धवर्गैः
पारायणं प्रवितथं पथि पथ्यकारि ॥ १० ॥

नवं देशमुपादाय राजेव सुदुरासदः ॥
क्रमेण कर्कशकरः प्रतताप प्रभाकरः ॥ ११ ॥

पांशुः स्पृशन्नपि पदे परितापहेतु-
र्व्याजेन दुर्जन इवातितरां सुशीलः ॥
सन्तापिनोऽपि दिवसाः परिणामरम्या[3]
दीर्घास्तपोव्यतिकरा इव ते बभूवुः ॥ १२ ॥

चर्चाचन्दनचन्द्रकर्दमकृता पुष्पद्रवैरूक्षणं
मालामल्लिशिरीषपद्मरचिताः शाला उशीरोद्भवाः ॥
अस्त्वेतत्सकलं निदाघशमनं तत्कालतापापहाः ॥
कान्ताः किन्तु समुन्नतस्तनभरा नीता भुजाभ्यन्तरम् ॥ १३ ॥

आजीविष्यन्पान्थाः कथमिव वियोगानल शिखा
विशुष्कैर्हृत्पद्मैर्यदि किल कृपाक्रान्तमनसा ॥
प्रपापा[१]लीलीलास्मितमतनुनेत्रा ध्वनिहितं
समौक्षिष्यद्धात्रा पथि पथि न जीवातु सुहितम्[२] ॥ १४ ॥

मेघाद्यैर्हलितेन्द्रनीलमलिनैराकाशमाच्छादयन्
फुल्लैरर्जुनसर्जनीपकुटजैः सर्वा दिशो वासयन् ॥

---

1. भृङ्गैरिति युक्त पाठः ।
2. "क" इत्यत्र "स्त्रु" इति पाठः "ख" इत्यत्र 'स्तु" इति पाठः परन्त्वयुक्तिकः ।
3. तुलना = "दिवसाः परिमापरमणीयाः"—अभि० शाकु०

१. पालीला—क०
२. विहितम्—ख०

मत्तांश्चातककेकिदर्दुरगणान्कुर्वन्नखर्वस्वरान्
आषाढः समुपेत्य सो धुरिवनं तापं जनस्याहरत् ॥ १५ ॥

अथ नानकस्य निरधारि शुभः
शुचि शुक्लवारणतिथौ गणकैः ॥
करपीडनाय समयः सुखदः
कुलयोर्द्वयोः सुचिरमुत्सवकृत् ॥ १६ ॥

जयरामस्य पत्रेण तद्विज्ञापय हृष्टयोः
मातापित्रोर्नानकस्य हृदि हर्षो ममौ न सः ॥ १७ ॥

सम्बन्धिबान्धवसगोत्रनिमन्त्रणाय
दूतान्निदेश्य मुदितो निजगाद[१] कालः ॥
बोलाररायनिकटे तव किंकरस्य
भावी प्रभोः परिणयः शुचि शुक्लपक्षे ॥ १८ ॥

श्रुत्वा ततस्तद्गुणात्स किमेवमुक्तं
श्रीनानको न यदिमं व्यपदेशमर्हेत् ॥
प्राणप्रियो गुणनिधिः स हि मे महात्मा
[1]कैकर्यमस्य सकलोऽपि जनो विदध्यात् ॥ १९ ॥

आनन्दथुर्गम महानधुना विवाहं
श्रुत्वा सुतस्य तव सज्जनसंसदिन्दोः[२] ॥
हस्त्यश्वपत्तिशिविकारथतूर्यभूषा
केत्वादिकं यदुचितं तदितो गृहाण ॥ २० ॥

वरयात्रामहं कुर्यां किन्तु सैन्यस्य भूरिणः ।
[३]सम्बाधे सति बन्धूनां सत्कारे व्यग्रता भवेत् ॥ २१ ॥

---

१. मुदितानिजगाद—क०
२. संसदिदोः—क०
३. सम्वादे—क ।
1. किंकरस्यभावः ।

कालोऽवादीदजितरथाव:[1]
कन्यापक्षे सकलधुरीण: ॥
अस्मत्पक्षे त्वमसि महात्म–
न्नन्यूनत्वं कथमपि भावि ॥ २२ ॥
कन्यापिता मूलचन्द्र: पक्षके[2] जितरक्षित: ॥
तलवन्द्यां[3] तव विभो बाहुच्छायाश्रिता वयम् ॥ २३ ॥
त्वमिह रक्ष पुरीमनुमन्यतां
व्रजतु जन्मजनो यदभीप्सितम् ॥
तदखिलं कलयाभिभवद्यश:
शशधरस्य न कुत्र महोदय: ॥ २४ ॥
बोलाररायेण विसर्जितास्ततो
विचित्रवस्त्राभरणा स्रगुज्वला ॥
नानाविधं वाहनमाश्रिता: शुभं
प्रतस्थिरे कालपुरस्सरा: शनै: ॥ २५ ॥
मृदङ्गमञ्जुध्वनिभिर्गीतिभि: कुलयोषिताम् ॥
वाडत्रानां शुभालापै:[4] सा यात्रा शुशुभेतराम् ॥ २६ ॥
इन्द्रसेनो नन्दलाल: परसारामनामक: ॥
फिरंदाख्यो जगद्रायो लालचन्द्रो महामना: ॥ २७ ॥
जटमल्लो जगन्मल्लो मल्ल शीतलपूर्वक: ॥
हरिपूर्वोदयालुश्च[5] रायो लालो विनिर्गता:[5] ॥ २८ ॥

---

१. अजितरथाव: = कन्यापितामह: ।

२. पक्षके = पक्षकपत्तने ।

३. तलवन्दी = ग्राम: ।

४. लापै—क०

५. पिनिर्गता—क०

1. इन्द्रसेन:, नंदलाल,
परसाराम:, फिरंद:, जगद्राय: लालचन्द्र:, जरमत्थ:, शीतलमञ्च: हष्टिदयाल: लालराम: एते वरमात्रिका: आसम् ।

युग्मम्

सर्वे सुरत्राणपुरं प्रयाताः
समागमोभूत्स्वजनैः समग्रैः ॥
नानाम कालं जयरामवर्मा
स नानकोऽन्यानपि बन्धुवृद्धान् ॥ २९ ॥

कालं च कुलवृद्धांश्च जयरामः प्रमाणयन् ॥
सामग्रीं सज्जयामास[१] वरयात्राविवाहयोः ॥ ३० ॥

हरिद्यालुमवन्दत नानक-
श्चरणयोः सुचिरं धृतमस्तकः ॥
विनयमस्य विलोक्य स पिप्रिये
गुणगणांश्च पुरा स्वनिरूपितान् ॥ ३१ ॥

श्रीनानकस्य जयजीव चिराय वत्से-
त्याशीर्वचः स सुमना बहुशः प्रयुज्य ॥
[1]सौवस्तिकीर्विधिवदारभत क्रियास्ताः
वैवाहिकीश्च जयरामनियुज्यमानः ॥ ३२ ॥

मङ्गलप्रतिसरेण महात्मा
पाणिपङ्कजगतेन मनोज्ञः ॥
गीतिभिश्च मुरजध्वनिभिश्च
स्त्रीजनैः स्नपित उल्लसितोऽभूत् ॥ ३३ ॥

सम्बन्धिबान्धवसनाभिधरा सुरेभ्यः
श्रीनानको वसनमाभरणञ्च दिव्यम् ॥
पुंस्त्रीसमञ्जसमदादपि सेवकेभ्यो
वाञ्छानुरूपमुपनम्रविचिन्तितार्थः ॥ ३४ ॥

---

1. सौवारितकीः = विवाहात्पश्चाद्विधिः ।

१. सज्जयामास—क०

मणिमयाभरणो न परिष्कृता
कुलपुरन्ध्रिगणैरथ नानकी ॥
व्यधितमङ्गलगीतिमहोत्सवैः
परिणयोचितसंभृतिसज्जताम् ॥ ३५ ॥

वस्त्राणि सुमहार्हाणि विचित्राणि तनूनि च ॥
नानको धनखानाय ददौ स प्रासदत्परम् ॥ ३६ ॥

धनखाननृपः सहगन्तुमना
जयरामनिवारित आस्तनिजाम् ॥
ध्वजिनीं निदिदेश च दूष्यवरं[1]
नगरीव यदा वृणुतेऽस्य महीम् ॥ ३७ ॥

अनुक्त एव क्षितिपालवल्लभो
जनः समग्रोपि जगाम कौतुकात् ॥
विवाह शोभामवलोकितुं परे
सहस्रशो नानकवर्मणोऽद्भुताम् ॥ ३८ ॥

नटनर्तकवन्दिमागधा
बहुरूपै रमयन्ति ये[2] प्रभून् ॥
गणिका गुणिनस्तथापरे
शतशो जग्मुरथैन्द्रजालिकाः ॥ ३९ ॥

दध्यक्षतैस्तिलकितोधृत[3]मल्लिमाल्ये[4]
नीराजितः कुलवधूभिरुदीतगीतिः ॥
श्रीनानको हरिदयालुमुखैर्द्विजेन्द्रै-
[5]राशासितः श्रुतिपथैरथ सुप्रतस्थे ॥ ४० ॥

---

१. हष्ट—क०
२. ते प्रभून्—क०
३. घृतमल्ल—क०
४. माल्यं—क०
५. राशंसितः—ख०

कुलाचारादश्वां मणिपुरटपर्याणरुचिरां
समारूढः शुभ्रां कनकविलसच्छेखरधरः ॥
वसानः काश्मीरं वसनमतिसूक्ष्मं तनुरुचा
सुवर्णस्पर्धिन्या जननयनलेह्यः[1] स शुशुभे ॥ ४१ ॥
तनुकौंकुमवस्त्रसंवृतो
मणिहेमाभरणैर्महोज्वलः ॥
निदिशन्नधिकारिणोखिलान्
जयरामः शुशुभे गजस्थितः ॥ ४२ ॥
करिणमतिमहान्तं संश्रितोरूपकाणि
प्रतिपथमथमुञ्चन् भिक्षुकेभ्यः कराभ्याम् ॥
तनयमनुगुणं तं रामचन्द्रस्य पश्यन्
दशरथ इव कालो निर्भरानन्दमापत् ॥ ४३ ॥
स्वस्य यद्वसनमाभरणं च
तादृशं मम चकार महात्मा ॥
मत्तनागमधिरूह्य महान्तं
सेवितोहमगमं बहुभृत्यैः ॥ ४४ ॥
मां विलोक्य मनुजाः प्रजजल्पुः
कोपि याति वरसोदर एषः ॥
नानकस्य सचिवोयमतोन्ये
[1]सैन्यकोयमिति तत्र परे च ॥ ४५ ॥
अधिगतः शिविकां स[2] हिरण्मयीं
हरिदयालुरशोभत पण्डितः ॥
परिणये दशकन्धर विद्विषो
गुरुवशिष्ठ इवातिप्रतिष्ठितः ॥ ४६ ॥

---

१. पन लेह्यः—क० लेत्द्यः—ख०

२. सहि—क०

1. एकत्र "सैम्ययो" इति अपरत्रै "सैन्यपोय" इति परन्तु "सैन्यपः" इति युक्तः पाठः ।

शिविकारथहस्तिवाजिनां
यदभीष्टं तदुपाश्रितास्ततः ॥
अचलन्मुदिताः स चाभयः
सकलाः कौङ्कमवाससोज्वलाः ॥ ४७ ॥

मर्दनो वैणिको वैणिकैर्भूरिभिः
सङ्गतो वादकाध्यक्षतान्यागतः ॥
वीणया वर्णयन्नानकीयं यशो
हस्तिना प्राचलत्स्वर्णपट्टोज्वलः ॥ ४८ ॥

गजे क्रमेलके सेतौ धृतादुन्दुभयोऽनदन्
काहलावेणुवीणाश्च मृदङ्गाश्च समन्ततः ॥ ४९ ॥

मन्तद्विरेफकलगीतिमनोहराणि
पुष्पैर्नतानि विपिनानि विलोकमानः ॥
ग्रामान्पुराणि रुचिराणि ययौ महत्या
श्रीनानको जनतया सहितः सुदूरम् ॥ ५० ॥

नृत्यद्भिः सद्गीतसक्तैस्तदन्यैः
विक्रीणद्भिः पण्यमन्यैरथेषु ॥
हर्म्याकारैर्हस्तिभिर्जन्यवृन्दं[1]
दृष्ट्वा[2] मेने जङ्गमं पत्तनं[3] तत् ॥ ५१ ॥

[4]रागिरायः[1] पथिपथि वृक्षमासजन्त्यो
गुल्मिन्यो निपतन्नुपादिशन्नमुष्य ॥
संसारे किम्नु विरसोऽसि शीघ्रमेव
तारुण्यं सफलय कामकेलिभिस्त्वम् ॥ ५२ ॥

---

१. जंन्य—क०
२. द्रष्टा–ख०
३. पतनं—क०
४. रागीरायः—क०
[1] रागिराय इति नाम ।

ग्रामे ग्रामे पत्तने पत्तने च
[1]वद्धश्रेणिर्जन्ययात्रां दिदृक्षुः ॥
चित्राकारः सक्तचित्तेक्षणत्वा-
ल्लोकै लोकोऽलोक्यत प्रत्युतैभिः ॥ ५३ ॥

दृष्ट्वा महानगरसीम्नि नदीं सुतीर्था-
मुत्फुल्लपङ्कजपरागपिशङ्गिताम्बु ॥
आज्ञापयन्नधिकृतान् जयरामवर्मा
स्थित्यै जनस्य करिणोवरुरोह धीरः ॥ ५४ ॥

पूर्वमेव खनकैः समीकृतं
स्थापितोरुपटमंडपं[2] ततः ॥
संस्तृतं विविधरम्यसंस्तरै-
र्नानको गृहमिवाविशद्वशी ॥ ५५ ॥

गृहा [3]वंशुर्वस्त्रमयास्तदंतरे
समन्ततः पङ्कजकोरका इव ॥
चिरन्तनीवात्र समस्तवस्तुभि-
र्वणिग्वरैः सद्विपणिर्व्यतन्यत ॥ ५६ ॥

[1]स्नातानुलिप्तेषु जनेषु तत्र
स्वस्थानसंस्थेषु [4]गतक्रमेषु ॥
भक्ष्यं च भोज्यं वसु गन्धमाल्यं
ददौ यथा स्वं जयरामवर्मा ॥ ५७ ॥

---

१. वृद्धश्चेणि—क०
२. मंडयन्ततः—क०
३. बकुव—क०
४. गृह्णीत—ख०

क्रय्यं क्रीणाति यः कश्चित्तस्मै दत्तयथेप्सितम् ॥
मूल्यं गृहाण मत्कोशात् जयरामोवदद्विशः ॥ ५८ ॥

आज्ञापयद्वारवधूकदम्बं[1]
महाजनानां शिविराण्युपेत्य ॥
तथा हि तौर्यत्रिकमाचरेत
यथा मनो मोहमुपैत्यमोषाम् ॥ ५९ ॥

पानभोजननिवाससुखेन
प्राकृताश्च पशवश्च सुतृप्ताः ॥
अन्यतो[2] जिगमिषन्न कदाचित्
तद्विहाय शिविरं सुवरीयः ॥ ६० ॥

नानाविनोदवचनै[3]र्बहुभिः कथाभिः
तौर्यत्रिकेण रजनीमतिवाह्य तत्र ॥
प्रातश्चचाल वरयात्रिजनो गभीर-
भेरीनिनादपरिपूरितदिग्वितानः ॥ ६१ ॥

भेरीरवाकर्णनकृष्टचित्ता
ग्राम्या यथो दूरनिवासिनोपि ॥
जपादुपागत्य विलोक्य शोभां
स्वं मेनिरे जन्म जगत्यमोघम् ॥ ६२ ॥

वसतयः[1] पथि जन्यजनस्य ताः
समभवन्नधिकाधिकशर्मदाः ॥
प्रतिजनं जयरामनियोजितै-
रधिकृतैर्यदभीष्टमपृच्छत ॥ ६३ ॥

---

१. द्वारवधू–क०
२. तोजिगमि–क०
३. विदोद–क०
1. वसतिः ग्रामः वसन्तियत्रजना इत्यर्थः ॥

सरांसि सम्फुल्लसरोरुहाणि
सरस्वतीस्वादुजलाः सुतीर्थाः ॥
वनानि पुष्पैरधिवासितानि
विलोकयन्तो मुदिता ययुस्ते ॥ ६४ ॥

योजनव्यवहितां वरयात्रां
मूलचन्द्रमवदन्नथ चाराः ॥
पक्षके समुपगम्य स ऊचे
[1]संन्यधात्स इह जन्यसमाजः ॥ ६५ ॥

आहूय सूनुमगृणादजितोरधावो
वृद्धोऽस्म्यहं किमपि कर्तुमनीश एषः ॥
त्वं पुत्र मूलतनयोपयमे यतस्व
न न्यूनता भवति येन कथंचिदस्य ॥ ६६ ॥

हितः पितरमाचष्ट तेजस्ते तरुणं विभो ।
साधयिष्यत्यशेषं यदहमभ्युच्चयस्ततः ॥ ६७ ॥

हितोरधावः स्वजनानवादी-
दायातु सेना चतुरङ्गिणी मे ॥
अहं वरस्यानयनाय यामि
मूलेप्सितं यूयमिहाचरन्तु ॥ ६८ ॥

चातुर्वर्ण्यं पक्षकान्निर्जगाम
सेनायुक्तः सन् मनुष्यैर्हितश्च ॥
भेरीध्वानैर्धूनिताशा विताना
नानायानैर्जन्ययात्रां ययुस्ते ॥ ६९ ॥

---

१. सन्य–क०

[1]इतो नर्तयन्तो वराश्वान्प्रवीणा-
ततो बाहुजा वाजिनः क्रीडयन्तः ॥
नमच्छेखरैस्ते शिरोभिः प्रणेमुः
समाजग्मुरन्योन्यमानन्दभाजः ॥ ७० ॥

[2]उष्णीषाग्रान् लम्बमानान् सुवर्ण--
दाम्ना सार्धं किञ्चिदावेष्टयन्तः ॥
आजानेयान्नर्तयन्तो युवानो
वक्रैर्वेषैः कांश्चिदूहुः[1] श्रियं ते ॥ ७१ ॥

नत्याश्लेषो क्षत्रियज्ञातिमुख्यै-
रास्तां प्रीत्या पक्षयोः संसृजद्भिः ॥
संश्लेषोभूत्प्रीतिभाजा हि तेन
सान्द्रानन्दं पारमानन्दिना च ॥ ७२ ॥

संगम्य जग्मतुः स्वच्छे वाहिन्यौ वितते ततः ॥
सुलक्षणी श्रियोभूमिं[2] मूलचन्द्रमहोदधिम् ॥ ७३ ॥

पत्तयः करिहयेषु पताका
वादकाश्च[3] रथराजिरपूर्वा ॥
सादिनस्तदनु वारणवृन्दं
सा क्रमादिति ययौ वरयात्रा ॥ ७४ ॥

ददुः पदं सदश्वास्ते न न्यूनमधिकं चमूः
ययौ वेदिरिवाबद्धा निर्वाते तौ स्थितेव सा ॥ ७५ ॥

---

१. काचिदु—क.

२. श्री प्रभवं—क०

३. मादका—ख०

1. हितोरथावस्य वरमानेनु गच्छतो वर्णनम् ।

2. वरयात्रिकाणां वर्णनम् ।

भेरीणां मुरजानां वेणूनां काहलानां च ॥
नादः पक्षकनगरे वरयात्रामागतामगदत् ॥ ७६ ॥

बालकास्तरुणवृद्धवधूव्यः[1]
प्रेक्षितुं निरगमन् गतसंख्याः ॥
हर्म्यमारुरुहुरुत्कलिकान्या
भूषिताः प्रतिगृहं कुलवध्वः ॥ ७७ ॥

वलभ्या सौवर्ण्या कनककुथसत्सारिगतया
ययुः[2] शुभ्रैर्दन्तैर्मणिवलयिभिर्दानकरिणः ॥
मृगा मंदा भद्राः पथि पथि च मिश्राः करिवरा-
श्चलन्तः शैलेन्द्रा इव रुरुचिरे धातुखनिभिः ॥ ७८ ॥

आरट्टाभिजनैर्वनायुजनितैः कम्बोजदेशोद्भवैः
वाह्लीकैरथपारसीकजनिभिः सिन्धूद्भवैस्ताजिकैः ॥
सामुद्रैर्हरिभिः समीरगतिभिः पर्याणरत्नोज्वलैः
धाराः पञ्चधृताः प्रपञ्चचतुरैः संसूचिताः सादिभिः ॥ ७९ ॥

कपोललोलन्नवकुण्डलास्ते
गौराम्बराः सादिवराः सदश्वान् ॥
अनर्तयन्सम्यगुपेत्य वीथीः
प्रख्यापयन्त्यः करकौशलं स्वम् ॥ ८० ॥

प्रेक्षकस्य गजवाजिनरेषु
यत्र दृष्टिरपतत्तदपोह्य ॥
नेतरत्र चलितुं किल शेके
को ददर्श सुषुमामखिलां तत् ॥ ८१ ॥

---

१. द्यः—ख०
२. पपुः—ख०

अद्भुतानि कुसुमानि वहद्भिः
कृत्रिमैः क्षितिरुहैर्बहुरूपैः ॥
जङ्गमान्युपवनानि बहूनि
पश्यतां नयनकौतुकमासीत् ॥ ८२ ॥

आजन्ययात्राशिविरान्मूलचन्द्रगृहावधि
नानास्फुलिङ्गतरवो दीपवृक्षाश्च रापिताः ॥ ८३ ॥

दीप्ता वेद्यो[१] द्वीपिकाः पञ्चशाखा
चन्द्रज्योत्स्नासंज्ञिका भूरिशश्च ॥
दीप्रैरासीद्दीपवृक्षैः प्रकाशो
ध्वान्तं शिष्टं हृत्सु मात्सर्यभाजाम् ॥ ८४ ॥

[1]दीप्तैः क्रीडनकैस्फुलिङ्गनिवहं मुञ्चद्भिरत्यञ्चितै-
राग्नेयैर्गगने क्षितौ च विदधे नानाविधं कौतुकम् ॥
ज्योत्स्ना प्रादुरभूद्विधूतविधुरुङ्मेषागजाः कृत्रिमाः
प्रायुध्यंत च मुर्मुरौ घर्मभितः[२] क्रुद्धा वमन्तो बहुम् ॥८५॥

[2]आग्नेयगोलानलमुत्सृजन्तः
सुवर्णपुष्पाणि परं किरन्तः ॥
सर्पान् क्षिपन्तो दिवि तैजसांश्च
दृष्टा जनैः शिल्पविशेषकल्पाः ॥ ८६ ॥

रजतकनकदण्डान्धारयन्तः सुवाचो
नवपुरटपिशङ्गैः कञ्चुकोष्णीषकाद्यैः ॥
परिवृतवपुषोग्रे वद्धवर्गा प्रधावन्
जनमपगमयन्तो दर्शका नानकस्य ॥ ८७ ॥

---

१. वस्त्रो—क० वद्यो—ख० ।
२. धममितः—क०
1. दीप्तक्रीडनकम् = 'आतिसवाजी' इति भाषायाम् ।
2. आग्नेय गोलानलम् = 'आतिशवाजी' इति भाषामाम्

भोगावलीं पठन्तो नानकदत्तान् हयान् समारूढाः ॥
अगमन् मागधसूतैः प्रासकरा वन्दिनो विविधाः ॥८८॥

गायन्ति दीर्घस्वरमत्यपूर्वं
ये वैणिकाः सैन्धवसन्निविष्टाः ॥
वीणानिनादानुगतं जगुस्ते
मनांसि जह्रुः पथि संचलन्तः ॥ ८९ ॥

अनेकधूर्वाहकनीयमान-
विमानमाश्रित्य च वारवध्वः ॥
नृत्यं तथा चक्रुरभूतपूर्वं
पुरो यथैवाप्सरसो मघोनः[1] ॥ ९० ॥

विवाहकाले सकलस्य शोभा
स्वाभाविकी काचिदुदेति लोके ॥
किं वर्ण्यतां नानकवर्मणः सा
शरीरकान्त्या जयिनः स्मरस्य ॥ ९१ ॥

पूर्णचन्द्रवदनस्य तदानीं
फुल्लपङ्कजविशालदृशोऽस्य ॥
कौसुमं मुकुटमुद्वहतोऽभू-
द्दर्शने जननेत्रनिमेषः ॥ ९२ ॥

नृणां मनोरथं रथ्यां पूरयन्वसुभिर्वरः ।
समं विवेश नगरं हृदयं च मृगीदृशाम्[2] ॥९३॥

शिञ्जानमञ्जुमणिकाञ्चनभूषणानां
प्रत्यग्रयावकरसारुणपद्धतीनाम् ॥
आलोकनाय सुदृशामतिसत्वराणां
रोद्धुं वरं किमु मनांसि पुरः प्रजग्मुः ॥ ९४ ॥

1. मघोनोऽप्सरस इव वारवध्व इति ध्वन्यते ।

२. चन्द्रपङ्कजयोरेकत्रस्थापन्नाद्विरोधस्तत्परिहारः स्पष्ट एव ।

पत्राङ्गुलीमेककपोल एव
कृत्वा ययौ काचन संभ्रमेण ॥
अनंजितेनैकविलोचनेन
कुतूहलाकृष्टमनाश्च काचित् ॥ ९५ ॥

प्रसाधनी पाणिरगात्सुकेशी
केशानसंस्कृत्य जनेन कापि ॥
आदर्शमन्या दधती करेण
गवाक्षमाक्षिप्य परां रुरोध ॥ ९६ ॥

[1]सैरन्ध्याकृतविनया[1] प्रसाधनाय
धावन्ती धृतकरयानुगम्यमाना ॥
जालान्तः प्रणिहितकन्धरा मृगाक्षी
काप्यासीद्वरसुषमा निरीक्षणाय ॥ ९७ ॥

ललाटिकां काचन कण्ठ एव
ग्रैवेयकं[2] रत्नमयं ललाटे ॥
धृत्वा द्रुतं सौधमुपारुरोह
श्वासोत्तरङ्गा हसिता सखीभिः ॥ ९८ ॥

विमानगाभिर्नलिनेक्षणाभिः
शोभाभिभूतस्मरसुन्दरीभिः ॥
व्यलोकि नूनं जितकामकान्तिः
कामं समागम्य वरोऽप्सरोभिः ॥ ९९ ॥

---

१. सौन्ध्रा—क०
२. ग्रैवेमम्—क०
1. सैरन्ध्यः—प्रसाधनविशेषः ।

ताः क्षत्रियाण्यो मृगशावनेत्राः
सुवर्णवल्लीसुकुमारदेहाः ॥
अन्यत्र गच्छेदिति शङ्कयेव
कटाक्षदाम्ना वरमभ्यबध्नन् ॥१००॥

पार्श्वद्वये तत्र पुरे वधूषु
जालेष्वगूढाननलोचनासु ॥
सहस्रचन्द्रोदययौगपद्ये-
ऽप्यभूद्विकासः कमलाकराणाम् ॥१०१॥

आदर्शयन्नङ्गुलिभिर्वरं ताः
परस्परं गन्धफलीसमाभिः ॥
अवाकिरन् लाजविमिश्रिताभि-
र्भृङ्गैः श्रिताभिः सुमनोभिरेनम् ॥१०२॥

पतत्सु पुष्पेषु वरो वरीया[1]-
न्कदाचिदुच्चैरवलोकमानः ॥
विस्फारिताभिः प्रसभं प्रगृह्य
दृग्भिर्हृदब्जे निहितो वधूभिः ॥१०३॥

यावन्न मूलभवनं जनता जगाम
सौधेषु तावदभितो वरवर्णिनीनाम् ॥
नेत्रैरधारि विपुलैः सुषमा समन्ता-
दिन्दीवरस्फुरितचन्दनमालिकानाम्[2] ॥१०४॥

भृङ्गारितेषु करिषु स्थितपूर्णकुम्भै-
रम्भाप्रकाण्डमणितोरणदामभिश्च ॥
आम्नायपाठपटुभिर्वटुभिर्मनोज्ञं
तन्मूलचन्द्रभवनं[3] वर आससाद ॥१०५॥

---

१. वतेवरीयान्—क०
२. स्फुरितं वदनमालिकानाम्—क० स्फुरितवदनमालिकानाम्—ख०
३. वलजम्—क०

सम्पूज्य मूल उपचारपरः समग्रान्
ज्ञातीन्ननाम शिबिराय च निर्दिदेश ॥
पूर्वं कृता नगरसीम्नि निवासशाला
जग्मुर्जनाः प्रमुदिताः पटमण्डनानि ॥१०६॥

अजितेन तत्र शतशोऽधिकारिणः
परिचारकाः प्रतिजनं प्रयोजिताः ॥
नरनागवाजिपशुपक्षिभक्षणं
क्षणमात्रतः समुपनिन्युरुत्तमम् ॥१०७॥

अथ मूलचन्द्र उपगम्य बन्धुभि-
र्वरवस्त्रभूषणवरैर्वरं कृती ॥
परिपूज्य बान्धवजनान्सभाजयन्
विनयादयाचत विवाहसज्जताम् ॥१०८॥

विप्रान्पुरस्कृत्य ततो जगाम
कालश्च लालो जयरामवर्मा ॥
पिता च तस्येतरबन्धुवृद्धै-
र्वरेण सार्द्धं करिभिः प्रभिन्नैः ॥१०९॥

सम्बन्धिनो द्वारि विशालदन्ता
दन्तावलास्ते मदवारिवर्यैः ॥
कृतं च सेकं[1] पुनरुक्तपङ्क्ति-
कृताकृतं किं नु विदन्ति मत्ताः[2] ॥११०॥

---

1. अजितः—अजितोरथावः मूलस्यषिता ।
१. स्म सेकं—ख० + क० इत्युभयत्र ।
२. विदंनि मित्ता—क०

आबद्धतोरणमुदीतचतुष्कवेदि
सौवर्णकुम्भनवपल्लवरागरम्यम् ॥
उद्वाहमण्डपमुपेत्य वरः परे च
सिंहासनेषु रुचिरेषु सुखं न्यषीदन् ॥१११॥

तस्मिन्विशालनयने तपनीयगौर[१]-
विस्तीर्णवक्षसि विलम्बिभुजे स्मितास्ये ॥
नेत्रावलीं युगपदेव वरे विलोलां
नीलोत्पलस्रजमिव न्यदधुर्मृगाक्ष्यः ॥११२॥

ततो वरं विष्टरपद्यपाद्यै-
रर्घेण मूलो मधुपर्कदानात्[1] ॥
आनर्च विप्रेषु पठत्सु वेदान्
स्त्रीणां मृदङ्गध्वनिमञ्जुगीतौ ॥११३॥

सा मङ्गलस्नानशुचिः कुमारी
समागता काञ्चनपुत्रिरेव ॥
सुवर्णसूत्रैः रचितं तनीयो
वधूवरौ वस्त्रयुगं दधाते ॥११४॥

कुमार्यै वरवस्त्राणि मणिभूषणपेटिकाम् ॥
विवृत्य निदधौ विप्रो जयरामेङ्गितं विदन् ॥११५॥

समञ्जयामास च मूलचन्द्रः
[2]कुशाक्षताम्भोभिरदात्कुमारीम् ॥
प्रयुक्तपक्षद्वयनामगोत्रो
वराय तामैद्रसगोत्रभाजे ॥११६॥

---

१. बिवरे—क.

1. विष्टरं, पद्यम्, पाद्यम्, अर्घं, मधुपर्कं च कन्यादाता वराय समर्पयति कन्यादानात्पूर्वम् ॥

2. कुशाक्षताम्भसा कुमारीं सिञ्चत्याचार्यः ।

[1]कामस्तुतिं कामसमः पपाठ
　　वरः सुदायं श्वशुरो ददौ च ॥
स्थिते नरे पूर्णघटे व्यधत्तां
　　[3]वधूवरौ निष्क्रममीक्षणं[2] च ॥११७॥

प्रपठ्य[१] मन्त्रांश्चतुरः परीत्य
　　वह्निं [२]वरोऽलंवितते जनीकः ? ॥
विवेश तद्दक्षिणतः कुमारी
　　होमं तदाचार्यवरश्चकार ॥११८॥

[३]अथाराज्यभागौ च महाव्याहृतिसंज्ञकम् ॥
सर्वप्रायश्चित्तसंज्ञं प्राजापत्यं तथैव च ॥११९॥

[4]स्विष्टकृद्राष्टभृत्संज्ञं जयाभ्यातानसंज्ञकम् ॥
होमं हरिदयालुः स आचार्यो निरवर्तयत् ॥१२०॥

युग्मम्—

लाजान् समीपत्रयुतान्[४] जुहाव
　　भ्रात्रा वितीर्णान्दहने कुमारी ॥
आरोहयत्तां दृषदं गृहीत-
　　करो वरो गायति च स्म गाथाम् ॥१२१॥

---

1. सिक्खसम्प्रदाये वरः कामस्तुतिं पठति ।
2. "परस्परं समञ्जेथाम्" इति मन्त्रः ।
3. वरवध्वोः परस्परनिरीक्षणं प्रायेण सर्वस्मिन्नेव सम्प्रदाये ।
4. जयाभ्यातानहोमः, स्विष्टकृद् होमः राष्ट्रभृत् होमश्च विवाहे दृश्यते ।

१. प्रपठ्य—क०
२. वरोलं वितते—क०
३. आघारा—ख०
४. समीमन्त्र—क०

आकारयत्सप्तपदीं सिषेच
दलैरथैनां हृदयेऽस्पृशच्च[१] ॥
सिन्दूर[1]शोभामभिमन्त्र्य[2] कान्तः
सीमन्तमध्ये विदधे विधिज्ञः ॥१२२॥
समाप्य होमं धरणीसुरेभ्यो
ददौ सुवर्णानि च सौरभेयीः ॥
सन्दर्शयामास वरो वधूं स्वां
ध्रुवं ध्रुवं कामवधूविजेत्रीम् ॥१२३॥
कालश्च मूलचन्द्रश्च दैन्यतापं द्विजन्मनाम् ॥
घनाघनाविव तदा [2]वसुवर्षैर्व्यपोहताम् ॥१२४॥
इत्थं जातविवाहमङ्गलविधिः स्थानं गतो नानको
मां पृष्ट्वा जयरामवर्मविहितानुज्ञो वदान्याग्रणीः ॥
विप्रत्वं हि जनान्निजान्परिजनानप्रीणयत्प्रोन्नतै-
रश्वैराभरणैर्विशिष्य वसुभिर्वासोभिरत्युत्तमैः ॥१२५॥
ननाम रत्नाभरणानि दत्वा
वासांसि दीनारभृतं करण्डम् ॥
आचार्यमाह स्म वदस्व विद्वन् ?
समीहितं किं विदधातु भृत्यः ॥१२६॥
हरिदयालुरतीव सुतोषितः
प्रमदवारिपरिप्लुतलोचनः ॥
अकथयन्ननु नानक वत्स हे
किमवशिष्टमतः परमीप्सितम् ॥१२७॥

---

1. सिन्दूरदानात्पश्चात् सप्तपदी भवति । ततो होमः संजायते ।
2. वसुवर्षैर्धनदानैरिति भावः ।
१. हृदयेस्पृश—क०
२. मभिमंत्र—क०

न खलु वेदि कुलं भवता परं
वसुमतीवलयं सुविभूषितम् ॥
विनय एष विभूषणतामगा-
त्तव भवाभरणस्य किमुच्यताम् ॥१२८॥

मम मनोरथपूर्तिरभूत्प्रभो
तव पुरा कथितां श्रियमीप्सितुः ॥
परिणयोत्सव एव विलोकित-
स्तनयजन्म दिदृक्षुरथास्मि ते ॥१२९॥

अश्वैराभरणैर्वस्त्रैर्मर्दनं वैणिकं ततः
अतृपन्नानकः कालकथितानाश्रितान् परान् ॥१३०॥

भरतस्य भरद्वाजो यथाऽऽतिथ्यमकल्पयत्
ससैन्यस्य तथा मूलचन्द्रो नानकवर्मणः ॥१३१॥

अजितेन डिण्डिमरवेण घोषितं
वरयात्रिणां ददतु पण्यमीप्सितम् ॥
मम कोशतः पणमुपाददत्वमी
वणिजो न किञ्चिदिह सन्दिहन्तु च ॥१३२॥

सूपाः सूक्ष्मकदुष्णभक्तसहिताः सन्मण्डका व्यञ्जनैः
नानाकल्पविकल्पितैर्बहुविधा वद्यो[१]वटाः कोमलाः
बह्व्यः संधितजातयः सुलवणाः खाद्या रसालाः सिताः
आज्यं प्राज्यमभून्नवं सुरभिजं दुग्धं च सान्द्रं दधि ॥१३३॥

मत्स्यैर्नानाविधैरन्यैः [1]प्रोष्ठी[2]पाठीन[3]रोहितैः ॥
जम्बीरनीरसरसैः प्रशस्तैः पिप्रिये जनः ॥१३४॥

---

१. त्यो—क०

1. प्रोष्ठी = पोठी मछली हिन्द्याम् ।
2. पाठीनः = मत्स्यभेदः ।
3. रोहितः = सर्वश्रेष्ठोमत्स्यः

जलस्थलस्थायिविहङ्गमांसै-
मृंगाजयो रस्ययुतैश्च शूल्यैः[1]॥
नितम्बिनीनां कलगीतिभिश्च
राजन्ययूनामतृपन्मनांसि ॥१३५॥

मांसौदनं सौरभमुद्गिरन्तं
बहुप्रकारं किल बाहुजास्ते ॥
अभुंजताकण्ठमकुण्ठजिह्वा-
विलिह्य लेह्यं मरिचाम्लसिद्धम् ॥१३६॥

यद् येन स्वेष्टमाज्ञप्तं प्राकृतेनोत्तमेन वा ॥
तत्तस्य पुरतो न्यस्तमह्नाय परिवेषकैः ॥१३७॥

एवं खादतमोहता चिरमभूदाचम्य सुस्थो जनः
सर्वोचर्च्यत यक्षकर्दमरसैर्मालाभिराभूषितः ॥
ताम्बूलैर्मगधाहृतैः स्वमनसोपात्तैः परं प्रासदत्
भूपो वारवधूविलासविभवैस्तौर्यत्रिकैस्तोषितः ॥१३८॥

अजितो मूलचन्द्रश्च तदाप्ता नानकः कृती ॥
कालश्च जयरामश्च स्वजनैः संसदि स्थिताः ॥१३९॥

सिक्ताः पुष्परसैः सर्वे गन्धतैलेन वासिताः ॥
द्राक्षावादामखर्जूरमुल्कूलकमुपाददुः ॥१४०॥

लवङ्गजातीफलजातिपत्री
ताम्बूलबीटी त्रिपुटात्वचश्च[2]॥
न्यस्ताः पुरः स्वर्णकरण्डकेषु
महाजनास्ते जगृहुर्यथेच्छम् ॥१४१॥

---

१. मूल्यै—क०
२. त्वचन्दाः—क०

ततस्ततानद्धघनस्वनेन
लयं गतैस्तैः सुषिरस्य शब्दैः ॥
गीतैर्हरन्त्यो हृदयं सभाया
मुख्या अनृत्यन्नववारमुख्याः ॥१४२॥

न विवेद जनः स देशकालौ
न च देहादिविभावरीं समग्राम् ॥
कुतुकेन गृहीतचित्तवृत्तिः
परमानन्दमहोदधौ ममज्ज ॥१४३॥

प्रससाद सदा पश्यन्निन्द्रजालं जगत्तु यः ॥
स्वप्ने स्वप्नमिवालोक्य सिस्मिये स च नानकः ॥१४४॥

अनर्गलौदार्यगुणः प्रसह्य
ददौ स वस्त्राभरणार्थराशिम् ॥
[१]तेभ्यः परेभ्यो नटनर्तकेभ्यो
विदूषकेभ्यो बहुरूपकेभ्यः ॥१४५॥

इत्थं दिनानि कतिचित्परमोत्सवेन
प्रीत्योत्तरोत्तरपुरस्करणेद्धया च ॥
तत्र स्थितोऽजितमुपेत्य च मूलचन्द्रं
यात्रां ययाच विनयाज्जयरामवर्मा ॥१४६॥

अनिच्छतोरपि तयोरनुज्ञा दापिता जनैः ॥
प्रापिता जन्यवासं च यौतकर्द्धिरनुत्तमा[1] ॥१४७॥

मदकलाः करिणोऽनिलरंहसो
हयवरा मणिमौक्तिककाञ्चनम् ॥
भटजनैर्महिता बहुहेतयः
सदसि दत्तमशोभत पौतकम् ॥१४८॥

---

१. ताभ्यः–क०–ख०

1. यौतकर्द्धिरनुत्तमा—क० ।

व्ययं प्रयाणदिवसादारभ्यानिच्छतोप्यलम् ॥
लेखमालोक्य विनयान्मूलो जामातुरर्पयत् ॥१४९॥

दत्त्वा बहुधनं मूलः कालस्य पदयोः पतन् ॥
सम्बन्धिना कृतार्थोस्मि त्वयेति विससर्ज तम् ॥१५०॥

अजितस्य मते स्थितः स मूल-
स्तनयां नूतनरत्नभूषणाढ्याम् ॥
व्यसृजद्बहुचेटिकानुपातां
नवपानेन जनोपवर्णितेन ॥१५१॥

पितरौ तनयामसागरोत्थां
कमलां कोमलवादिनीं विदूनाम् ॥
अवलोक्य न शेकतुर्जहीतुं[१]
नयनाभ्यां पतितां महाश्रुधाराम् ॥१५२॥

चन्दोराज्ञी वाष्पपूर्णायताक्षी
कन्यामश्रूण्युत्सृजन्तीमुवाच ॥
मा रोदीस्त्वं मे हृदिस्थासि वत्से
द्रक्ष्यन्ती त्वामागमिष्यामि शीघ्रम् ॥१५३॥

अस्या दास्याः क्षमेथास्त्वमित्युक्त्वा बद्धहस्तया ॥
जामाता दत्तधनया चन्द्रो[1] राज्ञा विसर्जितः ॥१५४॥

अजितेन हितेन हस्तिनोश्वान्
प्रतिपाद्याथ विसर्जिता नताश्च ॥
प्रययुर्जयरामनानकाद्याः
पटहध्वाननिवेदितप्रयाणाः ॥१५५॥

---

१. जहीतुमितियुक्तः पाठः ।

1. चंदो राज्या–क०

अथवा चन्द्रो नानकचन्द्रः राज्ञा विसर्जित इति भावः ।

नागान् सज्जयतां हरींश्च हरतां वाहान् रथे युञ्जतां
कीलान्युत्खनतां [1]कुलानि शतशः संहृत्य सम्बध्नताम् ॥
गोणीः स्थापयतां वृषेषु विततानुष्ट्रेषु भारान्गुरून्
शस्त्रं धारयतां प्रयाणपटहध्वानस्त्वरामातनोत् ॥१५६॥

संपिह्य[2] रज्जुमभिवध्य च पानपात्र-
मुष्णीपतश्च तिथिपत्रकमुत्प्रगृह्य ॥
किञ्चिद्विलोक्य धृतपुस्तकदेवपेटी-
भारा ययुः क्षितिसुराः कुशयष्टिहस्ताः ॥१५७॥

गत्वा सुरत्राणपुरं सभार्यः
श्रीनानको मङ्गलगीतवाद्यैः ॥
नीराजितः पङ्कजलोचनाभिः
प्रवेशितः सद्म गुरूनानाम ॥१५८॥

पूज्येत देवस्तलवंडिकायां
पश्येज्जनस्त्वां च चिरं दिदृक्षुः ॥
उक्त्वेति वृद्धैर्दयितासहायः
श्रीनानकस्तां नगरीमनायि ॥१५९॥

मामुक्तवान्भारमिमं वहस्व
त्वं बालसिन्धो इति स प्रयास्यन् ॥
दानं विना कापि न दुर्वहा मे
धूरित्युरीकृत्य ततः स्थितोऽहम् ॥१६०॥

कालःस्नुषां पुत्रमपि प्रगृह्य
प्रसन्नचेता नगरीं प्रयातः ॥
भेरीरवैः सिन्धुरसंघघण्टा-
स्वनैश्च दूराद्विदितो जनेन ॥१६१॥

---

१. स्थुलानि—ख०
२. संपिड्य—ख०

सद्बान्धवास्तस्य विलोक्य ऋद्धिं
ननन्दुरन्ये परितापमूहुः ॥
विशेषतः श्रीः परमेतदर्थं
सन्दर्शनीयाभिजने जनेन ॥१६२॥

रम्भास्तम्भयुगेन कुम्भयुगलेनोत्फुल्लपङ्केरुहैः
क्लृप्तैस्तोरणदामभिश्च रुचिरे द्वारे चतुष्काश्चिते ॥
कामिन्यः कुलरीतिचारुमतयो नीराज्य तौ दम्पती
स्फूर्जन्मञ्जुमृदङ्गनादमतयन्नभ्यन्तरं नन्दिताः ॥१६३॥

सर्वाङ्गरत्नाभरणानि मात्रे
निवेद्य चित्राणि वराम्बराणि ॥
श्रीनानकः पादयुगं स्वमूर्द्ध्ना
पस्पर्श लोकैरभिनन्द्यमानः ॥१६४॥

स्नुषां दलत्कोकनदानुकारि-
कराग्रपादां प्रणतां विलोक्य ॥
आलिङ्ग्य रत्नाभरणाम्बराणि
प्रसूः प्रसन्नाऽदित नानकस्य ॥१६५॥

दिष्ट्या वर्द्धस इत्युक्त्वा जामिभिर्नानकप्रसूः ॥
नमन्ती फलिनं मेने भाग्यभूरुहमात्मनः ॥१६६॥

दासीभ्यः पूर्णपात्राणि ददौ मणिगणानियम् ॥
पार्श्वे नानकचन्द्रस्य तारका इव ता बभुः ॥१६७॥

सवयसः खलु नानकमागताः
सपरिरम्भमनेन सभाजिताः ॥
कथितपूर्वकथा विहितोपदाः
सविभवस्य नतेर्मुदिता ययुः ॥१६८॥

बोलाररायमुपगम्य विशिष्टवस्त्रं
स्वर्णोपदामुपनिधाय ननाम हृष्टः ॥

उत्थाय तेन हृदये विनिधाय पृष्टः
स स्वाधिकार[1]दिवसादखिलं जगाद ॥१६९॥

श्रुत्वाखिलं मोदमदभ्रमाप-
द्दोलाररायो निजगाद चेदम् ॥
तवोदये शारदशीतरश्मे-
श्चकोरवन्नानक निर्वृतोऽस्मि ॥१७०॥

कालं बहुमिह स्थातुं न युक्तं किन्तु नानक ॥
राज्ञो विपरिवर्तन्ते स्तोकेनैव मनांसि यत् ॥१७१॥

विसृष्टो नानकस्तेन तथेति कथयंस्ततः ॥
समाप्तदेवपूजादिक्रियो मासोत्तरं ययौ ॥१७२॥

आदाय चेतांसि ययौ जनानां
शीलेन सर्वस्य हि वल्लभोऽयम् ॥
सत्सङ्गतिः कस्न सुखाकरोति
परन्तु दैवेन विना न लभ्या ॥१७३॥

सुरत्राणपुरं गत्वा स्वाधिकारं बभार सः ।
प्रजावतीमतिप्रीत्या[1] स्थापयामास नानकी ॥१७४॥

इति श्रीजगद्गुरुनानककथायां नानकचन्द्रोदयसमाख्यायां
परिणयो नाम पञ्चमः प्रस्तावः ॥

---

१. स्वाधिकार ख—क०

1. प्रजावती = नानकपत्नी । सुलक्षणी

षष्ठः प्रस्तावः

या स्फोटवर्णपदवाक्यपदाभिधेया
स्थूलत्वमागतवती भवति क्रमेण ॥
तेजोवदस्य जगतो व्यवहारहेतुः
सा निर्विकल्पचितिरस्तु मयि प्रसन्ना ॥ १ ॥

सुलक्षणी सुरूपापि पत्युर्नारमयन्मनः ॥
यथा हंसस्य रुचिरा बध्नती स्वर्णशृङ्खला ॥ २ ॥

चन्दोराज्ञी कन्यकां द्रष्टुमागा-
न्निर्विण्णां तां साश्रुनेत्रां विलोक्य ॥
नानक्याऽतिप्रीतिभाजा गृहीता
नातिप्रीता तामुपालेभ उग्रा ॥ ३ ॥

कन्या न तिष्ठन्ति गृहे स्वकीये
सर्वा व्रजन्त्येव परस्य वेश्म ॥
यद्येवमेव व्यथयेज्जनस्ता--
स्तदा विलीयेत विधेर्हि पन्था[1] ॥ ४ ॥

मयैव कन्या जनिता यदि स्या-
त्तदापराध्यास्म्यहमेव[2] लोके ॥
अन्याः स्त्रियश्चेज्जनयन्ति कन्या
विचारिते मे न तदापराधः ॥ ५ ॥

---

१. पंथा--क॰
२. ध्यामाहमेव--क

श्वश्रूजनः शास्ति वधूः कुशीलाः[३]
कामं तदा नास्ति गिरोवकाशः ॥
प्रयाति मार्गेण सता सदश्वे
कशानिपातोऽतितरामसह्यः ॥ ६ ॥

श्वश्रूः क्षमा ताडनलालने या
मातेव सा ते नहि सन्निधिस्था ॥
प्राक्कर्मणस्त्वं खलु दुर्विपाका-
न्ननान्दृहस्ते[१] पतितासि वत्से ॥ ७ ॥

अन्तेवासिन्युपाध्यायः प्रजावत्यां च नन्दिनी ॥
निसर्गेणैव वहतश्चण्डिमानमकारणम् ॥ ८ ॥

सुलक्षणी तामऽवदन्नार्योपालम्भमर्हति ॥
नार्यो यत्कृतसौभाग्याः स एव विरसो मयि ॥ ९ ॥

चन्दोराज्ञी व्याजहाराथ खिन्ना
कस्माद्दोषान्नानकस्तेऽप्रसन्नः ॥
निर्विण्णश्चेज्जीवलोकस्य सौख्ये
किं ते पूर्वं हन्त जग्राह पाणिम् ॥ १० ॥

नानकी मतिमती तदावद--
न्नानको न कलहेन सुग्रहः ॥
प्रार्थनैव समये करिष्यते
या महाजनमनोनुकूलिनी ॥ ११ ॥

---

३. वधू कुशीला—क०

१. न नान्धहस्ते—ख०

१. ननादह—क०

१. ला—ख०

२. मुपालेभ...या...क०

निक्षिप्य तनयामङ्के नानक्याः सा ययौ गृहान् ॥
आश्वासिता तयात्यर्थं प्रससाद सुलक्षणी ॥ १२ ॥
समागतं गतरुषं हतरागमथैकदा
मनुजं[१] मनुजव्याजदेवमेवं स्वसाऽवदत् ॥ १३ ॥
त्वं सर्ववेत्तासि विचक्षणोसि
कः शिक्षयेत्त्वामपरावरज्ञः ॥
[1]तथापि नारीजनचापलेन
यदुच्यते तत्सदसत् क्षमस्व ॥ १४ ॥
देवर्षिभूतात्मनृणां पितॄणां
न किंकरो नायमृणीति सह्यम् ॥
अर्वाग्दृशः शिक्षयितुं तथापि
[2]सन्तः पुराणेन पथा चरन्ति ॥ १५ ॥
निक्षिप्य जायां तनये वनाय
[२]व्रजेत्तया वा सममित्युशन्ति ॥
जानन्ति सन्तो वनिता लतेव
विनावलम्बं कथमेव तिष्ठेत् ॥ १६ ॥
न ज्ञानिनो हानिकरी गृहस्थ-
चर्या हि पथ्यं विकृतेन सेव्यम् ।
गतेऽगदे[३] हन्त समूलमेव
वदन्ति सर्वं बलिनस्तु पथ्यम् ॥ १७ ॥
तवेव सर्वस्य जनस्य नास्ति
जगत्यनास्था तमसावृतस्य ॥

---

१. इण्दुजं—क०

२. व्रया—क०

३. गजे—क०

1. तुलना—"मां वक्तुमिच्छा मुखरीकरोति—शिशु० ।

2. भवन्तस्तु सन्त एव नेतरे इत्यर्थान्तरन्यासः ।

धनं सुताः सद्विषयोपभोगः
संसारिणस्तत्त्वमिदं विदन्ति ॥ १८ ॥

तयैवं व्यञ्जिते सौम्यः[1] संजगाद स्मिताननः ॥
किं नोक्तं तव मान्यायाः कृतं किं न करिष्यते ॥ १९ ॥

स्वस्या उपालम्भमपोहयन्त्या
अवश्यवक्तव्यमिदं भवत्याः ॥
लतां य आरोपयते सयत्नं
फलावधि प्रौढतरं करोति ॥ २० ॥

ततो नवोढामनुरञ्जयन्सदा
सुलक्षणीं नायकतागुणेन सः ॥
अरीरमन्नूतनकामकेलिभिः
कलासु सर्वासु समुल्लसन्मनाः ॥ २१ ॥

मुहुर्मन्द्रध्वानैर्दिवि परिलसन्तो जलधरा
वितन्वन्तः केकाः प्रमदवनवीथीषु शिखिनः[2] ॥
विनिद्राः कन्दल्यो भुवि हरितशष्पाङ्कुरलताः
स्मरोन्मेषं यूनोर्नवनवमतन्वन्ननुदिनम् ॥ २२ ॥

मलयजरससेकान्मालतीदामतश्च
वरतनुपरिरम्भस्तेन सम्भावितोऽभूत् ॥
मुखमपि मदिराक्ष्या वीक्ष्य तस्याः प्रियेण
न किमपि बहु मेने शारदः पूर्णचन्द्रः ॥ २३ ॥

कालेन साथ कियता बिभराम्बभूव
गर्भं शितिस्तनमुखा शरकाण्डपाण्डुः ॥
मृद्भक्षणेऽकृत रुचिं श्रमकर्शिताङ्गी
पत्युः सुखाय सुषुवे समये सुतं च ॥ २४ ॥

१. सौम्य—ख०
२. ना—क०

जाते सुतेऽतिमुदितो जयरामवर्मा
श्रीनानकश्च विदधेऽखिलजातकर्म ॥
यद् येन याचितमभूद् व्यतरत्स तस्मै
तत्स्वर्णभूषणवराम्बरसैन्धवादि ॥ २५ ॥

द्वात्रिंशदब्दवयसाऽजनि नानकस्य
श्रीचन्द्र इत्यभिहितः प्रथमः स सूनुः ॥
तुङ्गस्थितैर्ग्रहवरैरविगीतभाग्यो
लोके महामहिमभाक् स इव प्रसिद्धः ॥ २६ ॥

साध्वी दधार खलु सार्धचतुर्थवर्षे
गर्भं पुनस्तदनु नानकधर्मपत्नी ॥
आलीजनस्य रुचिरादभिलष्यमाण-
मुक्षंतमक्षिकमलान्यमृतच्छटाभिः[1] ॥ २७ ॥

ज्ञानी प्रव्रजितः कश्चिदेकदा नानकं गतः ॥
पाण्डुरं कृशमालोक्य तमपृच्छत्स कारणम् ॥ २८ ॥

राजकार्यनियोगेन पारतन्त्र्यादनारतम्[2] ॥
स्नानभोजनकालस्य वैषम्यं नानकोऽब्रवीत् ॥ २९ ॥

स्नातः प्रभाते नवनीतयुक्तां
सितोपलां भुंक्ष्व ततोन्यवार्ता ॥
नोपेक्ष्यमर्थादिचतुष्टयस्य
वपुः सखे साधनमाहुरार्याः ॥ ३० ॥
तेनोपदिष्टो दययेति धीर-
स्तथा प्रतिश्रुत्य तदादि चक्रे ॥

---

१. छटा—क०
२. पारतंत्र्या—क०

अतिप्रभाते ह्रदुस्तरायां
स्नानं स वेआं[1] भृशशीतलायाम् ॥ ३१ ॥

एकदाहर्मुखे[2] गत्वा वेआं कृतनिमज्जनः ॥
नोन्ममज्जेति चिखिदे सर्वोस्य प्रीतिमज्जनः ॥ ३२ ॥

हाहेति चुक्रोश नतस्तदर्थं
सर्वः सुरत्राणपुरस्य लोकः ॥
सुलक्षणी सा वत नानकी च
सन्तापवक्षोऽरुदितामजस्रम् ॥ ३३ ॥

[3]आनायमानीयमहान्तमन्तरा
विलोडयामासुरितस्ततश्च ॥
दाशास्तटस्थेन मया प्रयुक्ताः
खिन्नेन भूयो जयरामनाम्ना ॥ ३४ ॥

ग्राहा महान्तो मकराश्च मत्स्या
जाले निबद्धा न स दृश्यते स्म ॥
निगीर्य तं कोपि गतः सुदूरं
ग्राहः किलेत्याह ततः स्म लोकः ॥ ३५ ॥

भक्ताधिकारी निममज्ज नद्या-
मुक्त्वेति राजा पिशुनैः प्रयुक्तः[१] ॥
आहूय दूतैर्जयराममूचे
त्वं बोधयाशु व्ययमस्य[२] नूनम् ॥ ३६ ॥

---

१. ऽह्नि—क०
२. मघमस्य—ख० ।
1. वेआ = नदीनाम ।
2. अहर्मुखे = प्रातरि ।
3. आनायम् = जालम् ।

भीतस्ततस्तस्य मनस्यवेक्ष्य
दानं स धीरो जयराम ऊचे ॥
कृत्वा क्रियामस्य मृतस्य राज-
न्नावेदयिष्यामि समग्रमेव ॥ ३७ ॥
स्वार्थप्रवणतां राज्ञां निस्नेहत्वं निरास्पदम् ॥
विनिनिन्द ततः सर्वो लोकः शोकसमाकुलः ॥ ३८ ॥
बन्धुर्ध्रुवं प्राक्ष्यति बालसिन्धुः
चिरस्य चोरो जयरामकश्च ॥
खेलैः प्रयुक्तामिति किंवदन्तीं
श्रुत्वास्मदीयां विभयाम्बभूवुः ॥ ३९ ॥
पश्चात्तपन्निति जनो विनिनिन्द विश्वं
मृत्योर्न किञ्चिदपि सज्जनपक्षपातः ।
जीवन्ति हन्त पिशुनाः परमर्मघाताः
[1]सन्तः परोपकृतिसक्तधियो [1]म्रियन्ते ॥ ४० ॥
मूर्खो वा पण्डितो वापि पापो वा धार्मिकोऽपि वा ॥
असिद्धोप्यथवा सिद्धः कालः कश्चिन्न मुञ्चति ॥ ४१ ॥
वेत्री न वेत्री ध्रुवमेव सन्तं
या [2]मज्जयामास तथाविधं तं ॥
यद्वा प्रकृत्या जडतायुतानां
वेत्तृत्वमप्यर्थकरं न किञ्चित् ॥ ४२ ॥
साध्वीं विहाय वनितां तनयं शिशुं च
वृद्धौ प्रसह्य पितरौ वत दूरसंस्थौ ॥

---

१. म्प्रियन्ते पाठः—क० ३० सत्तं–ख०

२. प्रजयामास इति पाठः—क०

I. जनानां परितापः ४२ तः ५० यावत् वर्णितः :

अस्मान्भवत्प्रणयबद्धधियः किमेवं
हा नानक त्वमगमः परिहीणहार्दः ॥ ४३ ॥

स्मेराननो विकचपङ्कजपत्रनेत्रः
शीलेन सर्वजनवल्लभतामुपेतः ॥
नातः परं स भविता सुकृतव्ययेन
श्रीनानको गुणनिधिर्नयनातिथिर्नः ॥ ४४ ॥

तीर्थे तस्मिन्प्रातरुन्मज्ज्य दृष्टो
लोकैः प्रातः स्नायिभिः कौतुकेन ॥
[1][3]तार्तीयीके वासरे साश्रुनेत्रान्
सानन्दाश्रूनागतः स व्यधत्त ॥ ४५ ॥

तिलकमुपरतानामेष वेषं[2] दधानः
परिहृतगृहमेध्याकल्प आविर्बभूव ॥
धृतयति वपुषा स्वं लोकमानीय पत्नी
स खलु समुपदिष्टो [4]वारिनाथेन पन्थाः ॥ ४६ ॥

केचिन्मोहवशेन दृश्यत इति प्रोचुः परे प्रत्ययं
नाजग्मुस्त्वपरे नवं जनुरिति प्राकीर्तयन्विस्मिताः ॥
मायावीति जजल्पुरल्पमतयः सिद्धं परे वर्णयन्
विद्वांसस्तु वयं प्रभावमतुलं तस्येति तूष्णीं स्थिताः ॥ ४७ ॥

---

१. तार्तियीके—क०
२. मैषवेष—क०
३. तृतीयस्यायं तार्तीयः ।
४. "तानामेषवेषम्" इत्येकः पाठः ।
'तानाम् मेषवेषम्" इति द्वितीयः पाठः ।
' तानाम् ऐषवेषम्" इत्यपि पाठः ।
५. वारिनाथो वरुणः ॥

जीवेन देहा इव देहिनस्ते
तेनागतेनोद्गतचेतनास्तु ॥
वस्त्राणि मौलौ परिवर्त्य तस्य
ददुः प्रसन्नाः परिचारकेभ्यः ॥ ४८ ॥

नानक्या चरणे निपत्य रुदितं तस्य स्मितं कुर्वती
नेत्राभ्यां दयिता निपीय निभृतं दूरादमुं निर्वृता ॥
आलिङ्गन् जयराम इत्यकथयन्मोहाय किं नः कृतम्
राज्ञो दुर्विनयं वदन्तमथ मां दृष्ट्वाऽहसत्सोच्चकैः ॥ ४९ ॥

बोधयामास लेखेन धनखानस्य लेखकान् ॥
[I]खतर्कतुरगा मुद्रास्तस्य तत्राधिकाः स्थिताः ॥ ५० ॥

प्रदापयितुकामे ताः [1]पृथ्वीपाले प्रसीदति ॥
देहि प्रव्रजितेभ्यस्त्वमिति नानक आलपत् ॥ ५१ ॥

प्रसादवस्त्रं नृपतिः स दातु-
माकारयन्नायमुरीचकार[2] ॥
विसृज्य सर्वं विपिनस्थितेषु
देवालयेषु स्थितिमाततान ॥ ५२ ॥

आपन्नसत्त्वा दयितासि साध्वी
परस्य गेहे तनयः शिशुश्च ॥
नावर्जयत्तस्य मनो मृषात्वा-
त्स्वाप्तस्य बन्धोर्दयते न कश्चित्[3] ॥५३॥

I. खतर्कतुरगा = ७००
१. पृथिवीपाले—ख०
२. उररीचकार—क०
३. कश्चित्—क०

स्वार्थोपाधिः प्रीतिरत्राखिलस्य
सर्वश्रेष्ठो धन्य एको धनी यत् ॥
भोग्याः सर्वे शश्वदा[१]पातरम्या-
स्तद्विद्वांसः किं भवेऽस्मिन् रमन्ताम्[1] ॥ ५४ ॥

मूढा यथातिममतानिगडेन बद्धाः
कुर्वन्ति कृत्यमिह तद्वहवो बुधाश्च ॥
काले विवेकमुभये कलयन्ति किन्तु
तोये गभीर इव बाहुकवारिभीताः ॥ ५५ ॥

नानकोखिलमुत्सृज्य व्यरच्यत वने स्थितः ॥
श्रुत्वेति मूलः श्यामेन गुरुणा सह तं ययौ ॥ ५६ ॥

परः शता जृम्भितमस्य लोका
यदाङ्गुलीनां ध्वनिताभ्यनन्दन् ॥
तदा यथासीत्सुखितस्ततोपि
वने स एकाकितया ननन्द ॥ ५७ ॥

गत्वा तौ विजने वने ददृशतुर्देवालये संस्थितं
सन्त्यक्ताखिलभूषणाम्बरममुं वस्त्रद्वयाच्छादनम् ॥
श्यामोऽभाषत हन्त नानक कुतो वेषः किमेष त्वया
नाश्रौषीः स कषायपाकविधुरैर्दुर्योगिभिर्दुर्लभः ॥ ५८ ॥

निर्वेदात्सहसोत्थितो परिणनात्षड्भिः[2] सपत्नैर्युतो
भीतिं याति वनेपि वश्यकरणे गेहेपि भो नन्दति ॥

---

१. यात—क०

२. व्रव—क०

1. ईदृक्षस्य जगतः प्रीतिं कथं भजतु कश्चित् इति भावः। अतोस्मिन् भवे रमणं न युक्तियुक्तमिति भावः।

2. कामक्रोधलोभमोहमदमात्सर्याणि।

षट् शत्रून्विजिगीषवो नयविदो ये गेहदुर्गाश्रिता
युध्यन्तेऽथ विजित्य तान्विहरता तेषां कचिन्नापदः ॥ ५९ ॥

व्याप्तस्त्रिलोक्यां यदि लोकनाथो
वनेषु लभ्येत गृहे कुतो न ? ॥ ६० ॥

भक्तिप्रियश्चेज्जगदन्तरात्मा
नग्ने प्रसीदेन्न पटावृते किम् ? ॥ ६१ ॥

श्रुत्वा ध्वानं जनादन्धो यथा पश्यन् प्रबोधयेत् ॥
बोधयन्तं तथा श्यामं सस्मितो नानकोऽब्रवीत् ॥ ६२ ॥

यो वै कषायी स कषायपाकं
प्रतीक्षतां श्याम ? न मे कषायः ॥

पुरीमपक्कामवधेहि तत्र
बालं नृबालं खलसम्परीतम्[I] ॥ ६३ ॥

वने न जय्याः षडमी सपत्ना
गृहान्धकूपे सुतरां सुमेधः ? ॥

जन्मान्तराराधनतोपि तस्य[२]
विना मुरारेः करुणाकटाक्षम्[३] ॥ ६४ ॥

वह्निर्दारुषु सन्ततोपि मथनप्रावीण्यतो लभ्यते
व्याप्तं वारि धरातले च खननादासाद्यते यत्नतः ॥
ईशो विश्वविसृत्वरोपि जगतो मुञ्जादिषीका यथा
तुच्छं[४] सन्त्यजताऽखिलं मतिमता निर्गृह्यते[५] केनचित् ॥ ६५ ॥

१. षड्श्—क०
२. वितस्य—क०
३. करणाकरा–ख०
४. तुच्छं—क०
५. निगृह्यते–क०
I. श्लो० ६४ तः ६६ यावत् नानकदर्शनस्य कश्चिदंशः प्राप्यते ।

एकं मनः पुत्रकलत्रमित्र-
धनानि यद्धावति धावमानम् ॥
वदस्व तद्यागिभिरप्यगम्यं
कथं प्रपद्येत पदं मुरारेः ? ॥ ६६ ॥

स्नेहनिर्यासवद्धानां जीवानां पक्षिणामिव ॥
परब्रह्ममहोत्तुङ्गमाकाशमिव दुर्गमम्[1] ॥ ६७ ॥

मूलोऽब्रवीदग्निरयं यदीद्धः[1]
पूर्वं किमासीद्गृहमेधिधर्मा ? ॥
सोऽब्रूत लोभोग्निरनिर्वृतानां
भुक्त्वा त्रिलोकीमपि वो न तृप्तः ॥ ६८ ॥

विक्षिप्तोऽयमभून्नूनं न वाचं प्रतिपत्स्यते ॥
इति मूलः क्रुधाक्रुश्य श्यामेन[2] सह निर्गतः ॥ ६९ ॥

धनखाननृपद्वारि मूल आवेदनध्वनि-
मुच्चैश्चकार तच्छ्रुत्वा कोऽयमित्यब्रवीन्नृपः ॥ ७० ॥

[3]मित्रखानोब्रवीन्मूलो नानकश्वसुरो नृप ॥
आवेदयति जामातुर्धनं मे दुहिताऽर्हति ॥ ७१ ॥

धनखानस्ततोऽब्रूत नानकेन पुरोदितम् ॥
मुद्रा मदीया दातव्याः परिव्राड्भ्य इति स्फुटम् ॥ ७२ ॥

मूलचन्द्रस्ततोऽवादीद्राजानो न्यायवादिनः ॥
तस्य विक्षिप्तचित्तस्य न प्रमाणं वचः खलु ॥ ७३ ॥

---

१. प्रदीप्तः—ख० ।

I. यथा पिञ्जरेवद्धपक्षिणां कृते आकाशं दुर्गमम् तथैव
स्नेहे वद्धानां जीवानां कृते ब्रह्म दुर्गमम् ।

2. श्यामः = मूलानुगतः ।

3. मित्रखानः = धह्खानानुजीवी ।

जयरामं नृपोऽपृच्छद् ब्रूहि कोऽर्हति तद्धनम् ॥
अवोचत्स पुनः पृष्टो नानकः पृच्छ्यतामिति ॥ ७४ ॥
जनैर्नृपो नानकमाजुहाव
पुनः पुनः क्रोधवशात्प्रणुन्नः[१] ॥
आगत्य तस्यावनमत्सभायां
सन्दीपयिष्यन् धनखानमन्युम् ॥ ७५ ॥
आकारितस्त्वं बहुवारमागाः
कुतो न भो नव्यविरक्तिशालिन्[I] ? ॥
द्रव्यं तवायं श्वशुरो जिघृक्षु-
रास्ते ततो देयमिदं नु कस्मै ॥ ७६ ॥
तं नानकोऽभाषत ते न भृत्यो
भृत्योऽधुनाहं जगतां[२] नियन्तुः ॥
किमर्थमाकारितवानसि त्वं
द्रव्यं तु तत्प्रव्रजितैकभोज्यम् ॥ ७७ ॥
पत्नी विपुत्रापि[३] लभेत भर्तु-
र्धनं सपुत्रा न कथं नु राजन् ॥
न्यायानुरोधाद्वदतीति लोके
विचिन्त्य राजेति पुनर्जगाद ॥ ७८ ॥
पश्यन्त्वमुं मन्त्रविदो विचेता
यद्येष जाया धनभागिनी स्यात् ॥
चेत्स्वस्थचित्तोऽस्य[४] वचः प्रमाणं
तदा धनं प्रव्रजिता भजन्तु ॥ ७९ ॥

---

१. प्रणुन्नै–ख०
२. जगती नियन्तुः–ख०
३. विमुक्ता–क०
४. स्वस्य–ख०
I. सद्यो धृतसंन्यासिव्रतइत्यर्थः ।

अथागमन्मन्त्रविदस्तुरुष्काः[I]
सिद्धार्थविक्षेपकृतः[1] पठन्तः ॥
क्रूरैरुपायैः परिपीडयन्तः
त्वं कोऽसि कोऽसीति मुहुर्जजल्पुः ॥ ८० ॥

तान्नानक उवाचेदमसिद्धान् सिद्धमानिनः ॥
देवनामाङ्कितैर्मन्त्रैर्भूतोच्चाटनजीविकान् ॥ ८१ ॥

कृषिः समूलैव विनाशिता यैः
खलाः खलार्थं किमु ते यतन्ते ? ॥
विक्रीणतां नाम महेश्वरस्य
सिद्धिःकिमेषां परकार्यकृत्स्यात् ?॥ ८२ ॥

[2]उन्मादवानस्मि जनार्दनस्य
प्रेम्णा निजानन्दनिरञ्जनस्य ॥
तृणाय मन्ये सकलां त्रिलोकीं[2]
प्रतिक्षणं क्षीणतरत्त्वभाजम् ॥ ८३ ॥

मन्त्रस्य देवं[3] परिचिन्वते न
न ते प्रकुर्वन्ति जनस्य कामान् ॥
नृत्यन्तमारुह्य शिरांसि मृत्युं
नोच्चाटयन्तेऽपि तु भूतसङ्घान् ॥ ८४ ॥

अहो महाभूतनिबद्धदेहा
भूतं किमुच्चाटपथा प्रभूतम् ॥
लोभं निगृह्णीत महापिशाचं
यूयं यदा[4]वेशवशाद्विमूढाः ॥ ८५ ॥

---

१. विज्ञेय–क०
२. विलोकीं–क०
३. देयं–क०
४. तदा–क०

I. तुरुष्का मन्त्रविदः = तुर्कतान्त्रिक इति भाषायाम् ।
2. श्लो० ८३ तः ८७ यावत् नानकस्य तुरुष्कमन्त्रविदं प्रति ईशोपदेशः ।

त्वं कोसीऽति किमत्र पृच्छथ जडा देहेन्द्रियादीतरं
नित्यानन्दमगाधबोधजलधिं जानीत मामद्वयम् ॥
देहं केचन भूतयोगजनितं चैतन्यमन्ये परे
विज्ञानं क्षणिकं वपुः परिमितं मामाहुरेके धिया ॥ ८६ ॥

केचनोचुरिमा[1] वाचः श्रुत्वास्य म्लेच्छमान्त्रिकाः ॥
नाविष्टो न च विक्षिप्तो ज्ञानवानेष निश्चितम् ॥ ८७ ॥
अर्धं प्रव्रजितेभ्यस्तदर्धं नानकयोषिते ॥
धनखानो धनमदात्तदा[2] स्वमतिमाश्रितः ॥ ८८ ॥
आर्यम्लेच्छोपास्यदेवे न भेदं
ज्ञानी यस्मान्मन्यते नानक!त्वम् ॥
वन्देथास्तं सार्धमस्माभिरद्य
तस्माद्राजेत्याग्रहादेनमूचे[3] ॥ ८९ ॥
यवनदेवगृहे यवनैः समं
नतिमुरीकृतवानथ नानकः ॥
किमपि नार्यजनो नृपभीतितोऽ–
वददपासरदार्ततरस्ततः ॥ ९० ॥
धनखानादिभिर्म्लेच्छैर्म्लेच्छमन्त्रानुवादनात् ॥
नानको म्लेच्छतां नीत इति कोलाहलोऽभवत् ॥ ९१ ॥
विशालनेत्रक्षरिताश्रुधारो
म्लानाननोऽगाज्जयरामवर्मा ॥
[1]निधिं द्विजं द्वारि नियुज्य वार्ता–
बोधाय गाढं[4] हृदि दूयमानः[5] ॥ ९२ ॥

---

१. केचिनो—क०
२. मादत्त—क०
३. मूचः—क०
४. गाहं—क०
५. हूयमान—क०
1. निधिः कश्चिद् ब्राह्मणः ।

तमप्रसन्नं वनिता विलोक्य
पप्रच्छ किं म्लानमुखोऽस्य कस्मात् ॥
ऊचे स ते भ्रातरमद्य राजा
म्लेच्छो चिकीर्षत्यहह प्रसह्य[1] ॥ ९३ ॥
आश्वासयामास तु नानकी तं
न नानकस्याभिभवाय कश्चित् ॥
शक्नोतु को नाम सहस्ररश्मिं
पिधातुमीष्टे करसंपुटेन ॥ ९४ ॥
अनीतिरेषा यवनस्य राज्ञो
विनाशिनीति ब्रुवतां सरोषम् ॥
सतां सुरत्राणपुरस्थिताना-
मभूद्विषादः प्रति सद्म भूयान् ॥ ९५ ॥
अनुशोचति नानकं सहाये -
जयरामे प्रतिकारशक्तिशून्ये ॥
निधिरागतवान् द्विजः प्रवृत्त्यै[2]
नृपति द्वारि नियोजतः स पूर्वम्[3] ॥ ९६ ॥
स पृष्टो जयरामेण निजगादेदमादृतः[4] ॥
म्लेच्छाः सन्तो विनिष्क्रान्तास्तदुक्तिमनुवच्म्यहम् ॥ ९७ ॥
देवोपस्थितये स्थितो नृपतिना नोपस्थितिं नानकः
चक्रे तं नृपतिर्जगाद कुरुषे किं नाऽत्र देवानतिम् ॥
तं सम्प्रत्यवदत्त्वया सह मया कार्या सुरोपस्थिति-
स्त्वं गान्धारगतो नियोजितमनाः क्रीणासि भो घोटकान्[1] ॥९८॥

---

१. प्रतिसद्य—क०
२. सदायै—क०
३. प्र पूर्वम्—क०
४. माहत—क०
1. हास्यरसस्य केवलं द्वित्रा एवामीवाश्लोकाः समापतन्ति दृष्टिपथमत्र सम्पूर्णे महाकाव्ये ।

[1]कार्यस्तदोवाच मया समं कुतः !
कृता न देवानतिरत्र तिष्ठता ॥
ऊचे स तं गर्तनिपातवारणं
कर्तुं किशोरस्य गतो भवानपि ॥९९॥
परिचितज्ञतामस्य स तदा ज्ञात्वा नराधिपः ॥
किञ्चिद्भीतो जगादामुं विचर त्वं यथासुखम् ॥१००॥
इति संलपतां तेषां दूरस्थः श्रुतवानहम् ॥
आयाति नानको नूनं स्वेन धर्मेण रक्षितः ॥१०१॥
जयरामादयस्तस्य वाग्भिराश्वासमाययुः ॥
यथार्थत्वं याचमानो देव[3]ताभ्यस्तदुक्तिषु ॥१०२॥
विदार्यभासा यवनान्ध[3]नानि
प्रभाकरो नानक उद्गतस्ततः ॥
विलोक्य हर्म्यात्तुलसी[4] तमालप–
द्रुर्धस्व[१] भोः स्वामिनि बन्धुलाभतः ॥१०३॥
यथास्थितं नानकमागतं तं
विलोक्य सर्वे मुहुरीक्षमाणः ॥
क्षणं प्रमोदाश्रुभिरास्रवद्भिः
कृतान्तरायाः परितापमापुः ॥१०४॥
जयरामस्ततोऽपृच्छत्किमभूत्तत्र कथ्यताम् ॥
यदभूत्तदभूदेव मुदा तिष्ठतु नानकः ॥१०५॥
निर्बन्धपृष्टः पुनराबभाषे
मामुक्तवान्म्लेच्छनृपो न भेदम् ॥
ज्ञानी क्वचिद् ब्रह्ममतिः करोति
सहोपतिष्ठस्व मया ममेशम्[२] ॥१०६॥

१. द्यर्धस्व—क०
२. महीशम्–क०

1. कार्यः—क० इदं व्यक्तिवाचकं नाम ।
2. तुलसी—नानक्याः सखी ।
3. देवताभ्य इति चिन्त्यं याच्धातोर्द्विकर्मकत्वात् ।
4. अन्धयतीत्यन्धनमन्धो वा ।

स्वीकृत्य तूष्णीमपि वर्तमाने
न वन्दसे किं पुनरित्युवाच ॥
अवादिषं त्वं तुरगान् ग्रहीतुं
गान्धारगः केन ततोऽनुमेयम्[१] ॥१०७॥
धर्मोपदेष्टाथ जगाद कार्यो
मिथ्या कुतो वक्षि नृपे स्थितेऽत्र ? ॥
नृपाल एवैनमुवाच सत्यं
ब्रवीति गान्धारगतं मनो मे ॥१०८॥
पुनर्बभाषे कुपितोथ कार्यो
मया स्थितेनात्रन वन्दसे किम् ? ॥
तमब्रवं त्वञ्च गतोसि कार्यिन् !
गृहं स्वकीयं बडवा मृता ते ॥१०९॥
लालः किशोरस्तव चित्ततुल्यो
गर्ते पतेत्तद्विनिवारणार्थम्[२] ॥
बन्धादियत्नाननुतिष्ठतस्ते
त्वमेव साक्षी धृतधर्मशास्त्रः ॥११०॥
ह्रीणः किञ्चित्तदा कार्यो सत्यमित्यवदन्नृपम्[३] ॥
नृपस्तु मामुवाचेदं पन्थानस्तेऽकुतोभयाः[४][1] ॥१११॥
प्रभावं तस्य राजर्षेः श्रुत्वाऽतुष्यन्निजा जनाः ॥
जिहासां वीक्ष्य सर्वस्य नातुष्यन् साश्रुलोचनाः ॥११२॥

---

१. ततो न मेयम्—क०
२. गर्तं तद्वि—क०
३. नरम्—क०
४. नियोजनः—ख०
1. नास्ति कुतो भयं यस्मात् स अकुतोऽभयः ।
2. हातुमिच्छाम् ।

हित्वा कुटुम्बं सहसा यियासुं
निर्मोकमुत्सृज्य यथा भुजङ्गम् ॥
न कोऽपि तं रोद्धुमलंबभूव
स्वसा तु साश्रुः सदयं जगाद ॥११४॥
भ्रातस्तपस्यां त्वमिहैव कुर्या-
स्तत्रान्तरायो भविता न कश्चित्[१] ॥
दूरादपि त्वामवलोक्य लक्ष्ये
सरोजिनी सूर्यमिव प्रमोदम् ॥११५॥
तवानुरागो न बभूव पित्रो-
र्मय्येव[२] ते प्रीतिरतीव बाल्यात् ॥
ममत्वशून्योऽसि तथापि दीने
[३]दयालवः साधुजना भवन्ति ॥११६॥
नानकस्तामुवाचेदं त्वं मोहात्किं प्रलापिनी ॥
एको जातो मृतश्चैकः सम्बन्धः केन[2] कस्य कः ॥११७॥
ज्ञात्वापि संयोगवियोगजन्म-
जरामृतिप्रायमिमं प्रपञ्चम् ॥
नारीस्वभावात्कृपणासि यत्त्वं
द्रक्ष्यामि तत्त्वां पुनरेधि तुष्टा ॥११८॥
चन्दोराज्ञी क्रोधमूर्च्छामुपेता
क्रूरैः शब्दैः कर्कशाक्रोशयुक्तैः ॥
ऊचे स्वस्याः कन्यकाया रुदन्त्या
दैन्यं दृष्ट्वा दूयमाना दुरन्तम् ॥११९॥

1. सामान्येन विशषसमर्थनरूपोऽर्थान्तिरन्यासः ।
2. जगतो मिथ्यात्वप्रतिपादनम् ।
१. कश्चित्—क०
२. मप्पेव–क०
३. दुरं तम्—क०

किं नावमारोह्य कुटुम्बमेत-
दरित्रभङ्गं कृतवानसि त्वम् ॥
हातुः सुतां बालसुतां मदीयां
दया न ते चुम्बति चित्तमीषत् ॥१२०॥
परात्मजायावनवर्त्मपातं
कर्तुं विरक्तोऽयमभूतपूर्वः ॥
न शैशवे नापि च वार्धके हा
तारुण्यमाविष्कृतवान् विडम्बम्[१] ॥१२१॥
किं नैष्ठिको ना भवितुं तदेवं ?
चिकीर्षितं चेत्तव हन्त जाल्म ?
कुटुम्बपोषे किल कातराणां
विरक्तिमार्गः[२] सुगमो नराणाम् ॥१२२॥
दैवादुपेतैर्विषयैरजीर्णे जाते
विरक्ता बहवो भवन्ति ॥
त एव तेभ्यः स्पृहयालवो हा
दृष्टा धनिद्वारि पुनर्भ्रमन्तः ॥१२३॥
नेयं विरक्तिर्दुरदृष्टवेगो
यन्मोहितो हा सकलं विहाय ॥
[३]तुम्ब्या च यष्ट्या भलमल्लकेन
भिक्षिष्यसे भोः कृपणान् कणांस्त्वम् ॥१२४॥
अर्थं यशः साधुकुटुम्बपोषं
दानादुदीतं महिमानमुज्झन् ॥
सुखं च दैवोपनतं त्वमेत-
द्विरज्यसे ब्रूहि फलाय कस्मै ॥१२५॥

---

१. निडंवम्—क०
२. मार्गसुगमो—ख०
३. तुंव्यां च—ख०

सत्सङ्गतस्ते परिणाम एषः
सन्तो दरिद्राः स्वसमश्चरन्ति[1] ॥
जनं समाविश्य विशस्य तूर्णं
पिशाचमेवातनुते पिशाचः ॥१२६॥

अजातपक्षाः शिशवो रुदन्ति
त्रताय तस्यास्य कृते च पत्नी ॥
अनन्यपुत्रौ पितरौ जरन्तौ
सुश्लाघ्यमेतस्य तपः कथं न ? ॥१२७॥

न कोपि रोद्धा सकलैरपेक्ष्ये
गृहाश्रमे ते चरतस्तपस्याम् ॥
नाकर्णिताः किं जनकादयस्ते ?
गृहे स्थिता मुक्तिमुपागताश्च ॥१२८॥

न क्षत्रियाः क्षोणितले किमासन्
भविष्यदुन्मत्तममुं यतिंमे ॥
जामातरं हा[2] वृतवान्सुताया
दुर्दैवतो मोहमुपेत्य नूनम् ॥१२९॥

तां नानकः शान्तमना बभाषे
मोहेन रूक्षाणि समालपन्तीम् ॥
लोष्टैर्हतो वा कुसुमैर्वृतो वा
ज्ञानी विकारं न मनागुपैति ॥१३०॥

क्षणे क्षणे[3] भज्यमानां नावमेतां समाश्रिताः ॥
मग्नाः सर्वेऽपि नियतमात्मानं नोद्धरन्ति चेत् ॥१३१॥

---

१. समाचरन्ति—क०

२. हामृत–क०

३. भजमानां–ख०

दया हरेरर्थकरी जनस्य
परस्परं किं दययाऽप्यदूनाम् ॥
व्याधस्य जाले पतिताः पतन्तः ॥
कुर्वन्ति किं वा दयया रुदन्तः ॥१३२॥

[1]ऊढा दिवोभ्येत्य सुता त्वदीया
केनापि दैवादजरामरेण[2] ॥
कालं कियन्तं सुखिनी तदास्या-
दृता जनेनेति तु वर्त्मयातम् ॥१३३॥

जायापती रोगवियोगमृत्यु-
युक्तावनेकान्तसुखौ प्रसिद्धौ ॥
बद्धौ यदैवावसरं लभेत
तदा पलायेत विश्रृङ्खलः सन् ॥१३४॥

ये नैष्ठिकास्ते दुरदृष्टयः स्त्रीं
शुनीमनुश्वान इव भ्रमन्ति ॥
कुटुम्बपोषे विधृतप्रतिज्ञा
[5]ग्लायन्ति पोषाय[6] निजोदरस्य ॥१३५॥

उत्क्रान्ति कालेप्यभिलष्यमाणै-
र्भवेदजीर्णं विषयैर्नुकस्य ॥
विडम्बयेत्किं न जनं विरागा-
भासः ? क्षुदाभास इव ज्वरार्तम् ॥१३६॥

---

१. कडादिवो—क०
२. दजगमरेण—क०
३. जनेनौति—क०
४. पेनेष्ट्रिका—क०
५. ज्ञायन्ति—क०
६. योर्षोप—क०

त्यक्त्वा स्वतोऽहं सकलां समृद्धिं
भिक्षां चरिष्यामि कुबुद्धियोगात् ॥
ये नीतिमन्तो निपुणा यतन्ते
राज्याय ते भैक्षभुजः किमर्थम् ? ॥१३७॥

अर्थादयस्ते सुखयन्ति साध्वि[1]
विध्वंसमाना हि सुरक्षिता ये ॥
तद्दूरदृश्वानमनश्वरस्य
सुखस्य लाभाय कृतप्रयत्नम् ॥१३८॥

सन्तः स्वयं स्वस्य समाचरन्ति
यं भाग्यवन्तं जननी प्रसूते ॥
गङ्गाम्बु[2] सन्तो मलयोद्भवश्च
वितन्वते स्वाश्रितमात्मतुल्यम् ॥१३९॥

प्रारब्धयोगेन[3] निजेन सर्वः
सुरक्षितो रक्षति कः कमत्र ?
रक्षाक्षमश्चेदितरस्य कश्चित्
स्वस्यैव रक्षां न कुतः करोति ? ॥१४०॥

अनेकजन्मार्जितपुण्यपुञ्जा
मुक्ता[4] गृहस्था जनकादयस्ते ॥
अन्योपि गार्हस्थवरो न मोहा-
न्मुमुक्षमाणः परिहासमेति ॥१४१॥

दौहित्रकौ वीक्ष्य सुखं लभस्व
मामुन्मदिष्णुं विजहीहि भद्रे ॥

---

१. स्माग्वि—क०
२. गंगांदु—क०
३. भोगेन—क०
४. युक्ता—क०

समाहिता त्वत्तनया विपत्ति-
स्त्वयैव दुर्दैववशादुदीता । १४२ ।

मग्नायां तरणौ यथा प्रतरणे शक्ता अशक्ता जनान्
धृत्वा रागवशेन तैर्नियमिता मज्जन्त्यमीभिः सह ॥
एवं स्वार्थपरैरनर्थमतुलं जानन्नपि स्वं जनः
संसाराम्बुनिधौ निमज्जति महामोहात्कुटुम्बैर्वृतः ॥१४३॥

स्वप्नेन्द्रजालोपममाशु विश्वं[१]
विहाय मुक्त्यै सुमतिर्यतेत ॥
चिन्ता कुटुम्बस्य वृथैव दैवं
न कोपि कस्यापि निवर्तयेत[1] ? ॥१४४॥

एवमुक्त्वा रुदत्येव परिवारे महत्यपि ॥
नानक्या प्रार्थितः किञ्चिदुक्त्वा प्रव्राज नानकः[2] ॥१४५॥

तलवण्डीगतश्चाहं तमामन्त्र्य चिरागतः[२] ॥
पित्रादीन्वीक्षितुमना नानकानुगतीच्छया ॥१४६॥

विरक्ते नानके मासत्रयादूर्ध्वं सुतोऽभवत् ॥
लक्ष्मीचन्द्र इति ख्यातश्चन्द्रवत्प्रियदर्शनः ॥१४७॥

नानक्या प्रार्थितं दत्वा श्रीचन्द्रं दीनमानसा ॥
लक्ष्मीचन्द्रं गृहीत्वागाच्चन्दोराज्ञी सुलक्षणीम्[३] ॥१४८॥

इति श्रीजगद्गुरुनानककथायां नानकचन्द्रोदयसमाख्यायां
वनगमनं नाम षष्ठः प्रस्तावः ॥

---

1. श्लो० १३० तः १४४ यावत् नानकस्य चन्दोराज्ञीं प्रति जीवनविषये व्याख्या ।
2. नानकस्याभिनिष्क्रमणं बुद्धस्य महाभिनिष्क्रमणाद्भिन्नम् । बुद्धः शयानं परिवारं त्यक्त्वा गतो नानकस्तु रुदन्तं परिवारंस्त्विति ।

१. स्वमेन्द्र—क०
२. चिराङ्गतः—क०
३. सुलक्षणी—क०

सप्तमः प्रस्तावः

यस्याः कटाक्षकलया सकलाप्यकस्मा-
त्स्वर्गापवर्गसुरधेनुरुपैति विद्या ॥
डिण्डीरपिण्डधवला परिधावतीह
कीर्तिश्च सा मयि सुतुष्यतु वागधीशा ॥ १ ॥

निर्गत्य नानको गेहात् वनेषु व्यचरद्वशी ॥
वृत्तिं[1] वन्यफलैः कुर्वन्ननिश्चितनिकेतनः ॥ २ ॥

क्वचिद्वृक्षस्याधः क्वचिदपि लताकुञ्जनिलये
क्वचिद्दर्यां सिंहैर्द्रुत[2]परिहतायां सविनयैः ॥
क्वचित्तुङ्गे शृङ्गे तपति तपने द्वन्द्वरहितः
स[I] तस्थौ स्वस्थात्मा विगतभयरागव्यतिकरः ॥ ३ ॥

श्रुत्वा कालःस्तनयविगमं खेदमापत् सभार्यो
मामप्राक्षीत्कथितमखिलं दीनदीनोऽशृणोच्च ॥
तं विक्षिप्तं त्वमतिसुमतिर्बालसिन्धो किमौज्झो ?
व्याहृत्यैवं विकलहृदयो मर्दनो[2] प्राहिणोत्तम् ॥ ४ ॥

मर्दनः समुपागत्य नानक्याः सविधे नमन् ॥
नानकस्य प्रवृत्त्यर्थमागतोस्मीत्यकीर्तयत् ॥ ५ ॥

नानकी साश्रुनयना निजगादानुतापिनी ॥
विहाय निवसत्यस्मान्नानको विजने वने ॥ ६ ॥

---

१. वृत्ति—क०

२. सिंहैव्रत—क०

I. नानकस्यात्रानिश्चितनिकेनत्त्वं प्रतिपादयति कविः ।

2. शिष्येषु मर्दनस्य नाम 'मर्दाना' इति प्रथितोस्ति । मर्दनो वैणिको नानकप्रवृत्तिं परिवर्तयितुमियाय ॥ तं च नानकी नानकं विनोदयितुं प्रैषयत् ।

अहं गमिष्यामि तदीयपार्श्व-
मित्युक्तवन्तं तमियं जगाद ॥
त्वं गच्छ तस्यान्तिक[1]मावसेश्च
विनोदयन्वैणिकतागुणेन ॥ ७ ॥
[2]तद् दूरदेशान्तरमेष गच्छे-
द्यथा तथा त्वं सुमते ! यतेथाः ॥
मौलोसि नस्तातकुलस्य कार्य-
मिदं त्वया कार्यमिहार्यबुद्धया ॥ ८ ॥
भोजितो[3] भूरि सत्कारं नानक्या च विसर्जितः ॥
अन्विष्येऽहं वनान्तेषु [4]श्रातोऽप्येष धृतिं वहन् ॥ ९ ॥
जगत्यसारे जगतीनिवासं
भक्तो यथा भक्तिवशादुपैति ॥
तथा स तं प्राप वने वसन्तं
क्वचित्तरोर्मूलमलङ्करिष्णुम् ॥ १० ॥
विरुदमस्य पपाठ ननाम स
स्मितमुखस्तमभाषत नानकः ॥
मम किमु[5] द्रुमसूलनिवासिनो
[1]विरुदवर्णनया तव मर्दन ? ॥ ११ ॥
कुशल्यसि कुतः सौम्य स्मृतमात्रः समागतः ?
कच्चिन्मे वनवासस्य सचिवस्त्वं [6]बुभूषसि ? ॥ १२ ॥

---

१. तस्यान्तिकभाव–क०
२. नदूरदेशान्त–ख०
३. भोतितो –क०
४. तान्तो—क०
५. कथं—ख०
६. बभूषसि–क०
1. विरुदवर्णनं नाभ्रियत नानकेन। विरूदो राजस्तुतिः। नानको राजर्षिरतस्तस्य विरुदः॥

राजर्षिणा तेन तथाऽनुयुक्तो
वाग्भिर्जनानां हरतानुतापम् ॥
अवोचदुच्चैर्विनयावनम्रो
वचः स कालोचितमाप्तवाच्यम्[१] ॥ १३ ॥

स्वामी सर्वास्ववस्थासु पत्न्या परिजनेन च ॥
सम्माननीयः सततमेष धर्मः सनातनः ॥ १४ ॥

न न्यूनतां ते कलये महात्मन्
नाधिक्यमेवाधिगतं समीक्षे[२] ॥
पूर्वं नमस्यः किल कैश्चिदेव
साधोऽधुना सर्वजगत्प्रणम्यः ॥ १५ ॥

ज्ञातः पुरा योगिवरोऽधुना तु
पर्यव्रजो ज्ञानसिराबिरासीत् ॥
त्वत्सत्यसंकल्पतयानुकृष्टः
समाश्रितोऽहं तव पादपद्मे ॥ १६ ॥

पित्रा प्रवृत्त्यै प्रहितस्तवास्मि
स्वसाऽवदत्तेन सहैव तिष्ठेः ॥
कर्ता यथा सम्भवमेतयोश्च[३]
प्रोक्तं प्रसादं च तवाश्रयिष्ये[1] ॥ १७ ॥

मर्दनेनैवमुक्तस्तु नानको व्याजहार तम् ॥
वीणामानय भोः सौम्य ! गुणान्गायत ईशितुः[४][५] ॥ १८ ॥

1. १४ तः १७ यावत् नानकं प्रति कालस्य नानक्याश्च सन्देशो मर्दनेनोक्तः ।

१. वाक्यम्–क०

२. समीचे–क०

३. मेतयोक्तं–क०

४. येशितुः–क०

५. कवेर्विवक्षया न कृतो अस्ति सन्धिरत्र ।

ओमित्युक्त्वा वैणिकानां निकाये
[1]वीणां [2]लिक्षुं मर्दनं पर्यटन्तम् ॥
विक्षिप्तं तं क्षत्रियं सेवमानः
किं त्वं वीणामिच्छसीत्याक्षिपंस्ते ?॥ १९ ॥

आक्रुश्यमानः परिभाव्यमानो
मूढैरविज्ञाततदीयतत्त्वैः ॥
निवृत्य वाढं[१] विमनायमानः
श्रीनानकं मर्दन इत्युवाच ॥ २० ॥

निन्दन्ति लोका नितरां भवन्तं
हसन्ति मां वैणिकदुर्दुरूढाः ॥
वदन्ति विक्षिप्तमनु प्रवृत्त-
स्त्वं किन्न विक्षिप्ततरोऽसि मन्द ! ॥ २१ ॥

निशम्य नानकोऽब्रूत व्रज वीणां समानय ॥
लोकस्तु सर्वथा भद्रं न कमप्याह मत्सरी ॥ २२ ॥

लोकानुरञ्जनरतं
[२]भगवन्तं जानकीपतिं निन्दन् ॥
कं मुञ्चति प्रपञ्चः ?
प्रपञ्चचञ्चुश्चिरंतनो हन्त[३] ॥ २३ ॥

---

1. "सारङ्गी" गुरुग्रन्थसाहिबे ।
2. लिक्षुम्-प्राप्तुम् ।
१. वाडं–क०
२. भवन्तं–क०
३. हंत–क०

मर्दनः पुनरगात्स्वसजातिं[1]
वल्लकीविचयतत्परचेताः ॥
रंजयन्तमवलोक्य विपञ्च्या
वैणिकं यवनमेकमुवाच ॥ २४ ॥

कश्चित्प्रव्रजितो वने निवसति स्वच्छन्दसर्वक्रियः
शुश्रूषुः स च [I]वल्लकीरवमतो मां वैणिकान्वेषिणम् ॥
तस्यार्थे कलयस्व सौम्य ! यदि ते चेतः प्रसादो भवे-
देतं प्रेषय तद्विनोदविधये वीणाध्वनौ[2] दक्षिणम् ॥ २५ ॥

यवनः प्रणम्य मम भाग्यमिति
प्रशशास तं झटिति गच्छ सखे ! ॥
सह मर्दनेन स जगाम वने
प्रणनाम नानकमुदीक्ष्य कृती ॥ २६ ॥

स्थित्वा गुणेषु [2]कोणं घटयन्तं[3] नानकस्तमाचष्ट ॥
अस्मै प्रयच्छ वीणां त्वं मर्दन ! वादयस्वैनाम् ॥ २७ ॥

नाहं तथास्मि कुशलः शृणु सौम्य ! सम्यग्
वीणां प्रवीण इह वादयतामयं हि ॥
एवं वदन्तमपि मर्दनमेव वीणा-
वादे न्ययोजयत नानक आग्रहेण ॥ २८ ॥

आदाय मर्दनो बिभ्यद्वादयामास वल्लकीम् ॥
श्रुतिस्वरग्रामताला आमूर्च्छन् मूर्च्छनास्ततः ॥ २९ ॥

---

१. जातीन्–क०
२. ध्वनौ–ख०
३. घटयत–क०
४. विपञ्ची–वीणाभेदः ।
I. वल्लकी–वीणानाम ।
2. कोणं घटयन्तं = तारं शुद्धं कुर्वन्तम् ।

वनजन्तवश्च विहगाश्च विलोलाः
[1]परिशुश्रुवुर्गतभया हृतचित्ताः ॥
इतरेतरं व्यरुदधेत्यसमन्ता-
दहिबभ्रुकाककरटादि न किञ्चित् ॥ ३० ॥

अखण्डचैतन्यमिदं समग्रं
तं नानको नात्र विकल्पबुद्धिः ॥
वीणागुणैरेव रवः प्रतेने
स्पष्टाक्षरो बालककण्ठकल्पः ॥ ३१ ॥

किमुह्य चैतन्यमवाप्य भूयः
स वैणिको व्याहृतवान् विलक्षः ॥
नाश्रौषमेतादृशनादतत्त्वं
वीणाध्वनौ वीतवयाः कदाचित्? ॥ ३२ ॥

गन्धर्वराजः किमु [१]तुम्बुरुस्त्वं ?
मां मोहयस्येतदुपेत्य रूपम् ॥
मनीषितं हन्त मुनेरुताहो
[2]यच्छब्दतत्वस्य तवात्रसिद्धिः ॥ ३३ ॥

प्रत्यर्पि तां तेन ततो विपश्चीं
स वैणिको नानकपादपद्मे[२] ॥
निधाय बद्धाञ्जलिरित्युवाच
तवोपहारः[3] परिकल्पितोऽयम् ॥ ३४ ॥

तं नानकोऽभाषत सुप्रसन्न-
स्त्वय्येव तिष्ठेदियमङ्ग ! वीणा ॥

---

१. तम्बुर–क०
२. युग्मे–ख०

1. मर्दनस्य वीणावादनं श्रुत्वा वनजन्तवोपि मोहमापुः ।
2. वीणावादने शब्दतत्त्वस्य सिद्धिः=वीणया बालककण्ठध्वनिरिवध्वनिरगादिति भावः ।
3. 'प्रत्यर्पिताम्' इत्यारभ्य 'तवोपहारः' इति पर्यन्तं 'क' पुस्तके नास्ति ॥

सदोपयोगो भवतो यदस्या
नावश्यकस्त्वत्र यतस्तदर्थः ॥ ३५ ॥

कृताग्रहस्यापि न वैणिकस्य
वीणाप्रवीणो जगृहे गतः सः ॥
भूयोविपञ्च्यानयने स चित्तं[१]
श्रीनानको मर्दनमाबभाषे ॥ ३६ ॥

स्वसुः समीपं मम गच्छ याचे-
द्र्व्यं विपञ्चीक्रयणार्हमङ्ग ! ॥
दद्यात्तदा तेन तदा तु वीणां
क्रीणीष्व नोचेत्कथयेस्तदुक्तिम् ॥ ३७ ॥

नानक्या पार्श्वमगमन्मर्दनो भ्रातृवत्सला ॥
भ्रातुः पप्रच्छ कुशलं सा भूयः साश्रुलोचना ॥ ३८ ॥

भ्राता भद्रे वसति विपिने वीतरागस्त्वदीय-
स्त्रातः स्वेनाप्रतिभमहसा माननीयो मुनीनाम् ॥
वीणां क्रेतुं स्वरपरिमितां[२] [1] मुद्रिकां देहि मह्यं
तस्यादेशादुपगतवते श्रोष्यतः पुण्यगीतीः ॥ ३९ ॥

उक्ता तेनेत्यवितथगिरा नानकी तं बभाषे
कामं मुद्राः कलय सुकृतोन्भ्रातरं मे कदाचित् ॥
नीत्वा गच्छेर्यदि तव यशो यावदायुः पठेयं
तेनाप्युक्तं भगिनि भवतीं भूय आलोकयिष्ये ॥ ४० ॥

१. चिन्तं—क०
२. स्वरयति—क०
1. स्वरपरिमितामुद्रा—७ मुद्राः

ओमित्युक्त्वा मर्दनो निर्जगाम
गत्वा पार्श्वे नानकस्येति चख्यौ ॥
दत्ता मुद्रास्ते भगिन्या भवन्तं
द्रष्टुं भूयस्तप्यते वत्सलत्वात् ॥ ४१ ॥

पुनरागमनं प्रतिश्रुतं भवता तत्सफलं विधीयताम् ।
तरुणानवकेशिनाधृतं कुसुमानामिव मण्डलं पुरः ॥ ४२ ॥

करुणावरुणालयस्त्वदीयां
गिरमाकर्ण्य जगाम तं निकेतम् ॥
तुलसी[1] तमुदीक्ष्य तुङ्गसौधा–
दवदत्स्वामिनि ! नानकोऽयमेति ॥ ४३ ॥

नानकी परमहर्षनिर्भरा
द्वारमागतवती दिदृक्षया ॥
चीरधारिणमुदीक्ष्य नानकं
नीरनिर्झरमुवाह नेत्रयोः ॥ ४४ ॥

पादयोर्निपतिता तपस्विनः
पावनस्य करुणाविलोकितैः ॥
सोऽब्रवीत् भगिनि किं विलप्यते ?
त्वं ममासि सहजा युगे युगे ॥ ४५ ॥

भ्रातृभावमधिगम्य यत्तु[१] मां
चिन्तयस्यनुदिनं दयातुरा ॥
तेन ते गतिरतीव शोभना
भाविनी जगति भूतिरत्र[२] च ॥ ४६ ॥

---

1. तुलसी = तन्नाम्नी दासी नानक्याः ।
१. यतुर्मां––क०
२. भूरि––क०

सा भोजयामास ततः प्रसन्ना
प्रीत्या सदन्नं परिवेषयन्ती ॥
स्वबान्धवं मर्दनमत्युदारा
क्षुत्क्षाममापृच्छय[१] पुनः पुनश्च[1] ॥ ४७ ॥
भ्रातरत्र वस पञ्चपाणि[२] वा
वासराणि हृदयं प्रसादयन् ॥
प्रार्थितः सहजयेति नानक-
स्तामुवाच परिसान्त्वयन्[३] वचः ॥ ४८ ॥
वियोगो दुर्वारो भगिनि सह जीवेन वपुषः
किमु प्रेष्ठैरन्यैः[४] स्थिरमिह न किञ्चिज्जगति यत् ?
अतः स्नेहं मन्दं कुरु विविधदुःखाकरममुं
मुकुन्दं[2] सेवेथाः स्वजनसुखकन्दं शुचिमतिः ॥ ४९ ॥
प्रभाववद्भिर्हृदये भगिन्या
वचोभिराधाय बुधो विवेकम् ॥
स्नेहार्द्रचित्तान् जयरामकादीन्
सम्मानयन्नेष ततः प्रतस्थे ॥ ५० ॥
विलोकितो यैर्गजवाजिपत्ति-
र्वृतोर्थिसार्थैर्द्रविणानि वर्षन् ॥
तैर्मर्दनेनानुगतः स दृष्टः
सास्रं सुरत्राणपुरस्य लोकैः ॥ ५१ ॥

१. पृच्छ—क०
२. पंचषा—क०
३. परिभावयन्—ख०
४. प्रेष्टै—क०

1. सर्वत्र काव्येत्र मर्दनस्य बुभुक्षा वर्णिता विद्यतेऽत्रापि नानकी तं पुनः पुनरापृच्छ्य भोजयति । इत्थमत्र काव्ये मर्दनस्य बुभुक्षा हास्यमुत्पादयति कादाचित्कम् ।
2. स्वसुर्निवेदनं श्रुत्वा पुनर्नानकस्तस्यै उपदिशति "मुकुन्दं सेवेथा" इत्यादिना ।

कनकपञ्जर[१]गोमधुराशनः
शुक इव प्रियमालपिता नृणाम्[२] ।
विधिवशाद्विगतः स ततोऽधिकं
सुखमवाप वने निरवग्रहः ॥ ५२ ॥

नानकोथ निजगाद मर्दनं
[३]वल्लकीविचयलोमचेतसम् ॥
ग्राम[1]मासिकपुरं प्रयाहि भो
निम्नगा द्वितयमध्यगे वने ॥ ५३ ॥

तत्र फेरुरिति[2] कीर्तितो जनै-
र्वैणिको वसति वीतबन्धनः[४] ॥
प्रायशः स भगवज्जनान् वशी
पश्यति प्रणयतः स्वबान्धवान् ॥ ५४ ॥

मुद्रिका वितर तस्य ताः करे
नानकेन वनवासिनार्पिताः ॥
वल्लकीक्रयणकारणादिति
स्पष्टमस्य कथयेश्च कोमलम् ॥ ५५ ॥

आज्ञां गृहीत्वा हनुमानिवोर्मिकां
रामस्य राजर्षिवरस्य तस्य सः ॥
सीतामिवान्वेष्टुमगाद् वनाद्वनं
वीणाप्रवीणः कृतभूरिसाहसः ॥ ५६ ॥

---

१. पंजर—क०
२. नृणां—क०
३. वल्लकी—क०
४. वंधन—क०
१. वलकी—क०
1. "आसिकपुर" इति ग्रामनाम ।
2. फेरु = वैणिकः ।

नद्योर्मध्ये संकटे काननानां
दृष्टो ग्रामो मर्दनेनातियत्नात् ॥
पृष्टो भ्रातः ! कोऽसि कौतस्कुतोऽसि
नोक्तः फेरुस्तत्र केनापि तिष्ठन्[२] ॥ ५७ ॥
श्रान्तो भ्रान्तो मर्दनो निर्जगाम
ग्रामात्तस्मादस्त्युदासीनचेताः ॥
अन्ते सीम्नः सौम्यरूपं सुवेषं
वीणापाणिं पूरुषं संददर्श ॥ ५८ ॥
अनन्तमिव[1] कौण्डिन्यस्तं दृष्ट्वानन्तशर्मभाक्[2] ॥
अयं स्यादिति सञ्चिन्त्य जगाम मृदुमर्दनः ॥ ५९ ॥
कोऽसि सौम्यवपुरन्तरधारी ?
नारदो भ्रमसि भूमितले त्वम् ॥
वीणया हरियशः किमु गायन् ?
नानकेन कथितः[3] किमु फेरुः ? ॥ ६० ॥
तेनोक्तमन्ते कथितोस्मि साधो
को नानकः पृच्छसि मां किमर्थम् ? ॥
सोऽब्रूत संसारविरक्तचेताः
श्रीनानकः प्रव्रजितो वनेऽस्ति ॥ ६१ ॥
तद्वैणिकोऽहं प्रहितोऽस्मि तेन
भवत्समीपं दिवसत्रयेण ॥
लब्धोऽसि वीणामथ देहि मह्यं
गृहाण मुद्रा मुनिनार्पितास्ते ॥ ६२ ॥

---

१. भ्रांखा प्रत्यगांरस्त्रहेण—रु०

२. छटन्—क०

1. कौण्डिन्यो ऋषिः । यथा कौण्डिन्योऽनन्तंदृष्ट्वा शान्तो भूरीथैव मर्दन इति भावः ।

2. अनन्तशर्मभाक् = अत्यानदं प्रायत् ।

3. यस्य विषये नानकोऽकथयत्स एव त्वमन्यो वेति ?

२०

इत्युक्त्वा सप्तमुद्रा ददति करतले मर्दनो स्मेरवक्त्रः
फेरुः प्रोचे कृतोर्धः सुनिपुणमतिना नानकेन स्वराणाम् ॥
प्रत्येकं मुद्रिकैकापणलघिमहृतं पण्यमेतन्महीयो
नाहं दास्ये तदीयं यदि समधिगतो दर्शनं शेवधिर्न ॥ ६३ ॥

वाङ्माधुर्यान्मर्दनः सुप्रसन्न-
स्तं व्याजह्रे त्वं मया सार्धमेहि ॥
भूयान्भावी योगिनः पश्यतस्त्वां
प्रेमाक्षेमाधायकस्यावलोकात् ॥ ६४ ॥

ततो यशोर्थाविव पुण्यवन्तं
तं जग्मतुर्वैणिकसत्तमौ तौ ॥
प्राप्तः कृतार्थो नवमे दिने च
नेमे स फेरुः किल मर्दनाख्यः ॥ ६५ ॥

फेरुं नमन्तं विनिवेद्य वीणां
स्पर्धां महत्याः सततं दधानाम् ॥
सन्तर्पयत्स्नेहदयावलोकै-
र्योगीश्वरो वाक्यमिदं जगाद ॥ ६६ ॥

कोऽसि कुत्र च विलोकितश्चिरं ?
बन्धुबुद्धिमवगाहसे कुतः ?
सज्जते विगहते तु कुत्रचि-
[1]न्मानसं हि परलोकबन्धुषु ॥ ६७ ॥

अल्पापि वीणा महतीमतिक्रान्ता कुतोऽर्जिता ॥
रागैः पूर्णापि विविधैर्वीतरागो विलोक्यसे ॥ ६८ ॥
मर्दनेन कृता पूजा गृहीताङ्ग ? भवेद्यदि ॥
तदा ग्राह्या मया वीणा प्रवीणानां शिरोमणे ॥ ६९ ॥

1. फेरुनानकपूर्वजन्मवृत्तान्तस्मरणम् ।

उवाच वाचं वचसो विरामे
योगीशितुः फेरुरुदारचेताः ॥
अन्ते गभीरस्तनितस्य केकां[1]
बर्हीव वर्षासु विनोदयन्तीम् ॥ ७० ॥

सर्वज्ञतां विवृण्वन्ति न सर्वज्ञा महाधियः ॥
अतोहमेव कथये श्रीपादैर्ज्ञातमप्यदः ॥ ७१ ॥

ग्रामोस्ति स ज्ञानपुराभिधानो-
ऽन्वर्थः स सज्ज्ञानजनैर्वसद्भिः ॥
तत्रावसत्कश्चन प्राणनाथः
सुतौ सुता तस्य विभो ! बभूवुः ॥ ७२ ॥

भवानभूत्सुन्दरनामधेयः
प्रेमाभिधोऽहं भवतोऽनुजश्च ॥
स्वसावयोर्जन्मनि तत्र जाता
ख्याता सुशीला खलु सुन्दरीति ॥ ७३ ॥

पित्रानुशिष्टावपि तस्य कर्म
विहाय संसारविरक्तचित्तौ ॥
आवामगायाव गुणान्मुरारे-
र्बालौ विनीतौ पिकचारुकण्ठौ ॥ ७४ ॥

श्रोतुं जनानामभवत्समाजो
दिने दिने द्वारि विवर्द्धमानः ॥
स्वार्थस्य हानिं जनको विलोक्य
विवासयामास तदा किलावाम् ॥ ७५ ॥

---

1. केका वाणी मयूरस्य ।

क्रोशात्परं काननमास्त रम्य-
मावामगासीष्व गतौ च तत्र ॥
तपस्विना तोषकरी मृगाणां
मोहाय नौ गीतिरभूत्सुभव्या ॥ ७६ ॥

तपस्विना प्रीततरेण दत्ता
सेयं विपञ्ची विपिने वरिष्ठा ॥
सग्रामतानाः[I] किल वाहितायां
सप्तस्वरा यत्र समुन्मिषन्ति ॥ ७७ ॥

निक्षेप एषा भवतोर्पिता ते
जन्मान्तरस्य स्मृतिसाधनं च ॥
जातिस्मरत्वादिगुणा यदस्मिन्
पदाब्जयोस्ते स परं प्रसादः ॥ ७८ ॥

असागरोत्थं किल रत्नमेत-
द्भवन्तमर्हत्यपरं न कश्चित् ॥
सैषावतारान्तरमाश्रितं त्वां
सुदर्शनः कृष्णमिव[2] प्रपेदे ॥ ७९ ॥

जातिर्निकृष्टापि भवादृशां न
दोषाय विष्णोरिव[१] सूकरत्वम् ॥
कर्मापि मालिन्यकरं न किंचित्
[२]हरेरिवाभीरवधूविलासः ॥ ८० ॥

I. ग्रामतानाः = रागी द्विविध । तानप्रधानः मूर्च्छनाप्रधानश्च । तत्र ग्रामः "यथा कुटुम्बिनः सर्वेऽप्येकीभूताभवन्ति हि । तथा स्वराणां सन्दोहो ग्राम इत्यभिधीयते" इति । इत्थं स्वरसन्दोहोग्रामः स च द्विविध इति प्रोक्तः ॥

2. विपञ्ची सुदर्शन इव सुशुभे कृष्णस्य इव नानकस्य ।

१. विस्मोरिव–क०

२. दूरे–क०

त्वमीश्वरांशोऽसि मनुष्यजन्म
गृह्णन्विनोदेन युगे युगे यत् ॥
अज्ञैर्न विज्ञेयगतिस्ततः किं
भ्राम्यन्तु विज्ञा अपि ते चरित्रे ॥ ८१ ॥

कः प्राकृतो नाम जनो विरज्ये-
त्स्फीतां समुत्सृज्य समृद्धिमद्धा[1] ॥
आविर्भवेयुः सह योगसिद्ध्या
[1]तत्वावबोधा हि गुणाश्च कस्य ॥ ८२ ॥

अस्मिन्कलौ मन्दमतीनशक्तान्
शास्त्रोक्तचर्यासु किलानुकम्प्य[2] ॥
भाषाप्रबन्धैर्भगवद्यशांसि
त्वं ग्राहयिष्यस्यथ मोक्षमार्गम् ॥ ८३ ॥

एवं फेरो निगदति स्मेरः श्रीनानकोऽब्रवीत् ॥
अस्त्वप्रस्तुतवार्तेयं बल्लकीं वादयस्व भोः ॥ ८४ ॥

वीणायां वाद्यमानायां फेरुणा नानकाज्ञया ॥
"नानकोयं निराकार" इति प्रादुरभूद् ध्वनिः ॥ ८५ ॥

विश्वावसुर्वा किमु चित्रसेनः
किं तुम्बुरुर्नानक एव वायम् ॥
फेरुं विपञ्चीं रणयन्तमन्त-
[3]र्व्यकल्पयन् काननचारिणस्ते ॥ ८६ ॥

---

1. अद्धा इत्यव्ययं निश्चयार्थे ।

१. नत्वा–क०

२. कम्प्यम्–क०

३. र्यवल्पयन्—क०

वीणानादेन मुदितो नानकः फेरुमब्रवीत् ॥
"फेरो तत्त्वज्ञता[1] तेऽस्तु" गच्छ सौम्य यथासुखम् ॥ ८७ ॥

फेरुं ततः प्रापयितुं गतः कृती
श्रीनानकादेशमवाप्य मर्दनः ॥
पप्रच्छ[१] वार्तां जनुरन्तरोद्भवाम्
क्रोशार्धमार्गे स तिरोदधेऽद्भुते ॥ ८८ ॥

आगत्य मर्दनमिदं समुदीरयन्तं
चित्रं विहस्य निजगाद स योगिवर्यः ॥
चित्रं जगत् सकलमेव न पश्यसि त्वं
कालं महान्तमसदप्यनुवर्तमानम् ॥ ८९ ॥

तस्मिन्नरण्ये कतिचिद्दिनानि
निन्ये तरोर्मूलमुपाश्रितः सः ॥
अनुक्षणं मर्दनवाद्यमान-
वीणानिनादेन विनोदितात्मा ॥ ९० ॥

भूमौ[२] चतुर्थ्यामवतिष्ठमानो-
तिक्रान्तभाव्यो वशवायुचित्तः[३] ॥
स एकदा स्वासनमाश्रितः स-
न्नवाप निर्बीजसमाधिनिद्राम्[४] ॥ ९१ ॥

---

1. 'फेरो तत्त्वज्ञता तेऽस्तु" इत्याशीर्वचनं नानकस्य ।

१. प्रपक–क०

२. "स एकदास्वासनमाश्रितः सह-
न्नवाप निर्बीज समाधि निद्राम्"
श्लोकार्धोयं "क" इत्यत्र नास्ति ।

३. योगसाधने संलग्नो नानकः परज्योतिः पश्यन्ननन्द ।

४. 'क' इत्यत्रास्ति ।
ख' इत्यत्र नास्ति ।

सुषुम्नया प्राणसमीरमुच्चै-
निरुध्य नष्टत्रिपुटीविभागः[१] ॥
स तीव्रसंवेग उदीतमेकं
पश्यन्परं ज्योतिरहो ननन्द ॥ ९२ ॥

दिनत्रयं तस्य तथा जगाम
[1]कल्पत्रयाभं[२] किल मर्दनस्य ॥
तातप्यमानस्य बुभुक्षया च
व्याघ्रादिभीतस्य वने च घोरे ॥ ९३ ॥

अहं म्रिये नानक ! भोः क्षुधार्तो
व्याघ्रादिभक्ष्यत्वमुपाश्रये च ॥
इत्थं वराको बहुधा विलप्य
पलायतालं कलयन् विपञ्चीम्[2] ॥ ९४ ॥

कथं पतङ्गो गरुडेन सार्ध-
मुड्डीयतां मोहगृहीतमार्गः ॥
प्रद्योतकेनापि[३] समं तपस्वी
द्योतेत खद्योतक उन्मदः किम् ॥ ९५ ॥

स भिक्षमाणो नगरेषु गत्वा
नवं जनुः स्वस्य च मन्यमानः ॥
ययौ सुरत्राणपुराय दीन-
स्तं नानकी वीक्ष्य परं रुरोद ॥ ९६ ॥

---

१. त्रिपटी—ख०

२. त्रयांभं—क०

३. प्रद्योतने नापि—क०

1. कल्पत्रयाभः कल्पत्रयकल्पः ॥

2. महन्वी, विपञ्ची, इति वीणायाः पर्यायौ । तत्र विपञ्च्याः न पृथङ् महत्वम् ।

आश्वास्यमानापि ऋतैर्वचोभिः
श्यालप्रभावं विदता धवेन ॥
नारीस्वभावोपचितात्तु मोहा–
[1]दपायशङ्कां मनुजस्य चक्रे ॥ ९७ ॥

भ्राता ममास्ते कुशली न वा त्व–
मेकः किमागात इहातिदीनः ॥
तथा रुदत्या बहुधेति पृष्टः[2]
स्वस्थस्ततो मर्दन इत्युवाच ॥ ९८ ॥

भ्राता भवत्याः कुशली स योगी
दिनत्रयं बद्धसमाधिमुद्रः ॥
अहं वराकस्तमनुव्रजेयं
कथं बुभुक्षादिनिपीडितात्मा ॥ ९९ ॥

विक्रोशतो मे न यदाशृणोत्स
व्याघ्रादिसत्त्वैरतिभीषितस्य ॥
अपासरं[1] जीवितरक्षणार्थी
भिक्षां चरन्नत्र तदाहमागाम् ॥१००॥

परिदेवितमस्य नानकी
ऋतमेवेत्यवसाय चेतसा ॥
महतीं करुणामुपेयुषी
[2]नखसंख्यां विततार मुद्रिकाम् ॥१०१॥

---

१. दयादशं—क०

२. पृष्ठः—क०

1. अत्र मर्दनस्य चरित्रं दृष्टिपथमायाति । स नानक इवोपवासं कर्तुं न शेके ।

2. नखसंख्या = विंशतिः ।

जगाद चेदं यदि पार्श्वगे वने
तिष्ठेत्तदेहोपगतस्त्वमत्स्यसि ॥
नो चेदभूमिश्चरितान्नसंग्रह--
स्त्यस्यानुसारी न विपत्स्यसे क्षुधा ॥१०२॥

चिरन्तनस्त्वं मम तात ! लोक-
हिताभिकाङ्क्षी न च दृष्टदोषः ॥
तस्यानुकूलस्त्वयि संनिधिस्थे
मश्चित्तमाश्वासमुपैति[1] सौम्य ! ॥१०३॥

आश्वास्य तां स निजगाद न नानकस्य
त्यक्ष्यामि सङ्गमहमामरणं न कालम् ॥
एष व्रजामि विपिने विपिने धमन्तं
तं धैर्यवाननुसरामि विनोदयिष्यन् ॥१०४॥

वने व्युत्थितं नानकं स प्रपेदे
[2]त्वमासीः कुतो मर्दनेति ब्रुवन्तम् ? ॥
अवोचत्क्षुधा क्रन्दतो नाश्रृणोर्मे
दिनानां त्रयं सर्वतो भीतिभाजः ॥ १०५ ॥

व्यतर्कयं षोडशघस्रलङ्घनैः
[I]प्रयान्ति यत्प्राणकलाः श्रुतोदितम्[3] ॥
भवेत्तदन्यत्र दिनैस्तु पञ्चपैः
प्रयान्ति मे प्राणकला न संशयः ॥ १०६ ॥

---

१. मथैति–ख०

२. त्वमास्ती–क०

३. विलोट्टितं–क०

I. षोडघस्रलंघनैः द्राणकलाः प्रयान्ति इति तु अन्यत्र भवेत् मम तु पञ्चवैरेव दिनैः प्राणकलाः प्रयान्ति इति भावः ॥

समाधिनिष्ठे त्वयि भूरि वासरान्
मृते मयि प्रोद्धतजाठरानलात् ॥
स गृध्रगोमायुवृकैर्विलोडितं
वपुर्विडम्बास्पदतामिदं व्रजेत् ॥१०७॥

इत्यालोच्य सुरत्राणपुरं यातो दयार्द्रया ॥
नानक्या विंशतिर्मुद्रा मद् व्ययार्थं[१] समर्पिताः ॥१०८॥

अधुना त्वं समाधत्स्व वने वा भ्रम निर्जने ॥
अहं त्वनुगमिष्यामि [1]स्कंधसंबद्धशम्बलः ॥१०९॥

पूर्वं जहास चिरमस्य वचो निशम्य
श्रीनानकस्तदनु वाक्यमिदं जगाद ॥
प्रत्यर्पय द्रुतमिदं वसु मे भगिन्याः
नाकर्णयः किल ददाति [२]यदायुरन्नम् ॥११०॥

जगाम नानकत्रासादनिच्छन्नपि[2] मर्दनः ॥
मुद्राः प्रत्यर्पयामास नानक्यै पुनरागमत् ॥१११॥

त्यक्त्वेदं विपिनं व्रजेयमितरद्योगीव जीर्णं वपु-
स्त्वं वा ब्रूहि कुतो यियासुरसि ? भोः सत्यं वचो मर्दन ? ॥
उक्ते नानकयोगिनेति करयोः कृत्वा पुरं सोऽब्रवी-
त्पृथ्वी तावदियं तवैव सकला यत्रेच्छ तत्र व्रज ॥११२॥

अहं विपद्ये प्रथमोर्मिणैव
षडूर्मयस्त्वां व्यथयन्ति नैव ॥
सङ्गस्त्वदीयो न मया विहेय
स्तन्मां विभो ? द्वन्द्वसहं विदध्याः ॥११३॥

---

१. मद्यथार्थं–क०
२. पदाशुरन्नम्–क०
1. स्कन्धसम्बद्धशंवलः = स्कन्धे पाथेयंनीत्वा ॥
2. अनिच्छन्नपि मर्दनोनानकत्रासाज्जामेति स्पष्टं मर्दनस्य लोभः चक्षुषोः पथमवतरति ॥

नानकोऽब्रूत याचस्व मर्दनेदं महेशितुः ॥
स मेरुमणुतां नेतुमणुं शक्तश्च मेरुताम् ॥११४॥
सोऽब्रवीत् किन्न जानीमः पामराः परमेश्वरम् ॥
विना त्वदुपदेशेन देशिकेंद्र ! दयानिधे ! ॥११५॥
अथ नानक उक्तवान्प्रबुद्धो
यमनावादकृतास्पदोस्ति तक्षा ॥
जनुरन्तरसङ्गिनं तमेव
व्रज लालेति समाख्यया प्रसिद्धम् ॥११६॥
उक्त्वा तथेति तमनुव्रजताऽथ तेन
वीणाधरेण पथि वागियमभ्यधायि ॥
ज्ञानानलो दहति कर्म समूलमेव
नाकर्णितं वदसि किं विदुषोऽपि जन्म ॥११७॥
तमब्रवीन्नानकयोगिवर्यः-
प्रारब्धतो यद् दहति प्रबोधः ॥
कर्मेति सत्यं खलु तज्जयाय
चरन्ति योगं कृतबुद्धयो ये[२] ॥११८॥
अभ्यासवैराग्यमहोद्यमेन
महेश्वरस्य प्रणिधानतो वा ॥
द्रष्टुः स्वरूपे स्थितिरेव तस्य
मुख्यं फलं सिद्धिगणास्तु[३] गौणम् ॥११९॥
यः सिद्धयोगो बहुविष्णुरेव
योगी स लीलाकलितेष्टदेहः ॥
मुञ्चन् शरीरं समये न किंचि-
त्फणीव निर्मोकमुपैति दुःखम् ॥१२०॥

---

१. मण्डनां–क०

२. योगे–क०

३. गणस्तु–ख०

सिद्धीः कथंकारमुदीरयेयं
योगस्य सिद्धौ[1] जगदीशकृत्ये ॥
प्रागल्भतः क्रोधमुपेत्य योगी
स कौशिकः शक्तिभिरिद्धचेताः[2] ॥१२१॥

न ज्ञानिनो हन्त ! भवप्रवाहो
ज्ञातस्वरूपो विदधाति दुःखम् ॥
चोरः परस्यातिभयप्रदोऽपि
स्वं जानते प्रीत्युपदां ददाति ॥१२२॥

वहेन्निमज्जे सरितः प्लवेत
भजेन्न भीतिं तरणे प्रवीणः ॥
यस्तन्न जानाति स वार्यगाधे
त्रिधादरं [3]प्राज्यतरं प्रयाति ॥१२३॥

उपासते कामनया सुरान् ये
फलं न कर्मापरिपाकतश्च ॥
व्रजन्ति तस्मिन् जनने परोक्ष–
ज्ञानाज्जनुर्यान्ति च ते तदर्थम् ॥१२४॥

यो न शोके न विपदि न हर्षेण न संपदि ॥
युक्तः स योगी जगति [1]लीलाकलितविग्रहः ॥१२५॥

नानकोदितमिदं स निशम्य
प्रासदत्प्रचुरधीरवदच्च ॥
ईदृशस्त्वमधुना विधिना मे
दर्शितोसि न परो वरयोगिन् ॥१२६॥

---

१. सृष्टचै–ख०
२. तेजाः–ख०
३. न्यतरं–क०
1. लीलाकलितविग्रहः स एव भवति यस्य विग्रहः शरीरं सुखे दुःखे च समानं भावं रक्षति ॥

परस्परालापसुखेन खेद-
मवापतुस्तौ न पथि प्रयुक्तम् ॥
अत्यष्टिसंख्यैर्दिवसैः पुरं तत्-
प्रजग्मतुर्लम्बितभूरि[1] देशौ ॥१२७॥

लालस्तु दूरात्तमुदीक्ष्य हृष्टः
उत्थाय साष्टाङ्गनतिं चकार ॥
निशाकरं पूर्णमुपेत्य तूर्णं
समुद्रवद् वृद्धिमतीव दध्रे ॥१२८॥

किं नाम ते कुत्र विलोकितोसी-
त्युदीरयन्तं तमसौ जगाद ? ॥
त्वं स्वाश्रमे नाम मदीयमुक्त्वा
पृच्छस्यहो ? विस्मरणस्वभावः[2] ॥१२९॥

अनेकजन्मनां वार्तां जैगीषव्य इव स्मरन्[3] ॥
परीक्ष्यसे मां किमहो कुत्र दृष्ट इति ब्रुवन् ॥१३०॥

स्मेरस्य तस्य वचसा स च नानकस्य
प्रक्षाल्य पादयुगमासनमुत्ससर्ज ॥
वास्यादिकीलघटने कलयन् यदास्त
तन्न्यस्तवान्सपदि भोज्यममुष्य चक्रे ॥१३१॥

उपानयत्सर्षपशाकयुक्ताः
सा वाजरी पिष्टजरोटिकास्ताः ॥
सासूयमालोकत मर्दनस्तु
स्मेरस्ततो योगिवरो बभाषे ॥१३२॥

---

१. प्रजायतुर्लंविध—क०

२. विष्णुरणस्वभावः—क०

३. जैगीषव्यवस्मामृ—ज०

आनीतं भज सुजनेन भोज्यमेत-
त्सासूयां वितर न मर्दनेह दृष्टिम् ॥
श्रीदाम्नः पृथुकमिवेश्वरः कृतज्ञा
भक्तानां लवमपि भूरि भावयन्ति ॥१३३॥

तयोरश्नतोर्मर्दनो वाचमूचे
पृथिव्यामिदं स्वादु नैवोपलब्धम् ॥
सुधामाहृतां स्वर्गतः किं निविच्य ?
ययाचे दृशं लालसिद्धः स्वशक्त्या ॥१३४॥

भुक्त्वोत्थितं जिगमिषुं लालो नानकमब्रवीत् ॥
मासमास्वेह नावज्ञा यदि ते यतिसत्तम! ॥१३५॥

स्वीकृत्य तस्थौ यतिवर्य एत—
त्तं मर्दनो विज्ञपयांम्बभूव ॥
दृष्ट्वा कुटुम्बं पुनरत्र शीघ्र–
मागन्तुमिच्छामि भवन्निदेशात् ॥१३६॥

कृतानुज्ञो गतस्तेन मर्दनस्तलवण्डिकाम् ॥
अपृच्छन्नानकोदन्तं कालस्तं क्लान्तचेतनः ॥१३७॥

मर्दनः स्पष्टमाचष्ट त्वत्तो विरहितोऽपि सः
उदयाद्रेरिव रविर्न शोच्यः[2] प्रस्फुटन्महाः ॥१३८॥

किं वर्ण्यतां वेदिकुलावतंसः
स नानको यस्य तपस्विनोऽपि ॥
तपःप्रतापस्तप भानुभास्वान्
यशः शरच्चन्द्रमरीचिशुभ्रम् ॥१३९॥

---

१. विज्ञापयां—क०
२. शोच्यप्रस्फु—क०

कलौ कलावान्क इवेदृशः स्याद्--
अहो वशीकारविरक्तियुक्तः ॥
अद्धा[1] दधानोपि च योगसिद्धीः
साधारणः सर्वंजनेषु भाति ॥१४०॥

कालेन तदुपाकर्ण्य सुतशोकादुदीरितम् ॥
[1]मृषैव चाटुकारत्वं त्वज्जातिप्रकृतिः किल ॥१४१॥

नानको यमनावादे यमेन नियमेन च ॥
दिने वनेऽनयत्कालं रात्रौ लालगृहेऽवसत् ॥१४२॥

अध्यात्मवादबहुलाःकथयन्कथास्ता[2]
रात्रीः स पञ्चदश लालगृहे निनाय ॥
याभिर्जनस्य मलिनेपि मनस्युदश्वे--
ज्जन्मादिदोषविदु[3]षोऽस्य जगज्जिहासा ॥१४३॥

तद्दे[4]शपालयवनाधिपतेरमात्य--
स्तं बाहुजो मलिक[5] इत्यभिधीयमानः ॥
भूदेवभोजनदिने यतिमाजुहाव
विप्रेण पञ्चम इति प्रथितेन भोक्तुम् ॥१४४॥

आहूतोऽपि न सोऽगच्छत्तं[6] च मेने मुहुर्मुहुः ॥
मलिकः क्रोधताम्राक्षः पुनरेव तमाह्वयत् ॥१४५॥

---

1. मर्दनस्य वैणिकजातिगतसामान्यदोषं चाटुकारत्वं निन्दति कालः ।
चाटुकाराणां मृषावादित्वं सकलजनसिद्धमेव ॥

१. अद्वा—क०
२. स्ताः—क०
३. विदुरस्य—ज०
४. दश पाल—ज०
५. मलिजा—क०
६. गच्छेत् तं च—क०

गतो नानकस्तत्र तं वीक्ष्य रोषा-
दवोचत्स शूद्रस्य न क्षत्रियस्य ॥
त्वमत्स्यन्नमेतादृशः कस्तपस्वी ?
धराधर्मसेतुः कुतो वाऽगतोऽसि ? ॥१४६॥

देहि भोज्यमिति नानक ऊचे
शष्कुलीः स च ददावतिमृद्वीः ॥
अग्निना यनवकोद्भवजाता
रोटिका युगपदेव चचाल[१] ॥१४७॥

वामेन हस्तेन दधार शष्कुली[२]-
र्दक्षेण दत्तः स च रोटिकास्ततः ॥
[I]रक्तप्लुताः शष्कुलिका विलोकिता-
स्ता रोटिकाः किं च तदा पयःप्लुताः ॥१४८॥

नानको मलिकमेतदवोचद्
भोजयस्यहह लोहितमेव ॥
तं निशम्य चकितोऽखिललोको
लज्जितस्तु मलिको मलिनास्यः ॥१४९॥

म्लेच्छाधिपस्य तनयोऽथ बभूव रुग्णः
काले गते कियति तं सहसा प्रबोध्य ॥
आरोग्यमस्य कुरुतेत्यखिलानवज्ञा-
त्सिद्धानमुं च मलिको धृतपूर्वरोषः ॥१५०॥

---

१. चलालः—क०

२. सस्कुलि—क०

I. या रोटिकाः पयः प्लुता आसन् ता एव रक्तप्लुता अवलोकिता नानकमाहात्म्यात् ॥

सिद्धाभासास्तेन बद्धा विपत्तिं
नानारूपां नीयमाना नितान्तम् ॥
[1]अप्रौढत्वान्निग्रहेऽनुग्रहे वा
सर्पभ्रान्त्या रज्जवो[2] दण्डितास्ते ॥१५१॥

तेषां विपत्तिमवलोक्य दयार्द्रचित्तो
लालो विलप्य बहु नानकमेतदाख्यत् ॥
बद्धा म्रियन्त इह हा ! यवनस्य गेहे
सिद्धास्त्वमेवमसि निर्दयतां गतश्चेत् ॥१५२॥

नानको यवनराजमवोच-
न्मुञ्च सिद्धनिवहं यदि सूनोः ॥
[2]वार्तमिच्छसि न चेदधुनैव
पश्यसि [3]स्वकृतमप्रतिकार्यम्[I] ॥१५३॥

मुक्ताः सिद्धा म्लेच्छराजेन सर्वे
नत्वा भूयो नानकः प्रीणितश्च ॥
सूनोस्तस्यारोग्यमासीदकस्मा-
ज्जाता कीर्तिर्योगिनोऽस्यावदाता ॥१५४॥

इति श्री जगद्गुरुनानककथायां नानकचन्द्रोदयसमाख्यायां
सिद्धविमोचनं नाम सप्तमः प्रस्तावः ॥

---

१. अप्रौडत्वा–क० २. राजिला—क०

३. कृतप्रतिकार्यम्–ख०

I. सिद्धनिबहं यवनराजत्रासान्मोचयित्वा नानक परां ख्यातिमगादिति भावः ।

2. वार्तं कुशलमिति ।

अथ अष्टमः प्रस्तावः

हंसासनां स्फटिकमालिकयाम्बुजेन
राजत्करां सितशुकेन च पुस्तकेन ॥
कुन्देन्दुचन्द्रशरदभ्रसगोत्रभासं
चेतः समुल्लिखति काश्चन देवतां मे ॥ १ ॥

बोलाररायस्तलवण्डिकाया-
माकर्णयन् मर्दनमागतं तु ॥
अवोचदाहूय ममावसानं
जरापरीतस्य न दूरमस्ति ॥ २ ॥

नानकमानय मर्दन !
[1]दिदृक्षते मे मनो नियतम् ॥
साधोस्तस्य विलोकन-
मन्ते मम तारणायालम् ॥ ३ ॥

मर्दनोऽब्रूत राजेन्द्र ! बालसिन्धुं मया सह ॥
प्रेषयस्व स तन्मित्रमानेष्यति न संशयः ॥ ४ ॥
बोलारराय आहूय[१] बभाषे कृतसत्कृतिः ॥
त्वदेककृतिसाध्यं भो ! नानकानयनं द्रुतम् ॥ ५ ॥

वृद्धस्य तस्य प्रणयं यतीन्द्रे
निर्व्याजमालोक्य मयाभ्युपेतम् ॥
समर्दनोऽहं निरगां च तूर्णं
तद्दर्शनोत्साहविकृष्यमाणः ॥ ६ ॥

---

1. आर्यभिदेऽत्र श्लोके जरापरीतस्य बोलाररायस्य नानकं प्रति सद्भावना सौहार्द्रं च लोचनपथमञ्चतः ।

१. ह्वय–क०

गतो दिनैर्भूरिभिरस्य पार्श्वे
निषेवितं सूरिभिरात्मनिष्ठैः ॥
[१]साष्टाङ्गमानम्य फलैश्च पुष्पै-
रपूजयं लालगृहे यतीन्द्रम् ॥ ७ ॥

आलोक्य मां प्रेमविशेषरम्य-
मिदं बभाषे करुणाविधेयः ॥
किं बालसिन्धो ? कलितः कुटुम्बै-
रस्मान् विसस्मार भवान्[1] नितान्तम् ॥ ८ ॥

अवादिषं तं चरणौ निपीड्य
[2]विस्मर्यते यो बहिरस्ति लोकः ॥
[२]यच्चित्तशय्यामधिशय्य दीव्य-
त्यसौ कथं विस्मरणस्य पात्रम् ? ॥ ९ ॥

[३]मलीमसानि[3] त्वददर्शनेन
दिनान्यतिष्ठन्त्यपि दुष्टदैवात् ॥
आयान्ति तीर्थे सलिलस्य वेगाद्
यथा चिताङ्गारवितानकानि ॥ १० ॥

यशांसि शृण्वंस्तव जातहर्षः
प्रतिक्षणं ध्यानपरस्तवैव ॥
बोलाररायो जरया श्लथाङ्गो
विज्ञापयामास पदा[४]ब्जयोस्ते ॥ ११ ॥

---

1. प्रेमविशेषरम्यं बालसिन्धुं 'भवान्' इति पदेन सम्बोधितवान् ॥
2. यः चित्तशय्यामधिशय्य दीव्यति स न विस्मर्यत इति भावः ।
3. मलीमसानि = पापानि ।

१. साष्टांग–क०
२. विस्मर्यनैंयो–क०
३. अलीम–क०
४. ज्जयो–क०

ग्राहेण हस्तीव दुरत्ययेन
ग्रस्तोऽस्मि कालेन जरापरीतः ॥
इच्छामि मोक्षं तव दर्शनेन
विष्णोरिव स्वेषु दृढं दयालोः ॥ १२ ॥

देवा विगेहा इव पूजकान्स्वा–
न्वैराग्यभाजोऽपि भजन्ति भक्तान् ॥
तस्मान्मुमूर्षोः मनुजस्य[1] तस्य
मनोरथं पूरय पूर्णकाम ! ॥ १३ ॥

भोगापवर्गावव्यक्तमिव जीवस्य संसृतौ ॥
मर्दनोऽहं च नियतौ गतौ प्रत्यर्पयाव[2] तम् ॥ १४ ॥

ततो मया वाद्यधरेण युक्तो
गतो "गुरुर्नानक" इत्युदीर्य ॥
बोलाररायः सुजनः प्रकृत्या
विलोकितव्यो विषमे विशेषात् ॥ १५ ॥

लालं रुदन्तमापृच्छ्य चलन्नित्यवदद् गुरुः ॥
अभेद आवयोः सौम्य ! को वियोगो विषादकृत् ? ॥ १६ ॥

समयो मयाक्रियत मासमासितुं
तव संनिधौ दिवसपञ्चविंशतिः ॥
अतिवाहितैव दिनपञ्चकं पुनः
समुपागतेन वसतिर्विधास्यते ॥ १७ ॥

नानावनानि नगराणि च खेटवाटीः
पश्यन् ययौ स सुजनैः परिपूज्यमानः ॥

---

१. मुजवस्य—क०
२. प्रत्यर्ययाव—ख०

वीणाधरेण च[1] मया च तमोरजोभ्यां[2]
युक्तो रराज खलु सत्त्वगुणो यथैव ॥ १८ ॥
दृष्टः प्रविष्टस्तलवण्डिकायां
शिष्टैस्तु हृष्टैरभिनन्दितोऽभूत् ॥
अज्ञैरविज्ञातमहासमज्ञै-
रूचेऽस्य विक्षिप्तधियो दशेयम् ॥ १९ ॥
बोलाररायस्य गृहाय यान्तं[१]
कालश्च लालश्च स चन्द्रभानुः ॥
विलोक्य हाहेति गिरा रुदन्तः
कारुण्यपूर्णानि वचांस्यवोचत् ॥ २० ॥
न युज्यते नानक ! ते शरीरे
प्राचीनचीरस्य विधारणोऽयम्[२] ॥
निकामरूक्षैर्भसितैश्च लेपः
खेदावहः श्मश्रुजटाग्रहश्च ॥ २१ ॥
कः क्षत्रियो हा तरुणः सचेता ?
जुगुप्सितं वेषमिमं बिभर्ति ॥
वयोऽवसाने वनवासचर्या
कृतास्ति कैश्चिद् विषयैरकृष्टैः ॥ २२ ॥
कस्योपदेशस्तव किं नु दुःखं ?
यस्मात्समग्रं प्रविहाय सौख्यम् ॥
अस्मांश्च दुःखाम्बुनिधौ निमज्ज्य[३]
त्वया कृतो हा सहसा विडम्बः ! ॥ २३ ॥

---

1. वीणाधरेण-मर्दनेन, मया = बालसिन्धुना ।
2. सत्त्वगुणो नानकः तमोरजोभ्यां बालसिन्धुमर्दनाभ्यामित्यन्वयः ।

१. यातं—क०
२. विधारणेयम्—ख०
३, विमज्य—ख०

पूर्वे न किं नो यतिमन्त आसन्
वाराणसी[1] वा शिवरामवर्मा ॥
स्थिता हि ते क्षत्रियधर्म एव
कृता न कैश्चित् स्वविडम्बनेयम् ॥ २४ ॥

रोरुद्यते ते जरया परीता
मातैकपुत्रा कुररीव[2] दीना ॥
आशा च पितृप्रमुखैस्त्वदीयै-
रस्माभिरासादि चिरात्कृतायाः ॥ २५ ॥

प्रारब्धयोगेन विमोहितस्य
नूनं विपर्येति जनस्य बुद्धिः ॥
अकार्यकारी मतिमानतश्चे-
त्कस्मादुपालम्भपदं[3] वराकः ? ॥ २६ ॥

माताऽब्रवीदश्रुनिरुद्धकण्ठा
जीवामि यावद् [१]वस तावदेव ॥
पुरो बहिर्वत्स ? कुटीं विधाय
द्रक्ष्याम्यहं त्वामपरे यथैव ॥ २७ ॥

उद्वर्तनैः[4] स्निग्धसुगन्धशीतै-
रङ्गानि यान्यङ्ग ? वि[२]पोषितानि ॥
अरुन्तुदं मे विदधासि तेषु
क्षारैर्विरूक्षैः क्षरणं किमर्थम्[5] ? ॥ २८ ॥

---

1. वाराणसेयः शिवरामवर्मेति युक्ततरः पाठः स्यात् ॥
2. कुररीव मातैकपुत्रा नानकमाता ।
3. तरुणस्य तपस्योपालम्भपूर्णेव ।
4. उद्वर्तनः = उबटन इति भाषायाम् ।
5. श्लोकेष्वेषु मातुः एकमात्रं पुत्रं प्रति सशोकालापः ॥

१. द्दश—क०
२. वियोवितानि—क०

प्रकोष्ठयोः काञ्चनकङ्कणाभ्यां
किणः कृतो हीरमनोहराभ्याम् ॥
उल्लिख्यते सम्प्रति धार्यमाण-
विरूक्षरुद्राक्षविघर्षणेन ॥ २९ ॥

इदं वपुः काञ्चनगर्भगौरं
शोभाकरं राजसभासु भूयः ॥
अनुक्षणं दुःश्रववासितासु
किं स्थाप्यते श्वापदमण्डलीषु ? ॥ ३० ॥

क्षामः क्षुधा नैष भवेन्मयेति[1]
प्रातः सदन्नं किल भोजितो यः ॥
कथं स कालेऽनियते निरीहः ?
कटूनि वन्यानि फलानि भुङ्क्ते ॥ ३१ ॥

तातस्त्वदीयो रुषतीमवादीद्
बाल्येऽपराध्यामि ततस्तु नाहम् ॥
विहाय मां देहमिवेह वत्स ?
त्वं जीववद् भ्राम्यसि कस्य हेतोः? ॥ ३२ ॥

वन्ध्या वरं स्नेहगुणैरबद्धा
वियुक्तपुत्रां सुतिनीं तु धिग्धिक् ।
न निन्द्यते नग्नशिराः सहैव
निपातितोष्णीषक एव हास्यः ॥ ३३ ॥

प्रणम्य दूरादथ नानकेन
कुटुम्बकं स्वं जनकादि सर्वम् ॥
स्वयं समाधायि भवद्भिरेतन्
न चोत्तरापेक्षकमित्यवादि ॥ ३४ ॥

---

१. मैषदिभवेन्मयेति–ख०

प्रश्नमवादीद्धितथे किमेवं ?
पुत्रादिसर्गे धृतनिश्चयाऽसि ॥
समीपसंस्थेऽपि मृते तनूजे
शक्नोति कर्तुं जननी किमस्य[1]? ॥ ३५ ॥

पान्था यथा रात्रिषु धर्मशाला-
माश्रित्य तिष्ठन्ति पुनः प्रभाते ॥
स्वां स्वां दिशं यान्ति तथा कुटुम्ब-
सार्थः स्वकर्मानुसृतः स्थिरो न ॥ ३६ ॥

जानन्त्यनित्यं तनयादियोगं
ये ते वियोगे न समुद्विजन्ते ॥
प्रागेव निम्नोन्नतपिच्छिलज्ञा
न ह्यन्धकारेऽपि पथि स्खलन्ति ॥ ३७ ॥

तस्मात् स्वपुत्रस्य विहाय सङ्गं
त्वं देवकीपुत्रमुपाश्रयस्व ॥
पुत्रात्पितुर्बन्धुजनात्किलाप्तः
स एव भक्त्या हृदि भाव्यमानः ॥ ३८ ॥

प्रभावादेव तदभूत्तस्याज्ञानकलोदयः ॥
उपदेशेऽपि[१] शतधा न जानन्ति हि योषितः ॥ ३९ ॥

बोलाररायस्य गृहं जगाम
तमागतं वीक्ष्य समं च मश्चात् ॥
उत्थाय पादावभिवन्द्य तस्य
हृदालिलिङ्गोच्चलिताश्रुधारः ॥ ४० ॥

---

1. नानकस्य जीवनदर्शनमस्मिन् श्लोके। यदा ध्रुवमेव वियोगस्तदा वियोगस्य दुःखेनालमिति भावः।

तुलनाः—जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य चेति।

१. षि–ख०

पल्यङ्क एनं कशिपूपधान-
युक्ते नवे स्थापितवानधश्च ॥
तिष्ठासुरासीदथ नानकेन
संस्थापितस्तत्र करं प्रगृह्य ॥ ४१ ॥
उवाच राजा मम पूर्वपुंसा
पुण्यस्य पाकोऽद्य मयाऽन्वभावि[1] ॥
यद्वीतरागस्त्वमरण्यचारी
तीर्थस्त्वमागत्य गृहान नैषीः ॥ ४२ ॥
न चित्रमेतद्भगवज्जनेषु
न ध्यानतस्तत्प्रकृतिं गतेषु ॥
स वै शबर्या विदुरादिकानां
जगाम गेहं स्वजनानुरागात् ॥ ४३ ॥
ज्ञास्याम्यहं त्वां प्रथमावलोके
सुप्तं वने सर्पकृतातपत्रम् ॥
[2]स्मरस्यदः सम्प्रति ते गुणौघाः
पुरा मयोक्ताः प्रकटीभवन्ति ॥ ४४ ॥
जरातुराणां परलोकभीति-
रनुक्षणं बुद्धिमतामुदेति ॥
अपैति सा तत्त्वविबोधभाजां
भवादृशानां सुहृदां प्रसङ्गात् ॥ ४५ ॥
कथं गतिः स्यादतिमोहितस्य ?
मिथ्यैव रम्यैर्विषयामिषैर्मे ॥
केशा बभूवुः शणतन्तुतुल्या
नवो नवो वा विषयाभिलाषः ॥ ४६ ॥

---

१. स्वमायि–क०
२. स्मरन्त्य–क०

लोभादयोऽन्ये न तथा जनस्य
यथा खलीकारकरः स्मरस्तु ॥
नरो बलीभिः पलितैः कुरूपो
मां कामयेतेत्यनुयाति मुग्धाम् ॥ ४७ ॥

दन्ताः न सन्त्येव न वारनारी-
कपोलदन्तक्षतवासना तु ॥
जागर्ति चित्ते करयोश्च कम्प-
स्तथापि तुङ्गस्तनयोर्जिघृक्षा ॥ ४८ ॥

इत्थं विषीदन्तममुं दयालुः
गुरुर्गरीयांसि वचांस्यवोचत् ॥
आजन्मनस्त्वं सुकृती कृतज्ञो-
न शोचनीयं [1]भवताऽन्तकाले ॥ ४९ ॥

यदैव दोषान् विषयेषु [2]बुद्ध्वा
हितो निजः सप्रतिमो मुकुन्दः ॥
तदैव जीवो भवपाशमुक्तः
खट्वाङ्गवत् को नु विलम्बहेतुः ? ॥ ५० ॥

आयासलभ्यैः क्षणसौख्यदैश्च
पापावहैरत्ययशस्करैश्च ॥
अतृप्तिदैः किं च विबुद्धसारैः
भोगादसारैर्विषयैरलं ते ॥ ५१ ॥

छन्दानुवर्ती निजसेवकानां[3]-
[1]सेव्यः कथं नैष विभुर्वदान्यः ? ॥

---

१. भववान्तकाले—क०

२. बुद्धा—क०

३. सेवनांसि—क०

1. विभुर्निजसेवकानां छन्दानुवर्ती, भेदेन स बैकुण्ठपदं ददाति अभेदेनाखण्डमानन्द-मातनोति ।

भेदेन वैकुण्ठपदं ददाति
ध्यातः किलात्मानमभेदतो यः ॥ ५२ ॥

[1]उपास्य बुद्ध्यात्मधियाऽथ वेशो
भक्तैः स्मृतः शर्मकरोत्यवश्यम् ॥
खण्डोन्नमिश्रः किल केवलो वा
[2]जुष्टः सृजत्येव जनस्य तुष्टिम् ॥ ५३ ॥

यथा यथा भेदधियं विहाय
भजन्ति भक्ता भगवन्तमीशम् ॥
तथा तथा सन्निधिमीयमान-
स्तेषां स आत्मैव भवत्यखण्डः ॥ ५४ ॥

यदा मनस्ते [१]सगुणेऽनुरक्तं
तदा मयोक्तं हृदि भावयस्व ॥
विहारशय्यासनभोजनेषु
पुरः स्फुरन्तं हृदयाम्बुजे वा ॥ ५५ ॥

बर्हावतंसमरविन्ददलायताक्षं
[2]पूर्णेन्दुसुन्दरमुखं तनुतुङ्गनासम् ॥
विस्तीर्णवक्षसमुदारसुवृत्तबाहुं
फल्गूदरं कनकगौरवराम्बरञ्च ॥ ५६ ॥

---

१. सगणोतुर—ख०

1. अत्र द्वैताद्वैतयोर्विवेचनपुरस्सरं सारगर्भमुपदेशमुपदिशति उपास्य बुध्या आत्मधिया वा स्मृतो विभुः शर्मंकरोत्येव ॥ तथा च प्रथमं भेदबुद्ध्या स्तुतः शिवः अभिन्नः सम्पद्यतेऽवसानेऽभेदबुद्ध्या ॥

2. सगुणे ईश्वरे मनोभावयितुमुपदिशति दयालुः ॥ तत्र क्रियते गुरुणा सगुणरूपस्य वर्णनं "पूर्णेन्दु" इत्यादिना ॥

[1]आकुञ्चितेषु चिकुरेषु गवां रजोभि-
र्वन्यस्रजा मधुरवेणुरवेण सायम् ॥
गोपीमनांसि मदयन्तममुव्रजन्तं
धेनूर्व्रजस्य विशिखासु[2] च वेत्रपाणिम् ॥ ५७ ॥

स्मेरातसीकुसुमकान्तिमयातपाम्र[१]-
कैशोरविस्फुरदनङ्गविलासरम्यम् ॥
काश्मीरचर्चिततनुं मदनाभिरामं
मुक्तावलीमकरकुण्डलकङ्कणाढ्यम् ॥ ५८ ॥

आताम्रपल्लवनवाङ्कुरचारुमौलिं
स्वेदाम्बुभिर्विरलबिन्दुभिरात्तशोभम् ॥
आविष्कृतोत्तमविभूतिमनन्तशक्तिं
भक्तेषु वत्सलमधीशमुपाश्रयेत ॥ ५९ ॥

चतुर्भिः कालापकम्

रूपेऽस्मिन्धारणादार्ढ्यात्[२]सूक्ष्मग्राहिणि मानसे ॥
विलाप्य सकलं विश्वं ब्रह्मात्मानं विभावयेत् ॥ ६० ॥

जगत्परब्रह्मविवर्त एतत्
पृथङ् न तस्मात्पृथगीक्षमाणम् ॥
स्वापस्य विश्वस्य यथैव निद्रा
माया तथास्य प्रतिभासहेतुः ॥ ६१ ॥

---

1. सगुणरूपमुपासता कविनात्र कृष्णस्यैव रूपमाद्रियते ।

2. विशिखा = High way गमनमार्गः ।

१. तथाम—क०

२. दार्ढ्यात्—क०

न बन्धमोक्षौ मयि निर्विकारे
सदा सदानन्दचिदात्मरूपे ॥
अभ्यासदार्ढ्यादिति[1] पक्वबोधः
कृताकृते शोचति नैव साधुः ॥ ६२ ॥

यदस्ति भाति प्रियनामरूप-
स्वरूपमेतत्सततं प्रतीतम् ॥
मायात्र मिथ्या किल नामरूपे
ब्रह्मास्मि भाति प्रियमत्र सत्यम् ॥ ६३ ॥

चैलाजिनादिरचिते स्थिर[2] आसने सन्
प्राणान्नियम्य मनसा स्वमनश्च बुद्ध्या ॥
बुद्धिं नयेत्प्रकृतिमात्मनि तां च धीर--
स्तं शुद्धबोधजलधौ परमात्मतत्त्वे ॥ ६४ ॥

पार्ष्णिप्रपीडितगुदः पवनं निरुद्धं
चक्रेषु षट्सु शनकैरुपनीययोगो ॥
रुद्धेन्द्रियो विगतवासन उन्नयेत
तं ब्रह्मरन्ध्रमभिभिद्य विमुक्तिकामः ॥ ६५ ॥

श्रीचन्द्रशेखर ! सदाशिव ! पार्वतीश !
सीतापते ! दशरथात्मज ! रामकृष्ण ! ॥
गोवर्द्धनोद्धरण ! कंसहरेति शब्दः
कश्चित्स्मृतो भवति योगशताधिकान्ते ॥ ६६ ॥

एतैर्मुमुक्षोरमृतायमानै--
र्वचोभिरस्योद्धतकश्मलः सः ॥

---

१. दार्न्या—क०
२. स्थित--ख०

पदाब्जयोस्तस्य[१] शिरो निधाय
ननाम मेने कृतकृत्यतां च ॥ ६७ ॥
विज्ञापयामास धरासुरेण
पाकः प्रणीयेत गवां निकेते ॥
भुङ्क्ष्वाभिलाषोस्ति चिरान्मदीय-
स्तथेति तेनाभिहितो जगाद ॥ ६८ ॥
उन्मेद[1] ! आयाहि विशोधयस्व
गोष्ठं द्रुतं गोमयगोमुखेन ॥
शुद्धाभिधं[2] ब्राह्मणमानयस्व
करोतु पाकं स च नानकाय ॥ ६९ ॥
आकारितो नरपतेर्वचसाऽविलम्ब--
मुन्मेदमागुरुमुखश्रुतपाकशास्त्रः ॥
आशीर्वचः [२]प्रयुयुजे क्षितिपाय शुद्धो
भाण्डानि भृत्यशिरसा स नयन् उपेत्य ॥ ७० ॥
शुद्धं पुरः स्थितमभाषत भूमिपालः
पाकज्ञताद्य तव विप्र ! ममोपयुक्ता ॥
भोज्यं द्रुतं कुरु रसै रससंख्यकैस्त्वं
युक्तं विशिष्य मधुरं च मनोहरं च ॥ ७१ ॥
कुर्वे यथाज्ञापितमेव देव !
शुद्धोऽभिधायेति चकार पाकम् ॥
आमोदमात्रेण नृणां मनांसि
हरन्तमास्वादनतो ब्रुवे किम् ! ॥ ७२ ॥

---

1. उन्मेदः = पाचकस्य नाम ।
2. शुद्धाभिधं = शुद्धनामकम् ।
१. पदान्तयो--ख०
२. प्रयुयमे—ख०

त्रयो बुभुजिरे तत्र नानकोऽहं[1] च मर्दनः ॥
कवले कवले स्वादं वर्णयामास वैणिकः ॥ ७३ ॥

संयावमोदकमहोत्तमकुण्डलिन्यः[2]
सत्पूपपायससुशष्कुलिकारसालाः ॥
जिह्वातले विनिहिताः किल मर्दनस्य
वन्दित्वमेव विदधुर्यतिहासहेतुम् ॥ ७४ ॥

किमयं नलः ? पुनरुपात्तशरीरः
किमु भीम एव वपुरन्तरधारी ? ॥
द्विजरूपमाप किमु पाकरहस्य-
मिति ? तस्य वाचि विजहास यतीन्द्रः ॥ ७५ ॥

कृतभोजनं जिगमिषुं यतिवर्यँ
नृपतिः पितृप्रमुखतोस्य[१] नियुक्तः ॥
विधृताञ्जलिर्बहुविधैरुपचारैः-
स्थितये जगाद त्रिविधानि वचांसि ॥ ७६ ॥

वाणिज्यं तु विधास्यति प्रतिनिधिस्ते त्वं तपस्यां कुरु
स्थित्वा वा कृषिमाचरन्तु मनुजाः कूपत्रयं दीयते ॥
तूष्णीं वाऽथ तपस्यतस्तव जनाः कुर्वन्तु सत्रं सदा
धान्यं दास्यति सेवकस्तव दयासंपन्नसंवर्द्धिकः ॥ ७७ ॥

वोलारराये विनयादित्युक्त्वा विरतेऽब्रवीत् ॥
"श्रीनानकनिराकारो" गिरं श्रोतृ-मनोहराम् ॥ ७८ ॥

---

1. अहम् = बालसिन्धुः ॥
2. जलेबी इति भाषायाम् ।
१. तौस्य—क०

विक्रीयेदं शरीरं मलमयमदृढं लभ्यते ब्रह्म येन
वाणिज्यं तन्मतं मे कृषिरपि निहिते तत्त्वमस्यादिबीजे ॥
[I]चेतः क्षेत्रे समु[१]क्ष्यामल-मनन-जलैर्ज्ञानदिव्यान्नराशि-
र्यस्यां लभ्येत सैवोत्तमकृषिकजनैस्तन्यते नाम नान्या ॥ ७९ ॥

कृमिकीटसरीसृपान् पतङ्गा-
नगणेयानसुरान् सुरान्नरांश्च ॥
परिपोषयते य एष सत्री-
पुरतस्तस्य करोतु सत्रिताङ्कः ॥ ८० ॥

उत्थाय स [2]जगामैव रुदत्येव कुटुम्बके[3] ॥
नतस्ततस्तेन योगी कस्य मित्रमिति स्फुटम् ? ॥ ८१ ॥

पुनर्लालगृहं गत्वा स्थित्वा पञ्चदिनानि सः ॥
जगाम गौरान् वङ्गांश्च [4]सत्यसंधा हि साधकाः ॥ ८२ ॥

ताम्बूलवल्लिपरिवेष्टितपूगसान्द्रा
रम्भादलैरुपचितैः परिवीज्यमानाः ॥
एलाफलैः सुरभयो बहुनारिकेरा[२]
ग्रामा मुदं विदधिरे यतिनोऽस्य रम्याः ॥ ८३ ॥

I. नानकमते सैव कृषिर्यस्याममलमननजलैर्ज्ञानदिव्यान्नराशिर्लभ्यते । सा च तपस्यतैव लभ्यते ।

2. एवकारोऽत्र गमनायात्यन्तेच्छाजनकः ॥

3. अनादरे सप्तमी न तु भावे ॥

4. अर्थान्तरन्यासोऽलङ्कारः ॥

5. सत्त्री इति युक्तः पाठः । गृहस्वामीत्यस्यार्थः ।

१. समुक्ष्यामल—क ३

२. नालिकेरा—ख०

साष्टाङ्गप्रणतिषु पेशला जनास्ते
नातिथ्येष्वतिथिजनस्य वङ्गदेश्याः ॥
अब्भक्षास्त्रिचतुरवासरांस्तदा स्म
क्षुत्क्षामो गुरुमिति मर्दनो जगाद ॥ ८४ ॥

नृणां मनांसि रूक्षाणि देहा एवेह चिक्कणाः ॥
शिखैव बृहती साधोर्दया तुच्छैव लक्ष्यते ॥ ८५ ॥

तपस्यतस्ते सङ्गेन जायते गतसंशयम् ॥
ध्मायमानस्य वर्णस्य मलस्येव गतिर्मम ॥ ८६ ॥

अयाचितव्रतधरो याचितेप्यप्रयच्छताम् ॥
देशान्भ्रमसि दुष्टानां मृतिमिच्छसि मे स्फुटम् ॥ ८७ ॥

एवं क्षुधा क्रन्दति मर्दने तु[3]
विशिष्य हासापजहास योगी ॥
जगाद चार्कस्य फलान्यमूनि
त्वमद्धि तूराणि च सङ्गृहाण ॥ ८८ ॥

मर्दनोऽमृतकल्पानि फलान्याखाद्य कानिचित्
वारयित्वा वयो दृष्टिं [1]ग्रन्थौ निक्षिप्य बद्धवान् ॥ ८९ ॥

अन्येद्युस्तानि भुञ्जानो जिह्वातालुगले द्रुतम् ॥
स्फोटान्यवाप कटुकान्युद्ववाम विलज्जितः ॥ ९० ॥

बङ्गान्विगाह्य निखिलानथ कामरूपान्
स ब्रह्मपुत्रमवतीर्य ययौ[2] यतीन्द्रः ॥

---

१. पंथौ—क०
२. वी—क०
३. स्य—क०

प्राग्ज्योतिषं पुरमगादवलोकयिष्य-
न्वीणाधरो यतिवरेण निवारितोऽपि ॥ ९१ ॥

तत्रोपजग्मुः प्रमदाश्चतस्रो
विलोभयन्त्यो वचनैर्मनोज्ञैः ॥
[1]निचिक्षिपुस्तं तु मनुष्यकण्ठे
स मेषतामेत्य भृशं ननाद ॥ ९२ ॥

एष मेषत्वमानीतः कश्चिद् वैदेशिको बलात् ॥
प्रमदाभिरिति श्रुत्वा तत्रात्रामपि सङ्गतौ ॥ ९३ ॥

ता एव प्रमदास्तं तु मत्कण्ठे क्षेप्तुमुद्यताः ॥
मेष्यः कृता नानकेन मर्दनो मनुजः कृतः ॥ ९४ ॥

उत्कलांश्च कलिङ्गांश्च सान्ध्रकर्णाटकेरलान् ॥
उल्लङ्घ्य द्रविडान् योगी सिंहलद्वीपमागमत् ॥ ९५ ॥

मुक्ताफलानि विपुलानि महोज्वलानि
दिग्दन्तिवंशजनुषः करिणो विशालाः ॥
अम्भोजसौरभजुषः प्रमदाः सुरूपा
द्वीपे महर्द्धिमति तत्र सुरो विशाखः ॥ ९६ ॥

[2]सिद्धंमन्यस्तत्र बभूव क्षितिपालो
विश्वेषां सङ्कल्पितदायो शिवनाभः ॥
योगीन्द्रे तद्वीपमुपेते गतसिद्धिः
चिन्तां चक्रे किं मम वाचा वितथार्थाः ?॥ ९७ ॥

---

1. प्रमदया मर्दनो मेषः कृतः कामाख्याधामेतादृशी शक्तिर्वर्तत एव प्रमदासु इति श्रूयते ।
2. सिद्धंमन्यः=वस्तुतोऽसिद्धः ॥

आरामस्तस्य रम्यो हृदयसुखकरो शुष्यदासिच्यमान-
स्तच्चिन्ताम्लानचित्तो निजपुरनिलयं क्षत्रिवंशो[1]ऽन्वयुक्त[2] ॥
पूर्वावस्था कथं स्यान्मृदुपवनवटस्येत्यसौ तं न्यगादी-
दागच्छेन्नानकश्चेदुपवनमखिला योगसिद्धीर्दधानः ॥ ९८ ॥

रुद्धद्वारे तदुद्याने दैवादागत्य नानकः ॥
प्राविशत्तदभूत्तूर्णं नन्दनस्पर्द्धि नूतनम् ॥ ९९ ॥

परशुराम इति प्रथितोऽभव-
त्सचिव उत्तमबुद्धिरमुष्य सः ॥
अवददत्र समागतवान् यति-
र्नियतमस्य तपस्तव सिद्धिहृत् ॥१००॥

तस्य प्रवेशमात्रेण चित्रं चैत्ररथोपमः ॥
आरामस्ते रमयते मनो नूतनपल्लवैः ॥१०१॥

तमानयेह [3]योगिनं
नृपो जगाद मन्त्रिणम् ॥
न मन्त्रिणार्थितः परं
जगाम नानकः कृती[4] ॥१०२॥

राजाज्ञया भोज्यमतीव रम्यं
स्त्रियः सुरूपावसनं महार्घम् ॥
निनाय मन्त्री स च लोभयिष्यं-
[1]स्तृणाय मेने [5]यमिनां वरिष्ठः ॥१०३॥

---

१. क्षत्रियं मोन्वयुक्त–क०
२. कृत्–क०
३. योगीनं–क०
४. कृता–क०
५. यतिनां–क०

1. नाग्रहीदित्यर्थः । "मन्यकर्मे" ति चतुर्थी ।

कामकेलिकलाभिज्ञाः
पुरस्तात्तस्य योगिनः ॥
स्तम्भा इव जडीभूता
[1]रम्भासम्भाविताः स्त्रियः ॥१०४॥

जानासि [2]कुक्षिम्भरयो भ्रमन्ति
काषायवस्त्रेण यथा जटाभिः ॥
तपस्विनो नाम तथायमेव–
मयं [1]यतिः कश्चिदपूर्व एव ॥१०५॥

स्वसिद्धतागर्वमुपेक्ष्य दूरे
तदेनमावर्जयतार्जवेन ॥
त्वयाधिगम्यो महिमा महीयां–
स्तेनेति राजाकथितो जगाम ॥१०६॥

चरणे पतितः सचिवेन समं
नृपतिर्यतिमेतदुवाच वचः ॥
मम पुण्यभरेण समागमितः
कुधियामनयं स भवान् क्षमताम् ॥१०७॥

तमभाषत नानकस्तपस्वी
पुरुषार्थो नहि [3]सिद्धिरङ्ग ! कश्चित् ॥

---

1. रम्भासम्भाविताः = : = रम्भाया जाता इव रम्भा इव वा स्त्रियः ॥
2. कुक्षिम्भरिः = उदरनिमित्तं बहुकृतवेषः ॥
3. सिद्धिरङ्ग = नाम सम्बोधने ॥

मनुजस्य जनुः प्रपद्य विद्वान्
भवरोगस्य चिकित्सिते यतेत ॥१०८॥

बालसिन्धुरिति सभ्यसमाजे
नानकस्य चरितं वदति स्म ॥
अङ्गदोऽथ गुरुभक्तिभवेन
प्रेमपूरविभवेन मुमूर्च्छ ॥१०९॥

सप्तविंशतिदिनानि समाधिः
प्रेमतोभवदमुष्य विचित्रः ॥
व्युत्थितेऽथ पुनरेव कथास्मिन्
प्रावृतत्सुजनकर्णसुधा सा ॥११०॥

[1]अपृच्छन्नृपो नानकं त्वं [1]नु योगी ?
द्विजः क्षत्रियः सार्थवाहोऽथवाऽसि ? ॥
उताहो भवान् सौम्य ? गोरक्षसिद्धो
धरामण्डपे भ्राम्यसि छन्नरूपः ॥१११॥

वयं सिद्धिलेशेन गर्वायमाणा
न मन्यामहेऽन्यं विशिष्टं धरायाम् ॥
न दासेरको यावदीक्षेत शैलं
[2]स्वतस्तुङ्गमन्यं न मन्येत तावत् ॥११२॥

---

1. समाधितः समागते अङ्गदे पुनस्तं ब्राह्म्याः कथाः कथयितुमारेभे ॥
२. यदवधि कश्चिन्न विशिष्टं कश्चित्साक्षात्करोति प्रत्यक्षं तदवधि वस्तुलेशेन गर्वायमाणः स न मन्यतेऽन्यं विशिष्टम् ।

१. तु—ख०

तदस्माकमेतर्हि यद्विद्धि पथ्यं
तदेवोपदिश्योद्धरेर्वालिशत्वम् ॥
कृपाप्रेरितो दैवतो दैवतो मे
त्वमागत्य कल्याणकारी भवाऽऽशु ॥११३॥

राजानं निजगाद नानकयतिर्धर्मैः क्रियाभिर्गुणैः
[1]जात्या दूरसमुज्झिताचितिरहं बोधात्मिका वस्तुतः ॥
सख्या मे मयि नामरूपमखिलं संस्थापितं लीलया
तत्ते सौम्य ? विशिष्य किं नु कथयेः सर्वोऽस्मि [2]सर्वाश्रयः॥११४॥

मायामयेऽहं संसारे प्रीत्यप्रीतिविवर्जितः ॥
उदासी नानको नाम वेदितव्यस्त्वयाधुना ॥११५॥

यदा जनोऽयं जानाति सर्वस्मादस्म्यहं नतः ॥
उन्नतत्वं तदा धत्ते विश्वस्मादिति निश्चितम् ॥११६॥

उपदिदेश ततोऽमुमनुत्तमं
नरपतेर्विनयेन[3] वशीकृतः ॥
सुकृतिनां कलिकल्मषहानये
क्षितितले किल नानकसम्भवः ॥११७॥

सेव्यमानो नृपतिना योगजिज्ञासुना त्वहम् ॥
द्वौ वर्षौ पञ्चमासांश्च तस्थौ तत्र यतीश्वरः ॥११८॥

योगसारैरुपचितां तमूचे प्राणभृङ्खलाम् ॥
अक्लेशाज्जायते [4]योगी यया विज्ञातया गुरोः ॥११९॥

---

१. दर—क०
२. शुयः—क०
३. विजयेन—क०
४. योगो—क०

द्वीपमस्पर्शनाथस्य[1] प्रतस्थे नानकस्ततः ॥
मर्दनो भृशमुद्विग्नो न यास्यामीत्यभाषत ॥१२०॥

बोधितोऽपि बहुधा मया यदा
न न्यवर्तत तदा यतीश्वरः ॥
मागमः पथि खलैरुपद्रुते
बोधयन्निति न तेन वीक्षितः ॥१२१॥

तस्मिन्गते योगिवरो [2]न्यषीदन्–
मयोक्तमस्यानुशयः किमर्थम् ? ॥
न मन्यते यो हितमुक्तमाप्तैः
स्व कर्मणः पाकमसौ हि भुंक्ताम् ॥१२२॥

पुनरूचे दयासिन्धुर्बालसिन्धो ? यथार्थवाक् ॥
सार्थागतस्य तदपि चिन्ता भवति भूयसी ॥१२३॥

तत्रैव रात्रिं विगमय्य योगी
प्रभातकाले निजगाद खिन्नः ॥
इतो नवक्रोशमिते प्रदेशे
पचत्यमुं रात्रिचरः[3] कटाहे ॥१२४॥

उपेक्षणीयो न च वैणिकोऽयं
मूढोप्यलं प्राकृतजातियोगात् ॥
तदेहि यावो यदि जीवयेतां
कर्त्ता त्रिलोक्याः कुशलं तदा स्यात् ॥१२५॥

---

१. पस्पर्श—क०
२. व्यषीदत्—क०
३. रात्रिचरः—क०

आवां तत्र गतौ करालदशनः केशैः महाकर्कशै-
र्व्याप्तो रक्तनिमग्नघोरनयनो दीर्घः शिराः सन्ततः ॥
वैयाघ्रैरिव भीषणैः कररुहैर्व्यापादयत्प्राणिनः
श्यामः [1]क्रोडमुखो व्यलोकि विकृतः क्रोडाऽभिधो राक्षसः ॥१२६॥

पक्त्वा महाकटाहे कटुतैले मर्दनस्य वपुः ॥
शिशिरीकुर्वन्भोक्तुं निशाचरो नानकेनोक्तः ॥१२७॥

किं रे क्रोड ? कुबुद्धे ?
मनुष्यमांसासनव्यसनम् ॥
अधुनैधितं तवेदं
बिभेषि न स्वामिनो जगतः ॥१२८॥

सङ्कल्पो योगिनस्तस्य यथैव चपलं तथा ॥
अवर्तत स्थिरचराश्चित्रं न लवमन्यथा ॥१२९॥
तर्जितो व्याघ्रपालेन व्याघ्रो भीतः पतेत्क्षितौ
यथा तथा नानकस्य निपपात स पादयोः ॥१३०॥

[2]आयाहि मर्दन ? जवात्परिवादयस्व
वीणां कुतस्त्वमिति ? तस्य वचस्यकस्मात् ॥
उत्प्लुत्य मांसमखिलं महतः कटाहा-
द्द्रोणाधरस्य वपुषा रणयद् विपञ्चीम् ॥१३१॥

रात्रिंचरस्तु कृतमन्तुरतीव भीतो
बद्धाञ्जलिर्मुहुरुवाच गुरो ? क्षमस्व ॥

I. क्रोडः = तन्नामा राक्षसः ।
1. मर्दनः क्रोडान्नानकेन मुक्तः ॥
१. महुरु–ख०

वीणाधरं त्वमनुनीय तदाऽतिथेर्यीं
कुर्या इति स्मितमुखो यतिरावभाषे[1] ॥१३२॥

मधुराणि फलान्याशु [१]कन्दल्यानन्ददायकम् ॥
प्रत्येकमर्पयामास स[A] समानीय कौणपः ॥१३३॥

पुण्यं पुण्यजनस्य[२] जन्म निकृतं कस्मिंश्चिदासीद् ध्रुवं
मन्ये तत्परिपाकतो यतिवरस्तं देशमभ्यागमत् ॥
तस्मै स्वांशमदादुदारधिषणः शेषाधियाश्चादसौ[३]
तूर्णं दिव्यशरीरमाप सुरवद्देदीप्यमानो रुचा ॥१३४॥

सप्तदिनानि निशाचरभक्त्या
तत्र सतां सुखदो यतिरस्थात् ॥
[3]सैन्धवसिन्धुदिनैरधिगम्यं
देशमगात्स शुभाय बहूनाम् ॥१३५॥

अनूपे वने निर्जने गच्छतां नः
तदान्नं महादुर्लभं यद् बभूव ॥
क्वचिच्छीर्णपर्णैः क्वचिच्छैवलाग्रैः
क्वचिद्वारिवातैस्ततो वृत्तिरासीत् ॥१३६॥

---

1. यदा नानकः "मर्दन कुतस्त्वम् आयाहि परिवादयस्व वीणाम्" इत्यगादीत्तदा तस्य महसः प्रभावादागतो मर्दनः कटाहात् इति वर्वति नानककस्य महसो महिमा ॥
2. उदारधिषणो गुरुर्यदा तस्मै स्वांशमदात्तदा तूर्णमसौ दिव्यशरीरमापेत्यन्वयः ॥
3. सैन्धवसिन्धुदिनैः = ४७ दिनैः । A: स न आनीय--क० नास्ति युक्तियुक्तः पाठोऽयम् ।

१. कन्दमानन्द–ख०
२. पुरापजन–ख०
३. श्ना–ख०

यदा मर्दनो रोदनारक्तनेत्रः
क्षुधा क्षीयमाणो न गन्तुं शशाक ॥
[1]पदाग्रेण योगी तदा पद्मरागं
विहस्योद्बिभेदाद्भुतं वालुकाभ्यः ॥१३७॥

माणिक्यमादाय जगाद योगी
क्रोशद्वये पत्तनमस्ति[2] रम्यम् ॥
सन्दर्शये यत्र परीक्षकेभ्यो
यदस्य मूल्यं तदिहाभिधेहि ॥१३८॥

मर्दनस्तु तदादाय विश्वम्भरपुराभिधे ॥
नगरे दर्शयामास कश्चिद्रत्नपरीक्षकम् ॥१३९॥

स मूढश्च दरिद्रश्च मूल्यमस्य पणत्रयम् ॥
उवाच वाचस्तुच्छास्यान्महत्यो निःसरन्तु किम् ? ॥१४०॥

अनुवदति तदुक्तिं मर्दने नानकेन
कथितमतिमहान्तं रत्नबोद्धारमश्च ॥
अधिनगरमपृच्छत्कोऽत्र रत्नप्रवीणो ?
जनमपि तमगच्छत्सालसंरायमेषः[3] ॥१४१॥

पृच्छन् गृहं तत्र गतो महर्द्धि[4]--
द्वारि स्थितो द्वारनियुक्तरुद्धः[5] ॥
निर्गत्य दासो भवनादपृच्छ--
त्कुतो भवान् ? किं च तवात्र कार्यम् ? ॥१४२॥

---

१. यदापेण--क०
२. यत्रनमस्तिरस्यं--क०
३. सालसराब--ख०
४. महद्धि--क०
५. नियुक्त--क०

बहिः [3]पुरादाम्रवनेऽस्ति योगी
देशानटन्नानकनामधेयः ॥
तत्प्रेषितः सालसरायपार्श्वं[1]
समागतोऽहं मणिविक्रयाय ॥१४३॥

इत्येवमुक्तो[2] [2]घटकाभिधानो
नीत्वा स भृत्यो बहुमानपूर्वम् ॥
तमभ्यगात्सालसरायपार्श्वे
सन्दर्शयामास मणिं महान्तम् ॥१४४॥

युग्मम्

अदृष्टपूर्वं स मणिं निशम्य
विचिन्तयन्मूल्यमलब्धसीमः ॥
चिरादचित्रीयत चाक्षराणि
पठन्नवोचल्लिखितानि तत्र ॥१४५॥

गृह्णातु मा वा मणिमस्य पश्यो—
मुद्राशतं यच्छतु नानकाय ॥
इत्यत्र यस्माल्लिखितं गृहाण
मुद्राः शतं तेन ततोऽन्यवार्ता ॥१४६॥

मर्दनेन कथितं प्रभुरस्य
नाहमस्मि स तु नानकयोगी ॥
तत्समीपमुपढौकय मुद्रा
आचरिष्यति यथारुचितं सः ॥१४७॥

---

1. सालसरायः = मणिबोद्धा विश्वम्भरपुरे सालसंरायो वेस्य नाम व्यवहृतमस्ति काव्येऽत्र।
2. अधरकः = सालसरायपारिपाश्वंकः ॥

१. पुरस्ता—क०
२. घरका—क०
३. वामा—क०

भक्ष्योणि भोग्यानि मनोहराणि
स्वयं गृहीत्वा घटको[१] जगाम ॥
पपात भक्त्या पतितः पदाब्जे[२]
निवेद्य सर्वं सुखितो बभूव ॥१४८॥

अधरक ? सुखितोसीत्यालपद्योगिवर्यः
क नु सुखमिह साधो ? त्वादृशानामसङ्गे ॥
सुचरितपरिपाकादद्य ते दर्शनेन
सुखमिति गदतोऽस्य प्रासदत् सूनृतेन ॥१४९॥

गतो मर्दनो नानकस्याथ पार्श्वे
शतं रुप्यकाणि प्रयच्छन् बभाषे ॥
अनेनैव नीतो मणिज्ञेषु मुख्य-
मगच्छं गुरो सालसंरायमित्थम्[३] ॥१५०॥

मणिं वीक्ष्य किञ्चिन्न मूल्यं स ऊचे
चिरं भावयन् ते तदाचष्ट तुष्टः ॥
शतं रूप्यकाण्यस्य सन्दर्शने मूल्य--
मर्हस्यतः पूर्णपात्रं गृहाण ॥१५१॥

निजगाद नानकगुरुर्गद गत्वा
नहि पूर्णपात्रमहमस्मि[४] जिघृक्षुः ॥
स उवाच ालससमीपमुपेत्य
मम पूर्णपात्ररुचिरस्ति न सौम्य ? ॥१५२॥

---

१. घरको—क०
२. पादाम्भे—क०
३. सालसराय—क०
४. मत्रास्मि—ज०

सप्तकृत्वो रूप्यकाणि प्रेषयामास सालसः ॥
नानको न तु जग्राह ग्रहिला[1] निःस्पृहाः किल ! ॥१५३॥

अधरकेण तदोक्तमयं यति--
र्भ्रमति भिक्षितुमित्यवगच्छ मा[1] ॥
निजजनुः सफलं यदि वाञ्छसि
त्वमुपयाहि तदा परितोषय ॥१५४॥

दासेन दत्तबुद्धिः सालसरायः प्रगृह्य पक्वान्नम् ॥
द्रव्यं विचित्रवस्त्रं जगाम तेनैव सह नम्रः ॥१५५॥

पदयोः पपात सकलं विनिवेद्य
न तु नानकः किमपि तद् जगृहेऽस्य ! ॥
हृदि मर्दनः सुरपितृन् प्रययाचे
ननु भोजनं प्रतिश्रृणोतु यतीन्द्रः ॥१५६॥

विक्रेयं रत्नमेतद्यतिमिति वचनं सालसोऽब्रूत योगी
मूल्यं पप्रच्छ[2] बुद्धौ स्फुरति न खलु मेऽदृष्टपूर्वस्य मूल्यम् ॥
इत्युक्ते तेन किं त्वं जनुरपगमयस्यश्मचिन्तासु मोघं ?
नामानर्घं मुरारेः स्मरसि न [3]कुत ? इत्यालपन्नानकस्तम् ॥१५७॥

मयेदमुक्तं न कथं ब्रवीति
मूल्यं गुरूरत्नपरीक्षकाणाम् ॥
ख्यातिं गतोऽस्मिन्नगरे समृद्धे
वयो व्ययो रत्नपरीक्षयाऽस्य ॥१५८॥

---

1. अर्थान्तरन्यासः सामान्यसमर्थितः ।

१. हा–क०

२. पप्सत–क०

३. कुल–क०

नानकेन प्रथितो प्रथितोऽय-
मश्मजातिगुणदोषविवेके ॥
ईशनाम मणिमेतमनर्घं
भूषणं सुमनसां किमु वेत्तु ? ॥१५९॥

श्रुत्वेति सालसोऽपृच्छत्किमेषां नाम विश्रुतम् ? ॥
नानकाग्रे निराकारो मयेति समुदीरितम् ॥१६०॥

साष्टाङ्गं प्रणतोऽब्रूत सालसो नानकं तदा ॥
क्षमस्व मे दुर्विनयमज्ञस्याशु प्रसीद च ॥ १६१॥

अधरकस्य [2]पदे पत नानक-
स्तमवदत्स तदेदमुदैरयत् ॥
तव [3]पतामि सदैव गिरा गुरो ?
चरणयोः शुनकस्य किमस्य तु ? ॥१६२॥

प्रससाद नानकगुरुर्वचसास्य
निजमुत्तरीयमददादनुकम्पः ॥
अथ तेन तत्क्षणकृतावरणोऽपि[4]
महदद्भुतं स हि निरावरणोऽभूत् ॥१६३॥

उपदिदेश गुरुर्भव वारिधि-
र्ननु षडूर्मिभिरेष सुदुस्तरः ॥
प्रवहणं हरिनाम समाश्रयं-
स्तर वितीर्णमकिञ्चनधीवरैः ॥१६४॥

---

१. किं–क०
२. यदेयत—क०
३. यतामि—क०
४. वणोपि–क०

ज्ञानवैराग्यसम्पत्तियुक्तालसः
सङ्क्रमय्य श्रियंस्त्वस्य सूनौ तदा ।।
तीर्थयात्राभिलाषादटिष्यन्महीं
स्थापितस्तत्र सिंहासने योगिना ।।१६५।।

तेनाभ्यधायि भवदायुरतो विशिष्टं
वर्षद्वयं स्वरमिताः सुमते ! च मासाः ।।
अन्ते ततस्तव पदेऽधरकं निवेश्य
गन्ता दिगन्त[1]महमात्ममनो[2]ऽनुकूलम् ।।१६६।।

मम भाग्यमन्तसमये
त्वां द्रष्टाऽस्मीति कथितवता ।।
तेनोपचार्यमाण-
स्तावत्कालं गुरुस्तरथौ ।।१६७।।

तस्मिन्नतीतेऽधरकं पदे निवेश्य सः ।।
द्वीपसंस्थं विषहरं देशं स्वैरगतिर्ययौ ।।१६८।।

इति श्रीजगद्गुरुनानककथायां नानकचन्द्रोदयसमाख्यायां
सालसरायविमुक्तिर्नामाष्टमः प्रस्तावः ।।

—: ० :—

१. दिभगन्तं—क०
२. महमात्ममनो—ख०

नवमः प्रस्तावः

सा शारदा शरदिजेन्दुमरीचिगौरी
चित्ते मम स्फुरतु यत्करुणप्रणाली ॥
जाड्यं हरन्त्यपि विबोधसुधाच्छटाभिः
स्वेषां जडं वितनुते हृदयारविन्दम् ॥ १ ॥

मर्यादामविलङ्घयन् प्रभुरपि प्राचीं गभीराशयः
सिन्धुस्तुङ्गतरङ्गमुक्तविलसन्मुक्तागणस्तत् क्षणम् ॥
दृष्टो नानकपूजनाय नियतं पुष्पाञ्जलिं प्रक्षिपन्
न क्षुद्रा हि महान्त एव महतां माहात्म्यविज्ञाः किल ॥ २ ॥

तरङ्गबाहून् विततान् दधान-
स्तमाजुहाव स्वनकैतवेन ॥
आलिङ्गितुं तापहरं जनस्य
सिन्धुर्ध्रुवं वाडवदूयमानः ॥ ३ ॥

उत्प्लुत्य पादांसि पयोधितोये
निराश्वसुर्नूनमिदं विचिन्त्य ॥
न ज्ञानिनो हन्त ! कुतोऽस्य सङ्गो
जडस्य सङ्गे विगतं वयो नः[१] ॥ ४ ॥

पोतैराकुलितः सिन्धुः क्रोडसंस्थैः[२] समन्ततः ॥
वमन्फेनकफं वृद्धमन्वकार्षीत्[३]कुटुम्बिनम् ॥ ५ ॥

---

1. महान्त एव महतां माहात्म्यज्ञाः इत्यर्थान्तरन्यासः ।

१. न—क०

२. संस्थैः—क०

३. मन्वाका—क०

पञ्चत्रिंशत्क्रोशदीर्घं दधानो
देहं[1] पञ्चक्रोशविस्तीर्णमासीत् ॥
मत्स्यस्तस्मिन् सेतुतुल्ये त्रिघस्री
नीतोऽस्माभिः सञ्चलद्भिः समुद्रे[2] ॥ ६ ॥

गच्छामः कुत्र बालेति ? मामपृच्छद् गुरुस्ततः ॥
नाहं वेद्मीति गदिते मत्स्योऽयमिति सोऽवदत् ॥ ७ ॥

भीतो मत्स्यमुखं दृष्ट्वा मर्दनस्तमवादिषम् ॥
राक्षसाद्रक्षितो येन तस्मिँस्तिष्ठति किं भयम् ? ॥ ८ ॥

मीनो मनुष्यस्य गिरं जगाद
"गुरुर्निराकारक" नानकोऽसि ॥
त्वं केन वेत्सीत्यथ तेन पृष्टे ?
स सारमूचे वचनं विसारः ॥ ९ ॥

त्रेतायुगे मित्रमहं तवाऽऽसं
किञ्चिद् त्वदुक्ताकरणोत्थकोपे ॥
किमुच्छलस्यद्य ? यथैव मीनो
रोषादिति त्वामवदं सहेलम् ॥ १० ॥

तेनास्मि मीनः स्मृतपूर्वजन्मा
यन्मामपृच्छस्तदिदं मयोक्तम् ॥
इहास्व मामुद्धर दीनबन्धो ?
बन्धोऽयमन्येन न यस्तु भेद्यः ॥ ११ ॥

अत्र २.३,४, ५ श्लोकेषु समुद्रवर्णनम् ।

1. ३५ × ५ क्रो० = १७५ क्रो० क्षेत्रफलं मीनदेहस्य ।

2. स च मीनो नानकं नीत्वा प्रचलितः मर्दनश्च भीतो जातः ।

आवां स्थितिं पृच्छति योगिवर्ये
तिष्ठेति तं मर्दन आबभाषे ॥
मयोक्तमज्ञस्य ममास्ति शक्तिः
सर्वज्ञकानामभवन्नियोगे ॥ १२ ॥

क्षमस्व मे चापलमित्यवोचत्
तं मर्दनस्तत्र निशां निनाय ॥
यतिः सपादप्रहरे दिनेऽसौ
मत्स्यो मृतो दिव्यगतिं प्रपेदे ॥ १३ ॥

मां प्राक्ष्यसीत्युक्तमनेन पश्च-
दिनानि सिन्धोः सलिले गतं च ॥
कालः करालः कलिराजगाम
व्यात्ताननो[1] ग्राहवपुर्ग्रहीता ॥ १४ ॥

प्रावेशयत्तस्य मुखे यतीन्द्रः
स्थूलं कठोरं किल दण्डखण्डम्[2] ॥
स आर्तनादं बहुधा विमुच्य
पश्चाचलन्नम्बुनिधौ ममज्ज ॥ १५ ॥

उन्निद्रचन्द्रधवलः परिपिङ्गकेशो
मन्दारदारुरुचिरां कलयन्विपञ्चीम् ॥
प्रादुर्बभूव पुरुषः किल तत्र यत्र
तेजोमये न नयनानि नृणां स्थिराणि ॥ १६ ॥

---

१. व्यालाननो—क०
२. खण्डदण्ड—क०

स्मेरः स नानकमभाषत पद्मयोनि-
रस्याधिकारमकरोदधुना कलेर्यत् ॥
तस्याऽस्य भङ्गमकरोः किमु तद्बलेन ?
को ब्रह्मणो[१]ऽन्यथयितुं क्षमते व्यवस्थाम्? ॥ १७ ॥

नानकस्तमभिवन्द्य बभाषे
ब्रह्मणैव विहितः समयोऽयम्[1] ॥
निःस्पृहेषु हरिभक्तिरतेषु
तापसेषु न [२]कलेर्बलमस्ति ॥ १८ ॥

एवमेव किल नानकयोगिन् ?
इत्युदीर्य सुरलोकमगच्छत् ॥
नारदः स यदि वादितवीणो
नानकेन कथितः स च मह्यम् ॥ १९ ॥

दिवसानथ पञ्चदशाम्बुनिधेः
स्थलवज्जल एव जगाम यतिः ॥
न च योगिजनस्य विचित्रमिदं
तदनुग्रहतो मतिरास्त[३] हि नौ ॥ २० ॥

अभक्षयाव वायुमेव
सोऽपि सिन्धुसङ्गतः[1] ॥
निकामदुःसहोऽभवत्
पटुः पटुर्न[४] तर्पणे ॥ २१ ॥

---

1. समयाः शपथाचारकालसिद्धान्तसंविद इति ।

१. ब्राह्मणो—क०

२. षुकले—क०

३. तिः—ख०

४. कटुः पटुर्न—क०

विषहरमथ देशं शुद्धसेनस्य राज्ञो
यतिनृपतिरगच्छन् मर्दनं पत्तनाय ॥
चलितमहमवोचं चञ्चलस्त्वं नितान्तं
प्रकृतिरतिबलिष्ठा[1] सङ्गतिः किं करोतु ? ॥ २२ ॥

ध्वजो वर्द्धकिः पाङ्गराख्यस्य पुत्रो
नृपस्येन्द्रसेनो भगिन्यात्मजश्च ॥
तयोर्बोधनीयोऽहमत्रागतश्चे-
त्पुरं यासि तं नानकोऽब्रूत यान्तम् ॥ २३ ॥

विषहरनगरे ध्वजं स पृच्छ-
न्नधिगतवान् यतिमुक्तवान् स ऊचे ॥
अविदितमपि योगिनं प्रपद्ये
भवति वृथा न तपस्विनोऽवलोकः ॥ २४ ॥

शाकं लकुचपुष्पाणां साकं तेन च रोटिकाः ॥
आदाय वर्द्धकिरगान्मधुराणि फलानि च ॥ २५ ॥

निवेद्य सर्वं पदयोः पपात
ध्वजोऽस्मि ते पादपयोजसेवी ॥
अङ्गीकुरु प्रेषितमीश्वरेण
त्वमात्तकामेति तो बभाषे ॥ २६ ॥

जानीषे जगदीशमित्यभिहिते तेन ध्वजोऽभाषत
त्वं चेज्ज्ञापयितासि देशिक ? तदा ज्ञास्यामि किं नेश्वरं ? ॥
क्रोशानां दशपञ्च च ध्वजशतान् यत्रागतोऽहं तव
ज्ञानार्थं बहुजन्मसाधनकृतस्तेनेदमुक्तं पुनः ॥ २७ ॥

---

१. ष्ठा—क०

पुनरिन्द्रसेनसहितस्त्वमिहैष्यस्य[१]-
धुना व्रजेति गुरुणा गदितोऽगात्[२] ॥
[I]ध्वज इन्द्रसेनमवदत्समुपेतो
यतिराह्वते[३] ह गतविश्वरतिस्त्वाम् ॥ २८ ॥

मित्रं मे नानको योगीत्यभिधाय स निर्गतः ॥
ध्वजेन घटिकाषट्के त्रियामाया गते सति ॥ २९ ॥

इन्द्रसेनमवलोक्य यतीशः
प्राक्तनो मम सखेति जगाद ॥
किं प्रमाणमिति पृच्छति तस्मिन् ?
आह स स्म जनुरन्तरवार्ताम् ॥ ३० ॥

आस्थाम पार्श्वे जनकस्य राज्ञ-
स्त्रयो वयं तेषु बभूव मत्स्यः ॥
एकः परौ द्वौ त्वमहं च तस्य
वहाम्यभिज्ञानमिदं गृहाण ॥ ३१ ॥

कस्येयमिति ? पप्रच्छ हंसीमुद्दिश्य भूमिपः ॥
अवदाव तवेत्यावां मृषा तत्प्रियकाम्यया ॥ ३२ ॥

न्यायवर्ती[४] नरपतिर्न प्रसन्नः स उक्तवान् ॥
परिग्रहोऽयं हंसस्य तवेत्यवदतं कुतः ? ॥ ३३ ॥
अनेन मिथ्यावादेन योगिनोरपि वां कलौ ॥
स्वेच्छया भविता जन्म बहूद्धारविधित्सया ॥ ३४ ॥

I. ध्वजः = वर्द्धकिः विषहरदेशे ।
१. मिहेष्य–क०
२. ददितागात्–क०
३. राहूते–क०
४. वर्ती—क०

तथ्यमात्थ[1] किल नानकयोगिन् ?
इन्द्रसेन इति वाचमवोचत् ॥
उद्धर ध्वजममुं कृपयेति
प्रार्थनामकृत वर्धकये च ॥ ३५ ॥

यः पञ्चकोशपिहितोऽहमिति प्रतीत-
स्तं जागरादिषु सदान्वितमेव विद्धि ॥
ब्रह्माद्वितीयमहमित्यनुमाधि शर्म-
मायाविलासमितरत्सकलं तु विश्वम् ॥ ३६ ॥

आकृष्यसारमिदमुक्तमनेकयुक्ति-
श्रुत्युक्तिशास्त्रगहनाद् गुरुणानुकम्प्य ॥
सम्पन्नसाधनतपोदयमात्रबोध-
स्तेनास्य मोहतिमिरौघनिराकरिष्णुः ॥ ३७ ॥

शिष्याय शेषामददान्न तापः
स्नातो गुरुस्तं स्नपयाम्बभूव ॥
आरोपयामास महत्त्वपीठे
तं च त्रियामा प्रहरेऽवशिष्टे ॥ ३८ ॥

शुद्धसेनस्तमाहूतवान् भूमिपो
नाम मद्धागिनेयेन तस्योदितम् ॥
योगिनां नैवमाकारणं युज्यते
त्वं व्रजामुं प्रपद्यस्व सर्वेष्टदम् ॥ ३९ ॥

तेन राजोपचारेण[2] पूजा कृता
[3]पत्तनादागतेन प्रणम्योदितम् ॥

१. सात्थ—क०

२. वारे—क०

३. यत्ता—क०

ऐहिकामुष्मिकाणां शुभानां भवान्
शेवधिर्लभ्यते भाग्यतो मादृशाम् ॥ ४० ॥

अष्टादशानां धरणीपतीनां
प्रसह्य[1] राज्यं विततार योगी ॥
द्वीपत्रये तस्य तदाधिपत्यं
बभूव निष्कण्टकमस्य तुष्टेः ॥ ४१ ॥

वर्धकेरस्य नेर्ष्या विधेया त्वया
नानकेनेति राज्ञा समाज्ञापितः ॥
उक्तवान् राज्यमस्मै प्रदद्यां गुरो ?
तेषु [2]कन्थैकपात्राय कोऽन्वीर्षति ? ॥ ४२ ॥

मासमास गुरुस्तत्र सेव्यमानो महाजनैः ॥
शुद्धसेनेन्द्रसेनाभ्यां प्रार्थितः करुणानिधिः ॥ ४३ ॥

आगमन्नानको योगी द्वीपं शिलमिलाभिधम् ॥
बभ्राम वारिधावेव षण्मासान्निरवग्रहः ॥ ४४ ॥

वेलायां लसदेलायां तस्थौ सप्तदिनानि सः ॥
नगराय यियासुं तं क्षुधितं स्माह मर्दनः ॥ ४५ ॥

सन्तोषं कुरु भोः सौम्य ? मर्दन ? त्वं पलायसे ॥
कष्टेन कातरायन्ते न स्तोकेन तपस्विनः ॥ ४६ ॥

त्वं योगी जितसकलमघोऽसि साधो ?
दूयेऽहं निरवधि जाठरानलेन ॥

---

१. प्रदाय—ख०
२. कम्पैक—क०

आहर्तुं किमपि समानये पुरो स्या-
दित्यूचे स तमवदत्स तिष्ठ तिष्ठ ॥ ४७ ॥

पप्रच्छ मर्दनो नाम नगरस्यावदद् गुरुः ॥
पुरं ब्रह्मपुरं धर्मवचनो भूपतिर्द्विजः ॥ ४८ ॥

अत्रान्तरे श्रमविकासिमुखस्खलद्भि-
र्दर्भैः स्थिरश्रुतिभिरस्थिरलोचनैश्च ॥
पश्चान्मुहुर्वलितकन्धरमीक्षमाणा
दृष्टा पलायनपराः शतशः कुरङ्गाः ॥ ४९ ॥

आपेदिरे सपदि पल्वलकेलिलग्न-
पङ्काः स्फुरत्प्रतिपदिन्दुकलाभदन्ताः ॥
उन्मुक्तघुर्घुररवाः परिचर्व्यमाण-
मुस्ताधिवासितवना बलिनो वराहाः ॥ ५० ॥

गर्वेण मन्थरपदा नयनैः सरोषै-
रीषद्विवर्तिभिरुदीक्षितपार्श्वभागाः ॥
दृष्टा गतिर्गिरिण दीप्तरणिंश्रितानां
न द्वीपिनां किमपि भीतिविबोधहेतुः ? ॥ ५१ ॥

श्येनैर्नखाङ्कुशविदीर्णशशैः[१] समन्ता-
दुच्चैश्चिरं वियति मण्डलमाचरद्भिः ॥
आधर्षिता भुवि तथा पतिताः पतङ्गाः
हस्तैर्यथा मृगयुभिः परितो गृहीताः ॥ ५२ ॥

प्रान्ते वनं परिवृतं बहुवागुराभि-
स्ताद्भिश्वकद्रुभिरुपद्रुतमेव मध्ये ॥

---

१. स्मं—क०

स्थातुं न गन्तुमपि योग्यमभून्मृगाणा-
मावेगतस्तत इतः परिधावतां[1] हा! ॥ ५३ ॥

चित्रकाणां तरक्षूणां वृकाणां भयवर्द्धनः ॥
हाहाकारो महानासीन्मृगयूणां प्रसर्पताम् ॥ ५४ ॥

शशान्मृगान्केऽपि रुरून् वहन्तः
सुतासृजः केऽपि बहून् विहङ्गान् ॥
दृष्टास्ततः कार्दमिकाम्बरास्ते
धनुर्धरा जालकराः पुमांसः ॥ ५५ ॥

हरिताम्बरो नववया हयसंस्थो
मृगया वचांसि मृगयुस्त्वति जल्पन् ॥
तत आगतो नरपतिश्रमवारां-
पृषतैरुदञ्चितललाटतटश्रीः ॥ ५६ ॥

शून्ये निषण्णानवलोक्य सोऽस्मान्
पप्रच्छ के यूयमिति ? क्षितीशः ॥
उक्ते मनुष्या इति मर्दनेन
शून्ये कुतस्तिष्ठथ ? सेत्युवाच[1] ॥ ५७ ॥

पुरे निशान्तं प्रविशेम कस्य ?
तं मर्दनोऽब्रूत ततः स ऊचे ॥
यूयं किमु ? प्रव्रजितास्तदासा-
वुवाच रूक्षं किमु दृश्यते[2] ते ? ॥ ५८ ॥

---

१. तं हा—क०
२. दश्यते—क०
1. सैष दाशरथीव सन्धिप्रयोगः ।

*वक्तुं किमास्थ ? कुत आगमत प्रदेशाद् ?
भाषा न बुद्धिमधिरोहति ते स्फुटं नः ॥
इत्युक्तवत्यवनिपे क्षुधितेऽत्र तस्मिन्
क्रोधादवक्तरि मया गदितं तदेदम् ॥ ५९ ॥

इरावत्यथो[1] चन्द्रभागा प्रसिद्धा
विपाशा वितस्ता शतद्रुश्च नद्यः[१] ॥
तदन्तर्गतो भाति वाहीकदेश[2]–
स्तमस्मद्गतेर्विन्ध्यपादानभूतम् ॥ ६० ॥

त्वयाकर्णितः कश्चिदस्त्येव[२] देशः ?
स[३] ऊचे श्रुताः शुद्धसेनस्य देशे ॥
स्थितास्तापसाः केऽपि वाहीकदेश्या–
स्त एवेह यूयं किमायातवन्तः ? ॥ ६१ ॥

त एवेति मयोदीर्य तस्य नामान्वयुज्यत ॥
स ऊचे [3]धर्मवचनो द्विजोऽहं धरणीपतिः ॥ ६२ ॥

पुरं ब्रह्मपुरं नाम द्वीपं शिलमिलाभिधम् ॥
नामत्रयाणामस्माकं पप्रच्छ तदुदीरितम् ॥ ६३ ॥

नानकः स निराकारो बालसिन्धुरहं नृप ? ॥
अयं मर्दन इत्युक्तो वीणावादविनोदकृत् ॥ ६४ ॥

---

1. "अथ" इत्यर्थे "अथो" शब्द प्रयोगः "अथोनिमित्तंश्च" बुद्धच० १।१
2. वाहीकदेशः = इरावती-चन्द्रभागा-विपाशा-वितस्ता-शतद्रुनदीनां मध्ये स्थितः ।
3. धर्मवचनो नामा राजा वाहीकदेशस्य, यश्चायं देशः शिलमिलाभिधे द्वीपे ब्रह्मपुरनाम्नि-नगरेऽस्ति ॥

१. ह्य—क०   *वत्क्रं किमास्य इति 'क' पाठः ।

२. स्येब—क०

३. स··· देशै—"ख" इत्यत्र नास्ति ।

मयोक्तं कति राजानो द्वीपेषु कतिषु स्थिताः ॥
आदाय कतमस्याज्ञां राज्ञां संघः प्रवर्तते ॥ ६५ ॥

द्वीपत्रयेऽष्टादशभूमिपालाः
कुर्वन्ति राज्यं निजगाद राजा ॥
नामानि तेषां कथयेति पृष्टः
शिष्टः स ऊचे वदतां[1] विशिष्टः[2] ॥ ६६ ॥

सुखचयनकमलनयनौ[3] सुखसागरशुद्धसेनाख्यौ ॥
अस्पर्शनाथनयनज्योतिर्द्विजधर्मवचनाश्च ॥ ६७ ॥

राजा सगरसेनश्च स वीरमदनाभिधः ॥
नृपतिर्लीलनयनो[4] नामा परशुरामकः ॥ ६८ ॥

अटको[5]घटकश्चैव शुद्धशैवालकस्तथा ॥
रामायनो मग्नरायस्तथा त्वरितरङ्गकः[6] ॥ ६९ ॥

नृपो बुद्धिविवेकश्च बलसंहारनामकः ॥
अष्टादशामी कथिता नामभिस्तव पार्थिवाः ॥ ७० ॥

कमलनयनमुक्तवान्स मुख्यं
नृपतिषु तेषु मयानुयुज्यमानः ॥
अहमवदमिदं मृषा गुरुर्मे
प्रभुमकरोदखिलेषु शुद्धसेनम् ॥ ७१ ॥

---

१. वदता —क०
२. विशिष्ट—क०
३. नयना—क०
४. माल—क०
५. अटका—क०
६. रंगक—क०

राजोक्तं तत्र वक्ति किं न गुरुरित्याख्यं[1] यदा वाचयेत् ?
कश्चिद्वक्ति तदा नृपेण कथितं शब्दः क एतस्य नु ! ॥
द्विष्कर्तेति[2] पदं प्रयुक्तमवदं राजा तथा प्रोक्तवान्
योगीन्द्रो विजहौ समाधिमगदत्तं सत्यकर्तेति च ॥ ७२ ॥

राजा प्रणम्य वदति स्म किमत्र ? शून्ये
यूयं स्थिताः स्थ नगरं प्रविशन्तु सन्तः ॥
तत्रानयेत्किमपि कश्चन भोज्यवस्तु
तद्वस्तु[3] यत्र न समञ्जसमेव वस्तु ॥ ७३ ॥

गुरुणा गदितं तदेदमुच्चैः
स्मितमातत्य निशम्यतां नृपाल ! ॥
इदमेव महापुरं महीशं
निरुपाधि स्वसमाधिसाधनं च ॥ ७४ ॥

स्वामी नः स्मृतिमात्रतोऽतिसुहितः–
शून्ये वने पत्तने ।
भोज्यं[4] यच्छति रक्षति प्रतिदिनं
कार्यं च नो पृच्छति ॥
[1]व्योमव्योमखखाम्बराब्धिकरिणो
योगी भ्रमन्तो जनाः ॥
श्रान्ता यद्विमुखा सहन्ति शतशो
याम्या मुहुर्यातनाः ॥ ७५ ॥

---

१. पदा—क०
२. द्विष्कर्तते—क०
३. मुत्र—क०
४. भोज्यं––नास्ति "क" इन्यत्र ।
1. १०४ ११ ११ मिता: ।

पत्तनानि हतवैरि च राज्यं
दुर्गकोशबहुसैन्यसमाजाः ॥
शून्यतां सपदि भूप ! भजन्ते
कश्चन प्रकृतिमाह[1] ह शून्यम् ॥ ७६ ॥

ब्रह्मक्षत्रियसार्थवाहवृषला यस्यौदनं साम्प्रतं
मृत्युर्व्यञ्जनमद्रयश्च वटकाः पृथ्वीपृथुः शष्कुली ॥
एते वारिधयश्च पेयसलिलं [2]सोयं महाघस्मरः
कालः कश्चन मुञ्चतीति वितथा स्थेम्नः प्रतीतिर्नृणाम् ! ॥ ७७ ॥

दृश्यं नश्वरमाकलय्य सकलं राज्यादिमोहास्पदं
बद्धो मा म्रियतां ममत्वगहने हस्तीव पङ्के भवान् ॥
मानुष्यं समवाप्य दुर्लभमिदं केनापि पुण्येन भोः !
तं मन्त्रं जप येन मुञ्चति भवो भूतोऽनुभूतव्ययः ॥ ७८ ॥

आज्ञापयस्व किमपीति वदन् पपात
पादाब्जयोर्नरपतिर्यतिभूपतेः सः ॥
तं शुद्धसेनमवधेहि सदैव मान्यं
मान्यं नृपेष्विति गुरोर्गिरमग्रहीच्च ॥ ७९ ॥

तृणमिव राज्यमुपेक्षितुं
क्षमेत वचनामृतपानयोषितः ।
नरपतिनेति विनीतमीरितो–
नगरमगादमुना समं गुरुः ॥ ८० ॥

१. मा हृद—क०
२. सोहं—क०

[1]ऊनविंशतिमासान् स तस्थौ नृपतिसेवितः ॥
राजभोज्यानि भुञ्जानः स्थविष्ठो मर्दनोऽभवत् ॥ ८१ ॥

[1]जम्बूद्वीपस्य विविधान् प्रदेशानभ्रमद् यतिः ॥
मर्दनोऽभूद् जिगमिषुः पर्वते वीक्ष्य पत्तनम् ॥ ८२ ॥

नानकेन कथितं तव चेतः
पत्तने वसति मर्दन ? नित्यम् ॥
मर्दनेन गदितं तव शून्ये[2]
सर्वदैव रमते हृदयं हि ॥ ८३ ॥

सप्तत्रिंशदहोरात्रांश्चलितोऽस्मि निरन्तरम् ॥
मामुपालभसे दैवान्[3]नगरे समुदीक्षते ॥ ८४ ॥

अगृणान्नानकः स्मित्वा बालसिन्धो ? श्रुतं त्वया ॥
मयोक्तं सत्यमाचष्टे बुभुक्षुः प्रकृतेर्वशः ॥ ८५ ॥

स उवाच [4]चञ्चलतया न चैव किल रक्षसा मृष्टः ॥
मर्दन ऊचे सम्प्रति जठरानलभृज्यमानोऽस्मि ॥ ८६ ॥

गुरोः करुणया सिद्धिं बालसिन्धो ? त्वमागमः ॥
न मे स दयते तेन नयते [5]द्वन्द्वयातनाम् ॥ ८७ ॥

दर्शयामि नगरं यतिरूचे
मर्दनेन कथितं न दिदृक्षे ॥

1. जम्बूद्वीपः = बृहदेशियादेशस्य प्राचीनं नाम ।
१. उन—क०
२. शून्यं—क०
३. देवाल क०
४. चंचल—क०
५. द्वन्द्व—क०

पश्यसि द्रुतमवश्यमिदं त्व-
मित्युदीर्य स गतो गिरिपार्श्वम् ॥ ८८ ॥

पप्रच्छ मर्दनस्तत्र किं नानकमिदं पुरम् ? ॥
जगाद नानको योगी देवगान्धारसंज्ञकम् ॥ ८९ ॥

राजाऽस्ति देवलूतो
भूतप्रेतासुरेन्द्रसंसेव्यः ॥
सप्तदशलक्षसंख्या
नमन्ति यं नित्यमिह दैत्याः ॥ ९० ॥

आखेटार्थं देवलूतः [1]प्रसर्पद्
ईक्षांचक्रेऽस्मानधस्ताद्गिरेस्त्रीन् ॥
आहारं मे लब्धमत्रानयध्व-
मित्यौत्सुक्यादादिदेशासुरांस्त्रीन् ॥९१॥

आगच्छतस्तानवलोक्य घोरान्
[2]भीतः प्रभो ? मर्दन आबभाषे ॥
जिघृक्षवो नः समुपासरन्ति
"[I]कर्तुः क्रियां [3]पश्य[3]" यतिर्जगाद ॥ ९२ ॥

त्रयोन्धास्ते जाता अभिरविमुलूका इव[2] खलाः
पुनर्दैत्याज्ञप्ताः झटिति गतिमेतां समगमत् ॥

१. तर्पदीक्षां–क०
२. पीतयु–क०
३. पश्यति–क०
I. "कर्ता" इति शब्दो गुरुग्रन्थसाहिबे "करतार" इति ।
2. रविमभि यथा उलूका अन्धाः सञ्जायन्ते तथैव नानकमभि दैत्या अन्धाः सञ्जाता इत्यन्वयः ॥

गता वारा शप्ता सुरपतिनियुक्ता नवनवा
वि[१]युक्ता दृग्भ्यस्ते सपदि जनुषान्धा[1] इव ययुः ॥ ९३ ॥

देवलूताभिधं मन्त्रिणं भूपतिः
पृच्छति स्मेदमाश्चर्यमास्ते कुतः ! ॥
तेन विज्ञप्तमेव ध्रुवं सिद्धियुक्[१]–
तापसस्तत्परीक्षा मया तन्यते[२] ॥ ९४ ॥

सेवार्थमहमेतस्य यमिनान्धो भवामि चेत् ॥
[३]तदा त्वमपि सेवस्व देव ! स्वमतिसम्मतम् ॥ ९५ ॥

साष्टाङ्गं यतिमभिवाद्यां बभूव
नान्धत्वं सचिव ! उपाजगाम भक्त्या ॥
आयाताः कुत इति ! [४]पृच्छते स तस्मै
[1]योगीन्द्रोऽमरनगरादिति व्यचष्ट ॥ ९६ ॥

कस्यामास्ते दिशि पुरमिदं नाम किं ते [२]पुरास्य ?
[४]गच्छेत्येवं वदति सचिवे तत्र नो [३]दिग्विभागः ॥
ज्ञेयः साधो ! सचिव ! [२]भवताऽहन्निराकारनामा
निर्विण्णानां[५] नगरमटवीत्यालपद् योगिराजः ॥ ९७ ॥

---

1. जनुषांधा इव आजन्मनोन्धा इव ।
2. अमरनगरम् = देवगान्धारपत्तनस्याधोधो जम्बूद्वीपे ।
१. नियुक्ता–क०
२. पुरो–क०
३. नदा–क०
४. पृच्छ्यते–ख०
५. निर्मिण्णानां–क०

वृत्तान्तमेतमभिधाय निनाय तत्र
राजानमेष सचिवः स च दुष्टबुद्धिः ।।
बुद्धौ विभाव्य सकलग्लसनं[1] जगाम
सैन्येन सार्द्धमभवत्सविधे ततोऽन्धः ।। ९८ ।।

अन्धं तदैनमनुमाय विचेष्टितेन
किं स्वित् प्रभो ? इति नृपं निजगाद मन्त्री ।।
अन्धोऽस्मि यच्छतु दृशं पदयोः पतामि
त्यक्तोपधिर्नृपतिनेति ततोऽभ्यधायि ।। ९९ ।।

परिहसि किमु ब्रवीषि सत्य-
मिति ? सचिवोऽभिदधौ नृपो जगाद ।।
ऋतमिदमवधेहि भोः ? ससैन्यं
कृतममुनान्धमवेहि मामकस्मात् ।।१००।।

मन्त्री जगाद तव नानक ? योगिवर्य ?
राजाप्रभावमवगत्य बभूव भक्तः ।।
अस्मै दृशं वितर पश्यतु ते [१]पदाब्जे
मोहस्य दुर्विलसितानि वशिन् ? क्षमस्व ।।१०१।।

उन्मीलयस्व नयने यतिरित्यवादी-
द्राजा प्रबुद्धनयनः पदयोः पपात ।।
कर्ता परिस्फुरतु ते हृदये त्रिलोक्या
भक्ष्यं विमुञ्चति [२]यमित्यवदद् यतीन्द्रः ।।१०२।।

---

1. ग्लस् भक्षणे भ्वादि० ।

१. पदाब्जे–क०

२. जमि–क०

राजाऽब्रूत कृपा कृता मयि महारण्ये यदत्रागतं
योगीन्द्रो निजगाद पूर्वविहितां स्मृत्वागमं संविदम् ॥
आरोहाश्वलमाहरस्व किमपीत्येवं नृपेणोदिते ?
न त्वद्भक्ष्यभुजो वयं यतिरिति स्मेरः समाभाषत ॥१०३ ॥

[1]शिष्योऽस्मि ते सकलमामिषमत्यजं च
त्वं भुंक्ष्व वैष्णवजनोचितमेव भोज्यम् ॥
उक्त्वेति सप्त नृपतिः स्वभटान् न्ययुङ्क्त
तद्भोज्यवस्तु मधुरंश्च फलं ग्रहीतुम् ॥१०४॥

शुद्धसेनमवगच्छति भूपं
नानकोऽगददिदं नृप आख्यत् ॥
भक्ष्यमेव स तु पूर्वमिदानीं
यद् ब्रवीति तदमुं प्रतिपत्स्ये ॥१०५॥

मन्यसे मां यथा वीर ? तथा मन्यस्व तं नृपम् ॥
नानकेनेत्यभिहितः स तथेत्यब्रवीद्वचः ॥१०६॥

मधुराणि [2]फलान्यभुङ्क्त योगी
गिरिसंस्थं पुरभेदनं प्रपन्नः ॥
अपचं सह मर्दनोप्यभुञ्जद्
यतिनोऽजायत भोजने समाधिः ॥१०७॥

[3]सपादयामोत्तरजातबोधौ
मयाकृतं भोज्यमभुङ्क्त योगी ॥

---

१. सिखोऽस्मि—क०
२. फलानिभुंक्ष्व—ख०
३. 'सपा' इति नास्ति "क" इत्यत्र ।

शेषं[1] ददौ भूपतिमन्त्रिणोस्तौ
समाधिमुग्धौ घटिकाश्चतस्रः ॥१०८॥

तदनन्तरं प्रणमतः स्म पादयो
रुपनम्रबोधयुतपूर्वकिल्विषौ– ॥
गमितो महत्त्वममुना नृपो मरा-
न्विदधौ निराकृतिचितेर्विचिन्तकान् ॥१०६॥

नवमासमतीत्य तन्नगर्यां
प्रसराख्यं नगरं ययौ यतीन्द्रः ॥
वनमानुषभूपतेस्त्रिमास्या
विषयं प्राप स तीक्ष्णताननाम्रः ॥११०॥

असितरोमशमस्फुटभाषितं
वनमनुष्यकुलं तदभज्यत ॥
भयमुपेतमुदीक्ष्य चिरेण न-
स्तदवलोक्य विभाव्य च मर्दनः ॥१११॥

मामपृच्छद् गुरुर्बालसिन्धो ?
किमित्यब्रुवं ! भद्रमूचे तदा मर्दनः ॥
के [4]कराला इमे नानकः प्रोक्तवान् ?
मानवाः काननस्य श्रुता ये चिरम् ॥११२॥

---

१. शेषां–क०
२. ल् विपौ–क०
३. बोधुत–क०
४. के कसुला–ख०

पलायितेषु सर्वेषु स्थितमेकमुदैरयम् ॥
कोऽसि ? चीत्कृत्य स ययौ फलं मूलमुपाहरत् ॥११३॥

आहृतमेतन्मूलफलं नानक ऊचे शुद्धमिदम् ॥
भुंक्ष्व बुभुक्षाशान्तिकरं मर्दन आजहेऽहमपि ॥११४॥

मासं स्थितस्तत्र ययौ यतीन्द्रो
मार्गे समाधिप्रतिबद्धयात्रः[१] ॥
त्रयो दशाहानि हयाँश्च मासान्[I]
बभ्राम तद्वीपविलोकनोत्कः[२] ॥११५॥

स्थानीयमायास्यति मर्दनेन
पृष्टे गुरुः स्माह बुभुक्षितोऽसि[३] ॥
ओमित्युवाचायममुं बभाषे
सन्तोषमाधेहि विधेहि धैर्यम् ॥११६॥

सन्तुष्य सन्तुष्य बृहद्बुभुक्षो
म्रिये कदाचिन्नियतं स ऊचे ॥
गुरुर्बभाषे विविधैरुपायै-
र्नात्येति मर्त्यो [४]मृतिमत्र कश्चित् ? ॥११७॥

बुभुक्षया चेद् त्रपसे त्रिलोक्याः
कर्ता प्रभुर्जीवयिता भवन्तम् ॥
उदीरिता मृत्युशतस्य शान्ति-
रेकस्य नाथर्वनिरूपितस्य ॥११८॥

I. हयाँश्चमासान् = सप्तमासान् ।
१. बद्धगात्रः–क०
२. नोत्मुकः—ख०
३. तोऽस्मि–क०
४. मृतमत्र–क०

योजनोत्तरमुपेत्य पुरं तन्
नानकेन भणितं व्रज भुंक्ष्व ॥
निर्धनस्य मम दास्यति पण्यं
पत्तने क इति ? तं स बभाषे ॥११९॥

गच्छ भुंक्ष्व नगरे यदभीष्टं
चोरवत्प्रहरते यदि कश्चित् ? ॥
नाम मे वद न कोऽपि निहन्या–
देतयोरिति ? वचांसि बभूवुः ॥१२०॥

मर्दनः प्रचलितो हृदि बुध्वा
मित्रमत्र भवितास्य हि कश्चित् ? ॥
येन मामकथयद् गतशङ्कं
गच्छ भुंक्ष्व यदभीष्टमिहेति ॥१२१॥

नगरं [1]हिरण्मयमुदीक्ष्य विचित्रं
पुरुषं स्थितं पुरमुखेऽयमपृच्छत् ॥
नगरस्य नाम नृपतेश्च निजं च
वद रीतिमस्य मम सौम्य ? यथार्थम् ॥१२२॥

नगरं सुवर्णपुरमित्यभिधेयं
कमलोत्तरो नयन इत्यवनीशः ॥
मम धर्मसिंह इति नाम यथेच्छं
[2]पणमन्तरेण कलयस्व पदार्थान् ॥१२३॥

---

१. हिरण्यय–क०

२. पण्यमन्त–क०

तव नाम किं ? विपणि मे हि गृहाण
ननु मोदकादि यदभीप्सितमत्र ॥
सह सार्थिभिर्न किमपीह निषिद्ध–
मिति ? तेन भाषित उवाच स [1]हृष्टः ॥१२४॥

अहमस्मि मर्दन इति प्रथितो मे
न च सार्थिनोर्दयति वीर ? बुभुक्षा ॥
इदमुक्तवानयमनीयत पण्यं
जगृहे न किञ्चिदवितीर्णमनेन ॥१२५॥

धर्मसिंहस्तदापृच्छत्कियदस्तीति ? मर्दनम् ॥
सार्धं प्रस्थद्वयमिति मर्दनस्तमभाषत ॥१२६॥

आज्ञप्तो धर्मसिंहेन विक्रेता विनयान्वितः ॥
तोलयित्वा ददौ तस्मै पक्वान्नं मोदकादिकम् ॥१२७॥

तुलां तोलनपाषाणं सर्वं वीक्ष्य हिरण्मयम् ॥
विस्मितो मर्दनः स्माह किममीषां नु विक्रयात् ! ॥१२८॥

[I]अकृष्टपच्यं भवतीह शस्यं
गृह्णन्ति सर्वे नृपतेर्निदेशात् ॥
आगन्तवे किञ्चिददत्यभीष्टं
मूल्यं विना पार्थिव ? डिंडिमोयम् ॥१२९॥

भृतिं न वाञ्छन्ति च कारवोऽत्र
कृपा न वृष्टेः सलिलैः क्रियाश्च ॥
इत्युत्तरं प्राप्य स धर्मसिंहा–
[2]त्तुष्टो गतो मर्दननामधेयः ॥१३०॥

१. हष्टः—क०
२. तीक्ष्ण—ख०
I. अकृष्टपच्यम् = अक्लेशेन विना कृषिकर्मणा च जायमानमन्नम् ।

स उक्तवान् मोदकशष्कुलीभुक्
प्रसह्य सर्वं यतये चरित्रम् ॥
तेनोक्तमत्रास्ति[1] वृषो न पापं
वसन्ति सन्तो यवना न सन्ति ॥१३१॥

न स्वस्य जातिं वद मर्दनेह
जोषं जुषस्वातिमनोज्ञभोज्यम् ॥
वसेह योगिन् ? इति मर्दनोक्तः
स उक्तवानीशवशोस्मि नेशः ॥१३२॥

स्त्रीसङ्गं कुरुते न वा जन इति प्रश्ने तदीये जगौ
योगी दृष्टिभिरेव गर्भविधृतिर्वामभ्रुवा नो रतिः ॥
आश्चर्यं निजगाद मर्दन इदं श्रीनानको कीर्त्तय-
त्कर्तुः कीर्तय किं न मर्दन ? विभोश्चित्रं चरित्रं किल ! ॥१३३॥

राष्ट्रं कियन्नरपतेरिति मर्दनेन
पृष्टोऽवदद् यतिरतीन्द्रियबोधसिन्धुः ॥
[1]खव्योमसप्तनवयोजनसम्मितं[2] तन्
नास्यावनीपतिरुपैति तुलामिहान्यः ॥१३४॥

शुद्धसेनादपि श्रेष्ठ इति तेनोदिते पुनः ॥
सोवाच जगतीकर्तुः कारितः श्रेष्ठ एव तु ॥१३५॥

आज्ञापयसि चेद्भोज्यं तुभ्यमप्यानये[3] गुरो ? ॥
तेनोक्तमिति सोवादीत्कर्तुः[2] कौतुकमीक्ष्यताम् ॥१३६॥

---

१. त्रापि—क०
२. सम्मतं—ख०
३. तुभ्यप्यानये—क०
1. ९७११ योजनानि ।
2. सर्वत्रैवासन्ने विपदि कर्तुर्महिमानं वर्णयति यतिः ।

मर्दनो बुभुजे सप्तदिनान्यष्टमवासरे ॥
धर्मसिंहोऽवदत्तौ द्वौ कुतो नागच्छतां यती ? ॥१३७॥

वाताशनौ प्रयतमत्र इमौ तु भोज्य-
मित्युक्तवन्तममुमाख्यदसावशुद्धम्[1] ॥
किं वीक्ष्यसे ? न किमपीति ? ततस्तदुक्तौ
प्रस्थात्स पश्चकलयन्नगमत्सुभोज्यम् ॥१३८॥

[I]कर्ता कर्तेत्यालपद्धर्मसिंहः
सत्यः कर्तेत्याह योगीश्वरः स्म ॥
आनीतं किं नाम ? किं ? कश्च वर्णः ?
तेनेत्युक्तो[2] धर्मसिंहो बभाषे ॥१३९॥

आनीतं भोज्यमेतच्छुचि भवदुचितन्नाम मे धर्मसिंहो
वर्णः सर्वस्य चैको नृपतिरिह महान् सर्वराजैर्नमस्यः ॥
निर्दम्भः शान्तचित्तस्त्वभिदमुपनतं भुंक्ष्व तेनेदमुक्तो
नाहं भोक्ष्ये सदोषो नृपतिरिति यतिः स्मेरवक्त्रो बभाषे ॥१४०॥

को दोषो नृपतौ वदेति गदितस्तेनोक्तवान्नानको
दोषं स्वं स विदां करोतु तमिहानीय स्वयं निर्णय ॥
उक्त्वा सर्वमिदं सरोषमनयत्तद्धर्मसिंहः पदं
नीतं मर्दनवीणया यदुपतेः शुश्राव गीतं यतिः ॥१४१॥

आरूढः सितमतितुङ्गमश्वरभ्रं
मुक्ताभिर्ललितकपोल उज्ज्वलाभिः ॥

---

१. शद्धं—क०

२. मे—क०

I. स्वल्पायासेनैव सर्वस्यैव हृदि स्वविचारमारोपयति यतीन्द्रः ।

तेजस्वी न बहु पुरःसरोऽप्यधृष्यः
संदृष्टः कमलविलोचनः क्षितीशः ॥१४२॥

कर्त्ता कर्त्तेति राजाऽकथयदकथयत् सत्यकर्त्तेति योगी
नम्रस्तत्पादपद्मे नृपतिरभिदधौ को नु [१]मय्यस्ति दोषः ? ॥
तेनोक्तं ते [1]त्वहंयु- [२]प्रथितिरतितरां शुद्धसेनं त्वमूनं
किं जानीषे ? जनानां हृदयमधिवसन् सर्वसाक्षी न वञ्च्यः ॥१४३॥

दोषं दूरीकुरुष्वेत्यभिदधति नृपे नानकेनैतदुक्त-
मायातो यो जनानामहमिह नृपते ? सप्तसंख्यं सहस्रम् ॥
जानामि त्वां न मां त्वं कलयसि कलिना रुद्धबुद्धिः स ऊचे-
ऽभिज्ञानं किं ? क्व ते मे समधिगमविधिर्नाम किं वावयोश्च? ।१४४

योगीन्द्रोऽब्रूत पूर्वं जनकनरपतेः [३]सौंध्रियाम त्रियामा[४]
स्नानव्यापारकारुस्त्वमसि सुयमिनो धर्मबन्धुश्च मेऽसि ॥
आनीय त्वं सुशीतं नरपतिलषितं साधु पानीयमस्य
प्रेष्ठोभूस्ते स राज्यं व्यतरदभिमतं सर्वसंकल्पवेदी ॥१४५॥

सभाचन्द्रेति ते नाम मम गोवर्धनेति च ॥
[2]पूर्वमासीत्किमपरं शुश्रूषुरसि भूमिप ? ॥१४६॥

प्रणनाम नृपो नगराय चले-
त्यवदन् न ययौ स निरेषणकः ॥

---

१. मय्यस्ति—क०
२. नतिथि—क०
३. सांधियामा—क०
४. त्रियात्मा—क०
1. तेन हंयुप्रथिति—क०
2. अत्रास्त्यपरो नानकस्य पूर्वजन्मवृत्तान्तः ।

अददादथ राज्यमुवाच यति-
स्त्वयि सन्निहितं मम तोषकरम् ॥१४७॥

शुद्धसेनमधिपं त्वमवेही-
त्युक्तवान् यतिरसावनुमेने[1] ॥
तुष्टयेऽस्य नगरं व्रज साधो !
इत्युदीर्य स मया [2]तदनायि ॥१४८॥

मासान् स्थितः पञ्चदशान् स राज्ञा
नानोपचारैः परिपूज्यमानः ॥
तेनार्पितं राज्यमतीव भक्त्या
प्रत्यर्प्य तस्मै स ययौ सुमेरुम् ॥१४९॥

इति श्रीजगद्गुरुनानककथायां नानकचन्द्रोदयसमाख्यायां
सुवर्णपुरगमनं नाम नवमः प्रस्तावः ॥

---

१. मवमेने—क०
२. समपातदत्रपि—क०

अथ दशमः प्रस्तावः

द्राक्षारसादपि महामधुरैर्वचोभिः
श्रोतावलीः शिशिरयन्ति सतां कवीन्द्राः ॥
यस्या विशुद्धमतयः करुणाकटाक्षै-
स्तां भारतीं सुरसमाजनुतां नमामि ॥ १ ॥

अव्याहतगतिर्योगी सुमेरुं स व्रजन् पथि ॥
वैणिकेनेति विज्ञप्तो विनयात्परमादरात् ॥ २ ॥

मक्केति यद् यवनजातिषु सुप्रसिद्धं
स्थानं [1]तुरुष्कनिवहैर्बहुमन्यमानम् ॥
तद् द्रष्टुमिच्छति मनो महनीयकीर्ते-
स्त्वामन्तरेण ननु नेष्यति तत्र मां कः ? ॥ ३ ॥

क्रोशाः[१] सहस्रद्वयमस्ति सार्ध-
मितस्तदार्या न दिशन्ति[2] गन्तुम् ॥
इत्थं [२]यतीन्द्रेऽभिहितः स ऊचे
सदागतिं शक्यति को निरोद्धुम् ? ॥ ४ ॥

उत्कण्ठामस्य विज्ञाय[३] स्वेषामिष्टकरो गुरुः ॥
सुमेरुयात्रामुत्सृज्य मक्काख्यापत्तनं[४] ययौ ॥ ५ ॥

---

1. तुरुष्कः—तुर्क इति भाषायाम् ।
2. आर्या न दिशन्तीत्यनेनापि भाव्यम् ।

१. क्रोशः—क०
२. न्द्राभिहितः—क०
३. स्त्वेषा—क०
४. ख्यायतनं—ख०

प्राकारेण महोन्नतेन परितः संवेष्टितं भास्वता
पालाशैर्बहुकेतनैर्विलसितं सौवर्णचन्द्रोदयम् ॥
नानाधूपसुगन्धिधूमरुचिरं माल्योल्लसत्सौरभं
तद् देवायतनं दिनैः कतिपयैरस्माभिरासादितम् ॥ ६ ॥

जपमालाकरा वृद्धाः श्मश्रुला हरिताम्बराः ॥
स्वशास्त्रपारदृश्वानो [1]म्लेच्छाचार्या विलोकिताः ॥ ७ ॥

मर्दनः प्रचलितो विलोकितुं
मध्य एव यवनैर्न्यरुध्यत[2] ॥
नानकाय तदुवाच सोऽब्रवी-
त्त्वां निरोत्स्यति न कोपि ? गच्छ भो ? ॥ ८ ॥

मक्केति देवायतनं त्वदीयं
यद् वीक्षिणो म्लेच्छजनाः कृतार्थाः ॥
अवेहि गत्वा खलु तस्य तत्त्वं
तत्त्वं स्वकीयेषु महत्त्वमिच्छुः ॥ ९ ॥

वद्धेक्षणान्देवलका अनैषु-
रन्यानसौ मुक्तविलोचनोऽगात् ॥
व्यलोकयद् योगिवरप्रभावात्
परैरदृष्टं शिवमाश्मनं सः ॥ १० ॥

आगत्य तेनेदमवादि योगी
मूर्तिर्मया ग्रावमयी व्यलोकि ॥
शिवस्य सा मर्दन ? मूर्तिरस्ति
निगूहितैत्याह यतीश्वरः स्म ॥ ११ ॥

---

1. मौलवी पदभाजां म्लेच्छाचार्याणां सजीवं वर्णनम् ।
2. मर्दनो न्यरुध्यतेत्यन्वयः ।

न मूर्तिपूजा यवनेषु शस्ता
न ते कुतस्तामपसारयन्ति ? ॥
अनेन योगी पुनरेव मुक्तो
जगाद सन्देहममुष्य भिन्दन् ॥ १२ ॥

खनकारहुसेननामधेयः
प्रबलो म्लेच्छमहीमहेन्द्र आसीत् ॥
अपनेतुमना बभूव सोऽन्धो
दहनः किञ्च ददाह तस्य वेश्म ॥ १३ ॥

क्षमयितुमपराधं प्रार्थयामास सोऽयं
विहितविविधपूजः स्वप्नमत्राल्लुलोके ॥
यदि कथमपि पश्येत्कोपि मूर्तिं मदीयां ?
भवति सपदि सोऽन्धो बन्धुलः किं परेण ? ॥ १४ ॥

नाभूवमहमन्धोऽत्र कुत्र लोकं नयन्त्यमी ? ॥
मर्दनेनेति स पृष्टः पुनरूचे यतीश्वरः ॥१५॥

ये भेदबुद्धिं हृदये निधाय
पश्यन्ति ते वेश्ममिहान्ध्यभाजः ॥
त्वं मर्दनास्मत्सहवासजात-
निर्भेदबोधः कथमन्धता ते ? ॥ १६ ॥

[1]देवलका इह मर्दन नवशतसंख्याः स्वपर्याये ॥
बद्धेक्षणं नयन्ते प्राकारं स्पर्शयन्ते च ॥ १७ ॥

स्नपयन्ति बद्धनेत्रा
न तेऽपि जानन्ति किमिहेति ? ॥
सलिलं तदेव विनयान्
नयन्त्यमी तैर्थिका यवनाः ॥ १८ ॥

१. देवालका–क०

दृष्टा मक्का मया ढक्का स्वमहिम्नः प्रणादिता ॥
मदीनां नय मां वन्द्यां नदीनां जाह्नवीमिव ॥ १९ ॥

इति मर्दनविज्ञप्तः सस्मितो नानकोऽवदत् ॥
द्वादशाहाधिगम्यां तां नगरीमर्द मर्दन ! ॥ २० ॥

प्रत्यन्तदेशवसतीरवलोकयन्तो
निस्तीर्णसैकतपथा वयमव्रजाम ॥
विस्तीर्णपण्यगहनां यवनैरनेकै-
रासेवितां नयनपेयरुचं पुरीं ताम् ॥ २१ ॥

महम्मदो यवनेषु महोत्तमो
जितहृषीकचयो[1] भगवज्जनः ॥
वपुरमुष्य निखातमिह व्यसोः[2]
पदमदो[3] ! महनीयमभूत्ततः ॥ २२ ॥

माल्यमोदककरोन्तरथासी-
न्मर्दनो महमदस्य दिदृक्षुः ॥
नानकोऽहमभितत्प्रतिहारं
द्वादशेव हि च लम्बितपादौ ॥ २३ ॥

[I]दीर्घश्मश्रुः [4]शिथिलहरितं चोलमङ्गे दधानो
मालापाणिः परिमितवचा देशिको म्लेच्छजातेः ॥
आगत्यावामिदमभिदधौ कौ युवां रे ? मदिष्ट-
स्याङ्घ्रीकृत्वाऽभिमुखमधमौ वीतशङ्कौ शयाथे ॥ २४ ॥

---

१. चयः—क०

२. व्यसाः—क०

३. महो—क०

४. शिशिमलवस्त्र०

I. तुरुष्काणां "फकीराख्यानां" सजीवं चित्रणम् ॥

वैदेशिकौ दूरतराध्वखिन्ना-
वावां प्रसुप्तावकृताऽवधानौ ॥
तदाऽवयोः श्रान्तिविहस्तयोस्त्वं
विकृष्य पादौ परतः कुरुष्व ॥ २५ ॥

इति नानकेन गदितो यवनोऽसौ
यवनेन केनचिदकर्षयदङ्घ्री ॥
[1]स यतो यतः किल चकर्ष पदे नौ
वलजं व्यवर्तत ततस्तत[2] एतत् ॥ २६ ॥

युग्मम्

म्लेच्छाचार्यो रुष्ट आचष्ट दुष्टौ
जानीथः किं कार्मणं ? किञ्चिदेतत् ? ॥
कृष्येते वां यत्र यत्रैव पादौ
द्वारं भ्रामत्याकुलं तत्र तत्र ॥ २७ ॥

व्रतनियमभक्तिशून्यौ
प्रवर्तकाऽस्मन्मतस्य गतभावौ ॥
अवमत्य पूज्यपादं
स्थिताविती नास्तिको व्रजत ॥ २८ ॥

[3]प्रस्वापसन्दर्शितनिस्पृहत्वौ
भ्रष्टौ पथिभ्यां यवनार्ययोर्हा ! ॥
न वा विरक्तौ न युवां गृहस्थौ
वृथा किमर्थं भ्रमतः पृथिव्याम् ? ॥ २९ ॥

---

१. सपतो—क०
२. ततस्तएतत्—क०
३. प्रस्ताव—क०

इत्युपालम्भमुखरे यवने तत्र नानकः ॥
अमृतासारमकिरद् वारिवाह इवोषरे ॥ ३० ॥

विभुं प्रभुं त्वं यदि मन्यसेऽङ्ग ?
स दिक्षु सर्वासु तदा प्रसृप्तः ॥
मक्कामदीनैकनिवासिनं चे-
त्तदा परिच्छिन्नतया विनाशी ॥ ३१ ॥

अरावादिनित्यं किल सङ्गिरन्ते
ये तेऽपि वेदप्रतिकूलवादाः ॥
न ब्रह्मणोन्यत्परिमाणशून्या-
न्नित्यं श्रुतिर्मृष्यति वस्तु किञ्चित् ? ॥ ३२ ॥

छिन्नप्ररूढाः किल कामना याः
बाह्यैर्व्रताद्यैः किमु सूद्धरास्ताः ? ॥
एना हि वेतस्य इवौद्वियंते[1]
जटासु लूनास्विह वासनासु ॥ ३३ ॥

ये पञ्चकृत्वः प्रणमस्य बुध्वा[2]
स [3]न प्रसन्नस्त्वयि साभिमाने ॥
तं ज्ञानवन्तो गलिताभिमानाः
सुखं यथेच्छाचरणाश्चरन्ति ॥ ३४ ॥

स्वान्ते कठोरे मदमत्सराद्यै-
र्न रोहति ज्ञानसुपर्वशाखी ॥

---

१. इवोद्वियं–क०

२. बुध्वां–क०

३ स न प्रसन्नस्वपि—ख०

सतां वचोभिर्मसृणीकृतेऽस्मिन्
[1]रूहोऽमृतस्वादु फलं प्रसूते ॥ ३५ ॥

द्विजोऽन्त्यजो वा यवनो विजित्य
मनो जगन्नश्वरमेव बुद्ध्वा[2] ॥
जानाति यः प्रेमपदं तमीशं
स वै महात्मा स च वन्दनीयः ॥ ३६ ॥

वेशैराचरितैर्वृथा बहुविधैः शक्तैर्जगद् बन्धने
मृत्युः किं विनिवर्तते ? किमु जगत्स्वामी समाराध्यते ? ॥
मायानिर्मितहाटकैर्न विपदो नश्यन्ति नार्थक्रिया
जायन्तेऽपि तु लभ्यते कतिपयैः कीर्णा कपर्दावलिः ॥ ३७ ॥

[I][3]पडूकमालोक्यमहम्मदस्य
द्रव्यार्थिभिर्देवलकैः परीतः ॥
अत्रान्तरे मर्दन आजगाम
नातिप्रसन्नोऽकथयत्प्रवृत्तिम्[4] ॥ ३८ ॥

तं नानको वीक्ष्य जगाद योगी
सतानि सम्यक् तिथिसंख्यकानि ॥
स्थाता समानां दिवि देवभक्त्या
महम्मदः स्वस्य तपस्यया च ॥ ३९ ॥

ततः परं शूद्रगृहेऽवतीर्य
स्वकर्मणा प्राप्य गुरुं गरिष्ठम् ॥

१. रूडो–क०
२. बुध्वा—ख०
३. एडूक–क०
४. स्रवृत्ति–क०
I. एडूकः पडुको वा महम्मदस्य पादुकैव ।

अवाप्स्यसि ब्रह्मभवं स हित्वा
कुलायमुत्सृज्य खगो यथा खम् ॥ ४० ॥

अथाऽयमूचे यवना वदन्ति
महम्मदो यं परमेश्वरेण ॥
जगाद साधं कृतवांस्तदुक्त्या-
[I]ऽऽम्नायं कोरानाख्यमतिप्रमाणम् ॥ ४१ ॥

आचष्ट योगी शृणु मर्दनेदं
कलौ प्रवादा विविधा भवन्ति ॥
अतत्त्वविद् गड्डलिकाप्रवाहाद्
न्यायाद्गतं गच्छति सर्वलोकः ॥ ४२ ॥

वचनानि महम्मदेन साधं
"जवराईल" इति प्रसिद्धभाजः[१] ॥
अभवँल्लिखितानि तानि लोके
[I]यवनाम्नायकोराननामधेयम् ॥ ४३ ॥

मर्दनेन गदितं जगदीशं
दृष्टवानयमिति प्रवदन्ति ॥
[२]मूर्त एव विषयो नयनस्य
सत्त्वमूर्त इति नानक ऊचे ॥ ४४ ॥

जीवमेव जगदुर्जगदीशं
त्वन्मुखादपि तथाश्रुतमासीत् ॥

I. महंमदस्य परमेश्वरेण सह वार्ताविषय एव कुरान इति ।
2. कोराननिर्माणकथा ।
१. भाजा—क०
२. मूर्तं यवन--क०

तद्विलक्षणमथ त्वमवादी
मर्दनस्तदिति विप्रतिपेदे ॥ ४५ ॥

जीवो ब्रह्म न संशयोऽत्र सहसा किं त्वावृतोऽविद्यया ?
यत्कौन्तेय इवाविवेकवशतो राधेयतामागतः ॥
ईशानुग्रहलब्धसद्गुरुरसौ मोहेन मुक्तो निजं
माहात्म्यं समवाप्य नन्दति यथा मारेण हीनः पुमान् ॥ ४६ ॥

साम्यं गुणानां प्रकृतिः प्रकीर्तिता
सा शुद्धसत्त्वा जगदीशितुर्वशे ॥
सा म्लानसत्त्वा खलु जीवमोहिनी
मायामविद्यां क्रमशो वदन्ति याम् ॥ ४७ ॥

अनाद्यविद्याकृतजीवभावो
यदा प्रपद्येत जगन्निवासम् ॥
तदा विमुच्येत जनः प्रबुद्धो
विश्वासमासाद्य गुरौ च शास्त्रे ॥ ४८ ॥

इति मर्दनमाख्याय योगी [1]मामिदमब्रवीत् ॥
स्वसा स्मरति मां सौम्य ? गच्छामस्तत्र सत्वरम् ॥ ४९ ॥

आस्ते कियद्दूरमितः स्वसा ते ?
प्राप्स्याम एनां[१] कतिभिश्च घस्रैः ॥
मयेति पृष्टो निजगाद योगी
योगीपते[२] स्वाभिरबोधहान्यै ॥ ५० ॥

[2]सप्तविंशतिभिः क्रोशशतैस्तत्परिमीयते ॥
सुरत्राणपुरं देशादस्माल्लघु च लभ्यते ॥ ५१ ॥

---

1. माम् = बालसिन्धुम् ॥
2. २७०० क्रोशपिताः ।

१. "पूनां" "क" इत्यत्र ।
२. योगीयते इति नास्ति "क" इत्यत्र ॥

सायं प्रचलिताः सर्वे प्रभावात्तस्य योगिनः ॥
[3]घटिकायामतीतायां रात्रेस्तत्र समागताः ॥ ५२ ॥

तुलसी तमुदीक्ष्य नानकी-
मवदद् बन्धुरुपैति तेऽनघे ! ॥
निपपात पदोः प्रहर्षिता
यतिराजस्य निवारिताऽपि सा ॥ ५३ ॥

अस्मार्षं त्वामद्य मध्याह्नकाले
नानक्यामित्यालपन्त्याशुवाच ॥
वीणाधारी [1]व्योमखाश्वाक्षिसंख्यान्
क्रोशान् नाद्यामागतोऽयं[1] विलङ्घ्य[2] ॥ ५४ ॥

नानको नयनसंज्ञयाऽथ तं
संनियम्य भगिनीमभाषत ॥
वीक्षितासि यदि वक्षि कुत्रचि-
त्कार्यतः सपदि गन्तुमुत्सहे ॥ ५५ ॥

तुलसी तमचष्ट सौम्य ! भो !
जयरामस्य समागमं बिना ॥
अपयातुमितो न साम्प्रतं
मनसा ते कलयामि साम्प्रतम् ॥ ५६ ॥

गन्तव्यमस्ति[3] कटिनीति जगाद योगी
श्रीचन्द्रमस्य पुरतो भगिनी बभार ॥

---

1. परन्त्वेकयैव घटिकया तत्र सर्वे समापाता इति यतेर्महत्त्वम् ।
2. २७०० मिताः ।
3. कटिनी—ग्रामनाम ।
१. नाद्यां—क० इदं ग्रामनाम ।
२. विलघ्य—क०

तं पद्मपत्रनयनं सुविनीतवेषं
जाता युवानमवलोक्य दयामदन्तः[१] ॥ ५७ ॥

रुदती निजगाद तं स्वसा
मत्कामादिह[२] मासमास्यताम् ॥
तनयो विनयोपशोभितः
किमु नालप्यत[३] एष सन्मतिः ! ॥ ५८ ॥

कदाचिदागत्य विधास्यते स्थिति-
र्विसर्जनं मे कुरु भद्रमस्तु ते ॥
स्वसारमात्मानमलं विजानतीं[४]
स्वसारमाचष्ट स निर्ममो मतिः ॥ ५९ ॥

भुक्त्वा व्रजेति भगिनी विनयादवोचत्
भुक्तं ततः कथितदुग्धसितायुतान्नम् ॥
भूयः कदा भवति ? दर्शनमित्यवादीत्
सा तामचष्ट स यदा भवतीं दिदृक्षुः ॥ ६० ॥

रात्रौ वसेति स मया गदितो न्यवात्सीत्
सस्नौ निशो यतिपतिः प्रहरावशेषे ॥
क्रोशान् गतस्य [1]खखनेत्रहृषीकसंख्यां-
स्तस्य प्रभातमभवत् पवनास्पदस्य ॥ ६१ ॥

---

१. मदंभ—क०
२. मकामादिह—क०
३. लभ्यत—क०
४. ती—क०
1. ५२०० मिताः ।

कुत्रागताः स्म ? इति [1]मां यतिराबभाषे
त्वं विद्धि कोस्ति ? भवतोधिकबुद्धिशाली ॥
इत्यब्रुवं तदनु पृच्छति मर्दन स्म
त्वं ब्रूहि मर्दन ? कमागतवान्प्रदेशम् ? ॥ ६२ ॥

यतो गतास्तद्विगुणे प्रदेशे
जानामि योगीश्वर ? सङ्गताः स्मः ॥
इत्युक्तवन्तं तमुवाच सम्यक्
[2]शतावधानोऽसि गतित्वरायाम् ॥ ६३ ॥

कृपा त्वदीयेति तमालपन्तं
गन्तासि कुत्रेति ? पुनः स ऊचे ॥
इच्छा तव स्वैरचरस्य यत्रे-
त्युदीरितो मेरुगिरिं जगाम ॥ ६४ ॥

उड्डीनं तम[3]नुड्डीनावावां गमनवर्त्मना ॥
आवयोरपि सामर्थ्यमासीत्तस्य प्रभावतः ॥ ६५ ॥

निरीक्षमाणा नगराणि नाना
ग्रामान्नदीः पर्वतकाननानि ॥
शैलस्य शृङ्गे न्यपताम तुङ्गे
हिरण्मये प्रस्तुतसद्रसे च ॥ ६६ ॥

सविस्मयो मर्दन आचचक्षे
हा! हेमशून्ये मधुरो रसश्च ॥
किमर्थमत्रेति ? ततो जगाद
यतिर्जगत्यां विफलं न किञ्चित् ? ॥ ६७ ॥

---

१. गां—क०

२. कृतावधानोसि—ख०

३. नगरमनुड्डीनावानां—क०

सुराङ्गनाङ्गाभरणं सुवर्णं
तपस्विनां तृप्तिकरो रसश्च ॥
पिबेयमेतं रसमित्यपृच्छ-
त्तं मदनः स्मेरमुखः स ऊचे ॥ ६८ ॥

पिबन्ति भक्ताः सततं विरक्ता-
स्तेऽन्तर्हिताः सन्ति धराधरेऽस्मिन् ॥
सहेत वेगं न परो निपीय
विरक्तिहेतुं मदमस्य कर्तुः ॥ ६९ ॥

मर्दनस्तमतिक्रम्य पपौ रसमनुत्तमम् ॥
उन्मत्त इव मत्तोऽभूत् तरुमूलमुपाश्रितः ॥ ७० ॥

मामवोचदथ नानकोस्य
किं जात ? मित्यहममुं तदावदम् ॥
त्वं चरित्रमवगच्छ तावकं
स स्पृशन् शिरशि तं समादधात् ॥ ७१ ॥

उड्डीय तस्मादचलादयाम
नभः पथेन प्रथितं पृथिव्याम् ॥
शीतत्वहेतुं सकलस्य शैलं
शुभ्रं यशोराशिमिवेश्वरस्य ॥ ७२ ॥

कोयं गिरिः श्वेततरः सुतुङ्गः
शैत्येन गात्राणि जडानि कुर्वन् ॥
अत्रात्ययं पाण्डुसुताः किमीयु-
र्वीणाधरो नानकमित्यपृच्छत् ॥ ७३ ॥

गङ्गातरङ्गैः परिपूतभृङ्गो
गौरीगुरुस्तापससङ्घसेव्यः ॥

प्रालेयजालामलमूर्तिरेष
गन्धर्वसिद्धाध्युषितो हिमाद्रिः ॥ ७४ ॥

[१]पञ्चत्वमत्रैव वियुक्तकृष्णाः
कृष्णायुताः पाण्डुसुताः समीयुः ॥
युधिष्ठिरः स्वर्गमगात्सदेहः
सदेह यो धर्मधनेषु कीर्त्यः ॥ ७५ ॥

पादौ स्पृशन् शमयते खलवत्तुषारः
शीतो मृदुश्च वयमीशकृपावशेन ॥
दूरादिमं परिहरन्तमिहाक्षताः[२] स्मः
इत्युक्तवान्यतिरियाय शिरोधराद्रिम् ॥ ७६ ॥

तत्रागत्य जगाद नानकमिमां गोरक्षयोगी गिरं
किं नामासि ? च जातिरस्ति[३] तव का ? माग्रे गमो मोहतः ॥
यद् ब्रह्मेव कुयोगिनामसुलभं प्रोत्तुङ्गमेतत्स्थलं
[I]प्रालेये प्रविलीयते लवणवत्[४]तोये हि तूर्णं वपुः ॥ ७७ ॥

तं नानकोऽब्रूत ननाम रूपे
कुतस्तरां ? जातिरमुष्य भूम्नः ॥
अनावृतत्वान्न पुरो न पश्चा-
दाकाशकल्पस्य [५]विलीयते किम् ? ॥ ७८ ॥

---

१. पंचत्व—क०
२. इहागया—क०
३. "स्ति तवका "इत्यारभ्य" प्रालेये" इति पर्यन्तं "क" इत्यत्र नास्ति पाठः
४. वत् इति पदं 'ख' इत्यत्र नास्ति ।
५. कल्पविलीयते—क०
I. यथा लवणः तोये प्रविलीयते सत्वरं तथैव शरीरं प्रालेये प्रविलीयत इति भावः ॥

जानामि लब्धो भवता न योगो
　　　　यो गोचरो वाङ्मनसा सदैव ॥
अविद्ययाकारि मृषा वियोगो
　　　　योगश्चिदाभासचितोर्हि योगः ॥ ७९ ॥

अपक्रान्तस्ततस्तूष्णीं गोरक्षो वीक्ष्य नानकम् ॥
उपर्युपरि गच्छन्तं स्ववर्गमिदमब्रवीत् ॥ ८० ॥

मुक्तंमन्योऽयमायाति नानको मर्त्यलोकतः ॥
निवर्तयध्वं योगीन्द्रास्तं जित्वा मलिनाशयम् ॥ ८१ ॥

तेषु योगिषु मत्स्येन्द्रः समागमदिति ब्रुवन् ॥
याम्यहं तं च पश्यामि मुण्डमातृक एष कः ॥ ८२ ॥

अवलोक्य नानकमिदं स जगाद
　　　　त्वमिहागतोऽसि कतमा तव शक्तिः ? ॥
यतिरित्युवाच वद कामिह ? शक्तिं
　　　　[I]तव दर्शयामि जगदीशनिदिष्टाम् ॥ ८३ ॥

मत्स्येन्द्रस्तमुवाच वर्णय वपुर्योगस्य विज्ञोऽसि चेद्
यः स्वं कायमवैति नैव कुमतिर्योगी स किं कथ्यते ? ॥

किं नु [1]ब्रूहि ? शिरोललाटमुखहृद्वक्त्रः[2] प्रमाणं निलं
प्लीहा[3]फुप्फुसकश्च कुत्र ? कति वा रोमाणि भोः ? संधयः ॥ ८४ ॥

अस्थीनि मांसपेश्यश्च स्नायवश्च शिराः कति ? ॥
अहोरात्रे कति श्वासा ? आशयाः कति वर्ष्मणि ? ॥ ८५ ॥

I. मत्स्येन्द्रनानकशम्बादः ।

१. ब्रही—क०

२. हृद्यन्क—ख०

३. फुफ्फ—ख०

वाताः कतिपये ब्रूहि ? हंसचारं विचारत ॥
कश्च प्रकाशते देहे ? प्रदीप इव दीपयन् ॥ ८६ ॥

ऊचे तं यतिनायको न यतिनामास्था शरीरे सतां
निःसारे बहुबुद्बुदे तदपि भो मत्स्येश्वर ? श्रूयताम् ॥
रागेणातिरजोगुणोत्थजनुषा स्त्रीपुंसयोः सङ्गमे
रेतः[1] शोणितयोर्ऋतौ व्यतिकरो गर्भाशये जायते ॥ ८७ ॥

धातुक्षोभाज्जायते क्लेदमात्रं
पूर्वे मासे भूतचैतन्ययुक्तम् ॥
संशुष्कं तत्तेजसा चानिलेन
[1]द्वैतीयेके बुद्बुदत्वं[2] प्रयाति ॥ ८८ ॥

मूर्द्धा पूर्वमुदेति शौनकमते[2] पाण्योः पदोरुद्भवो
मार्कण्डेयमते पराशरसुतो नाभिः पुरस्ताज्जगौ ॥
पूर्वोत्थं कृतवीर्य आह हृदयं कोष्ठं मुनिर्गौतमः
सूक्ष्मं सर्वमुदोयते तु युगपद् धन्वन्तरेः शासने ॥ ८९ ॥

---

1. ऋतौ गर्भाशये रेतः शोणितयोर्व्यतिकरो जायते इत्यन्वयः । ततः पूर्वमासे तद्व्यतिरेकः चैतन्यरुपतां गच्छति ।
2. १. शौनकः
   २. मार्कण्डेयः
   ३. पराशरः
   ४. कृतवीर्यः
   ५. गौतमः
   ६ धन्वन्तरिः ।
   एतेषां—मूर्धोदये भिन्ना विचाराः ।

१. द्वैतीयत्के— ख०
२. त्वं बुर्दत्वं—क०

अग्नीषोमावनिनिपतनौ व्योमसत्वादयश्च
गर्भं ज्ञानेन्द्रियगणयुता जीवयन्त्यात्मयुक्ताः ॥
अन्तर्वल्या रसवहशिरानाभिनाड्यां शिशोर्यद्
लग्ना वृद्धिं व्रजति तदसौ [1]तावदाहारयोगात् ॥ ९० ॥

आकाशादिगुणानेष आदत्ते लाघवादिकान् ॥
इन्द्रियाणि तृतीये च चतुर्थे स्यन्दते ततः ॥ ९१ ॥

तत्रैव स्थैर्यमङ्गानां पञ्चमे लोहितोद्भवः ॥
षष्ठे बलस्य वर्णस्य नखलोम्नां च सम्भवः ॥ ९२ ॥

नाडीस्नायुशिरायुतः स समनाः प्रव्यक्तचैतन्ययुङ्-
[१]मासे सप्तम उद्गतस्मृतिरसौ [२]त्वङ्मांसवानष्टमे ॥
ओजो हृन्निलयं प्रधावति यतो गर्भं च धात्रीं [३]पुन-
र्जीवातुस्थितिहेतुरष्टभभवो नातः शिशुर्जीवति ॥ ९३ ॥

नवमे दशमेऽथवा प्रणुन्नः
सहसा सूतिसमीरणेन गर्भः ॥
बहिरेति च सप्तमेऽष्टमे वा
क्वचिदायासवशात्स्वकर्मनिन्द्यः ॥ ९४ ॥

लोमलोहितमांसानि जायन्ते मातुरस्य यत् ॥
पितुः स्नाय्वस्थिमज्जानस्ततः षाट्कौशिकं वपुः ॥ ९५ ॥

---

1. तदवधि आहारयोगो न जायते यदवधि सर्वेन्द्रिययुक्तं शरीरं वृद्धिं न व्रजति ।

१. प्रासे—क०

२. त्वङ्मास–क०

३. युत–क०

बाह्यमारुतसंस्पृष्टस्तत्क्षणं विगतस्मृतिः ॥
हतस्व इव जन्मौत्थज्वरो रोरुद्यते शिशुः ॥ ९६ ॥

जातो मृतश्च कतिधा न कति स्तनानां
पीतं पयो न कलिताः कति मातरो न ॥
उत्पद्य बन्धविधुतावधुनायतिष्य
इत्यस्य विप्लवमुपैति बहिर्मनीषा ॥ ९७ ॥

कला आशया धातवस्तन्मलाश्च
[2]तथैवोपधातुत्वचः [I]सप्तबोध्याः ॥
त्रयः किश्च दोषा नव स्नायवोऽस्मिन्
शतानि द्विशत्यादिशः[3] सन्धयश्च ॥ ९८ ॥

[2]अस्थ्नां शतत्रयं षष्ट्यां सहितं समुदीरितम् ॥
सप्ताधिकं मर्म शतं[4] शिरा सप्तसती[5] तथा ॥ ९९ ॥

---

१. स्य—क०
२. तथैव—ख०
३. त्याधिकः—ख०
४. शंतं—क०
५. सप्तशतीथा—क०

I. क. धातवः सप्त ।
ख. दोषाश्च त्रयः ।
ग. स्नायवो नव ।
घ. शतानि संधयः ।

2. क. अस्थीनि—३६०
ख. शिराः—७०७
ग. धमन्यः—२०
घ. कंडराः—१६
ङ. मांसपेश्यः—५००
च. छिद्रम्—१०, पुरुषे, १३ स्त्रियाम् ।

दशोर्द्ध[१] [1]दशार्धंश्चतस्रश्च तिर्यग्
धमन्यो रसप्रापिका[2] वेदनीयाः ॥
प्रसारं तथा [3]कुञ्चनं या सृजन्ति
प्रतीकेषु ताः कण्डराः षोडशैव ॥१००॥

नृणां पञ्चशत्या मिता मांसपेश्यो
बलानां तनौ विंशतिश्चाधिकास्ताः ॥
दशच्छिद्रमाहुर्वपुः [4]पूरुषस्य
स्त्रियास्त्रीणि रन्ध्राणि देहेऽधिकानि[I] ॥१०१॥

अधोमुखं पङ्कजवन्मनीषा-
स्थानं मनीषि हृदयं ब्रवीति ॥
[5]प्लीहामतो लोहितवाहिनीनां
मूलं शिराणां तदधस्तु वामे ॥१०२॥

अधस्ततः शोणितफेनजन्मा
वामे स्मृतः फुप्फुसनामधेयः ॥
अधो हृदो दक्षिणतोयकृत्तु
रक्तोद्भवं रञ्जकपित्तसद्म ॥१०३॥

अधः शिराणां जलवाहिनीनां
मूलं ततः [6]क्लोमतिलं वदन्ति ॥

I. कानि अस्थीनि कति शिराः, कति कंडराः कानि रन्ध्राणीत्यादिमत्स्येन्द्रप्रश्नाना-
मुत्तराणि ॥

१. दशोर्द्ध–ख०
२. पापिका–क०
३. कुचनं–क०
४. पूरषस्य–क०
५. प्लीही—क०
६. क्रोम—क०

मेदो भवौ पुष्टिकरौ च तस्य
कुक्षिस्थितस्य प्रथितौ तु बुक्कौ ॥१०४॥
सोमस्य मण्डलमुदित्वरमस्ति नाभौ
तन्मध्यगं च रविमण्डलमस्ति [1]दीप्तम् ॥
तत्राग्निरस्ति [2]यववद् वपुषि स्थविष्ठे
सूक्ष्मे तिलेन तुलितः सकलान्नयुक्ता[3] ॥१०५॥
सार्धास्त्रयोन्त्राणि[1] नृणां शरीरे
व्यामावधूनामथ तेऽर्धहीनाः ॥
रोमाणि तिस्रः कथितास्तु [4]कोढ्यः
सार्धाः परार्धाश्च योगिवर्य ! ॥१०६॥
[2]सपादहस्तं परिमण्डलं शिरो
मुखं तु मुख्याश्चतुरङ्गुलं विदुः ॥
ललाटमष्टाङ्गुलकं त्रयोदशा–
ङ्गुलं यकृद्योगिवरैरुदीरितम् ॥१०७॥

I. क. अन्त्राणि = ३$\frac{१}{२}$
ख. रोमाणि = ३
ग. कोढयः = १$\frac{१}{२}$
2. क. मुखम् = ४ अंगुलम्
ख. ललाटम् = ८ ,,
ग. यकृत् = १३ ,,
घ. हृदयम् = ५ ,,
ङ. तिलम् = ४ ,,
च. फुफ्फुसकम् = ७ ,,
छ. नान्दी = ७२००० सहस्राणि
१. दीप्रम्–क०
२. यववपु–ख०
३. पक्ता–क०
४. कोध्रः–क०

पञ्चाङ्गुलं तु हृदयं तिलं तु चतुरङ्गुलम् ॥
सप्ताङ्गुलं फुप्फुसकं विद्धि मत्स्येन्द्र ! बुद्धिमन् ! ॥१०८॥

द्वासप्ततिसहस्राणि [1]नान्द्यो योगिभिरीरिताः ॥
तासां श्रेष्ठा वायुवहा दश तिस्रस्तु तास्वलम् ॥१०९॥

इडा[2] वामे स्थिता भागे दक्षिणे पिङ्गला तथा ॥
सुषुम्णा मध्यदेशे तु गान्धारी [1]वामचक्षसि ॥११०॥

दक्षेक्षिण हस्तिजिह्वा च पूषा कर्णे तु दक्षिणे ॥
यशस्विनी वामकर्णे वदने चाप्यलम्बुषा ॥१११॥

कुहूश्च लिङ्गदेशं तु मूलस्थाने च शङ्खिनी
क्रमेण प्राणापवनस्तिसृष्टाद्यासु[3] सञ्चरेत् ॥
प्राणोपानः समानश्चोदानो व्यानस्तथैव च
नागः कूर्मोऽथ कृकरो देवदत्तो धनञ्जयः ॥११३॥

वायवो दशविख्यातास्तत्तत्कर्मकरास्तनौ ॥
प्रणामा यच्छतो वश्यास्तेभ्यासेनाखिलेष्टदाः ॥११४॥

इडायां संस्थितश्चन्द्रः पिङ्गलायां तु भास्करः ॥
सुषुम्णायां स्थितः शम्भुः शम्भोर्हंसस्वरूपता[2] ॥११५॥

I. इडा, पिङ्गला, सुषुम्णा, गान्धारी, हस्तिजिह्वा, पूषा, यशस्विनी, अलंबुषा, कुहू, शंखिनी चेति नाड्यः ।

2. हंसस्य वर्णनम् । तस्यैव शम्भोर्हंसता यः सुषुम्णायां स्थितः । अस्य वर्तते सर्वाधिकं वैशिष्ट्यम् योगे ॥

१, नाड्यो—ख०

२. ईडा—क०

३. स्तिसृष्टा—क०

आदौ चन्द्रः सिते पक्षे भास्करस्त्वसिते वहेत् ।।
सार्धद्विघटिकामानादिति सामान्यतो मतम् ।।११६।।

शशाङ्कं वारयेद्रात्रौ दिवा वार्यो दिवाकरः ।।
इत्यभ्यासरतो धीरो योगिनामग्रणीर्भवेत् ।।११७।।

कुम्भकेन[1] सुषुम्णाया मध्ये वहति मारुते ।।
मनोन्मन्यामवस्थाय धन्यां नान्याभिलाषिणः ।।११८।।

षट्शतानि दिवारात्रौ सहस्राण्येकविंशतिः ।।
स्वाभाविकी गतिः प्रोक्ता [2]श्वासप्रश्वासयोर्नृणाम् ।।११९।।

प्राणो मूलात्समुत्थाय प्राप्येडां पिङ्गलां रविः ।।
नासिकाभ्यां बहिर्गत्वा लीयते द्वादशाङ्गुले ।।१२०।।

अष्टाङ्गुलाद्विश[१]न्नन्तर्नाडीभ्यां सोमरूपकः ।।
मलमूत्रमरुच्चक्राण्यपानः स बहिः क्षिपेत् ।।१२१।।

अग्नीषोममयो नाडीं सुषुम्णामाश्रितः स च ।।
आब्रह्मरन्ध्रमु[२]द्गच्छन्नुदानो नाम वर्धते[३] ।।१२२।।

आत्मा सोहमुदीरयत्यविरतं तस्मिन् सहोर्लापनाद्
[४]ओंकारेणापूर्वरूपकरणादोंकार आविर्भवेत् ।।

---

1. योगे कुम्भकवर्णनम् ।
2. दिवा ६०० श्वासप्रश्वासाः
   रात्रौ १०२१ ,,
१. त्रं—क०
२. मुह—क०
३. वर्धतम्—क०
४. दोकारेण—क०

अश्चाप्युश्च मकारविन्दुसहितं नादं विधिं माधवं
रुद्रं मे स सदाशिवं सुमनसस्तत्र स्थितं वक्षते[1] ॥१२३॥

सार्धत्रिवलयामूले हुँडली नागरूपिणी ॥
वायुनोद्ध्वं[2] नयन्[3] योगी भित्त्वा चक्राणि तां तु षट् ॥१२४॥

हिताहिताख्या हृदये शिराया-
स्तन्मध्यगे मण्डलमिन्दुतुल्यम् ॥
निर्वातदीपाकृतिरत्र[4] वेद्यः[5]
मुमुक्षुणात्मा सकलप्रकाशः ॥१२५॥

निशम्य तत्त्वं यतिनेति गीतं
प्रीतो यतिर्मत्स्यपतिर्जगाम ॥
गोरक्षमूचे मलिनाशयोऽयं
न नानकः किन्तु स युक्तयोगी ॥१२६॥

इति श्रीजगद्गुरुनानककथायां नानकचन्द्रोदयसमाख्यायां
सुमेरुयात्रानामदशमः प्रस्तावः ॥

—: o :—

१. वक्षुते—क०
२. नोद्व'—क०
३. नयंक०—
४. निवात—क०
५. वेद्यो—क०

एकादशः प्रस्तावः[I]

वन्दे समस्तभुवनव्यवहारहेतुं
वाचं सुरासुरनरैः समुपास्यमानाम् ॥
संसेवितां च पशुपक्षिसरीसृपाद्यै-
[1]र्निर्वाणमार्गमपि वेदपदैर्दिशन्तीम् ॥ १ ॥

आगत्य भर्तृहरिरेतदवोचदेतं
किं नाम ते ? कथय भोः ? कुत आगतोसि ? ॥
कस्यासि ? मज्जसि च कुत्र ? किमु ब्रवीषि ?
[2]किं वा रसं त्यजसि ? कं पिबसि प्रकामम् ? ॥ २ ॥

किं सङ्गमुज्झति ? करोषि च कस्य सङ्गं ?
किं वा विलोडयसि ? मार्क्षि च कुत्र किं नु ? ॥
किं वा तनोषि ? ननु किं भवसि स्ववृत्त्या ?
क्रोधः स्मरश्च वद ? निर्दहतो न केन ? ॥ ३ ॥

कस्योपदेशत उपैति जनः पदं तत् ?
किं शीतलं शमयते खलु खेदवह्निम् ? ॥
किं वा विभूतिमतुलां तनुते नरस्य ?
दृष्ट्वा निजं सदनमेति किमध्वनीनः ? ॥ ४ ॥

नादं शृणोति किमुपायपरः ? प्रबोध-
सारं समर्पयति कः ? किमु चारुतीर्थम् ? ॥

I. भर्तृहरि नानकसम्बादः ।
१. र्माण—क०
२. किं—क०

पूजापदं कथय भोः ? किमु निःशलाकं ?
को ज्योतिषी घटयते चिरविप्रयुक्ते ? ॥ ५ ॥

लोके करावरसि केषु शिरोमणिः स्यात् ?
सिंहासने वसति कः ? खलु सार्वभौमः ॥
को वा नियोजयति कारकचक्रमेकः ?
को लक्षते न चतुरैरपि चिन्त्यमानः ? ॥ ६ ॥

कस्मिन्नुदेति ? वद दूरतरं च कस्मात् ?
ज्योतिर्वितानमतिपूरितमस्ति कस्मिन् ? ॥
नेदिष्ठमस्ति किमु ? नानक ! किं दविष्ठं ?
ज्ञेया गुणाः कथय कस्य ? सदैव पुंसः ॥ ७ ॥
अन्तर्बहिर्वसति को ? नुदति क्रियासु
लोकान् क एष कलिकालनिपीतसत्वः ॥
किं वावलम्ब्य भवसिन्धुममुं तितीर्षुः ?
त्वं नानकेति कथय प्रथितोसि योगी ॥ ८ ॥

[1]एवं भर्तृहरेः प्रश्नान्निशम्य ज्ञानवारिधिः ॥
शृणु योगिवरेत्युक्त्वा जगाद यतिनायकः ॥ ९ ॥
मां नानकनिराकारं कथयन्त्यधुना जनाः ॥
अगम्यनगराद्योगिन् ? आगतं मामवेहि भोः ? ॥ १० ॥
ध्मातस्य लोहपिण्डस्य स्फुलिङ्गमिव भासुरम् ॥
ब्रह्मणो मां विजानीहि भेदाभेदसमन्वितम् ॥ ११ ॥
ज्ञानतीर्थमतिदुर्गममन्यै-
र्भूरिकर्ममलहार्यवगाहे[१] ॥

---

1. सप्तभिः श्लोकैर्भर्तृहरिर्नानकमपृच्छद् बहुविधान् प्रश्नान् ॥

१. त–क०

विस्तृतैः [1]प्रलपितैरितरं किं ?
श्रीपतेर्विलसितानि वदामि ॥ १२ ॥
उज्झित्वा विषयरसं विषादहेतुं
[1]स्वानन्दामृतमतितर्षितः पिबामि ॥
कामादीन्सपदि खलान्विहाय दूरा-
दालम्बे [2]शमदमवीतरागतादीन् ॥ १३ ॥
कोशेषु सत्यसुखमेव विलोडयामि
ग्लानं मनोगुरुसरःसु च मार्जयामि ॥
यद्[3] वासनामनुसरामि भवामि तादृक्
क्रोधः स्मरश्च दहतो न विवेकबुध्या ॥ १४ ॥

---

१. लि—क०
२. शमशील–क०
३. द्दा—क०

1. प्रश्नाः ? उत्तराणि

क. किं पिवसि ? आनन्दामृतम् । ख किं त्यजसि ? विषयरसम् ।
ग. किमुज्झसि ? कामादीन्। घ. कस्य संगंकरोषि ? शमादीनाम् ।
ङ. किं विलोडयसि ? सत्यसुखम् । च. कुत्रमार्क्षि ? गुरुसरसि ।
छ. किमातनोषि ? वासनाम् । ज. किं भवसि ? तादृक् ।
झ. जनः पदं कथमुपैति ? उपदेशतः । ञ. किं तनुते जनः ? सेवाविभूतिम् ।
ट. किमेति जनः ? स्वगेहम् । ठ. कः शृणोति नादम् ? योगी ।
ड. कः सारं समर्पयति ? चेतः । ढ. किं तीर्थम् ? सत्सङ्गतिः ।
ण. किं पुजापदम् ? मनः । त. कःशिरोमणिः? यो ज्ञानामृतं पिवति ।
थ. कः सिंहासने वसति ? आत्तविद्यः । द. कः सार्वभौमः ? निःस्पृहः ।
ध. को नियोजियति कारकचक्रम् ? स्वान्तम् । न. कस्मिन् उदेति ? चित्तके ।
प. कस्मिन् ज्योतिः पूरितम् ? स्वे महिम्नि ।
फ. किं नेदिष्ठम् ? परतत्त्वम् ततः इतः दविष्ठम् ।
ब. कस्यगुणा गेयाः ? मुरारेः ।
भ. कोन्तर्बहिर्वसति ? हृत् ।
म. लोकान् कोनुदति ? ईशः ।
य. कः कलिकालतत्त्वज्ञः ? साधुः ।
र. किम् अवलम्ब्य भवसिन्धुं याति ? भवभावनस्य नामरूपं सेतुम् ।

तज्ज्ञोपदेशत उपैति जनः पदं तत
वेदानलोज्ज्वलयते न च साधुसङ्गात् ॥
सेवाविभूतिमतुलां तनुते सतां च
जीवः स्वगेहमुपयाति परं विलोक्य ॥ १५ ॥

योगी शृणोति खलु [I]नादमनाहताख्यं
चेतः समर्पयति सारतरं प्रबोधम् ॥
सत्सङ्गतिं विमलतीर्थमुदीरयन्ति
पूजापदं च मन एव परं [1]विविक्तम् ॥ १६ ॥

शास्त्रोदितेन समयेन विचार्यमाण-
मावेदितं च गुरुणा करुणापरेण ॥
वाक्यं च तत्त्वमसि सङ्घटयत्ययोग-
भाञ्जी चिरेण परपूरुषतेजसां[2] भोः! ॥ १७ ॥

एकः स एव रसिकेषु शिरोमणिः स्यात्
संत्यज्य सर्वविषयान्विषमिष्टदुष्टान् ॥
युक्त्या दुहन्नुपनिषत् सुरसौरभेयी-
ज्ञानामृतं पिबति यः[3] परिणामरम्यम् ॥ १८ ॥

सन्तोषसिंहासन आत्तविद्यो
विद्योतते [4]निःस्पृहसार्वभौमः ॥
स्वान्तं प्रयुङ्क्ते करणानि कामं
कामं वहन्तं[5] तमदोषदग्धम् ॥ १९ ॥

I. अनाहतनादः = "अनहदनाद" इति भाषायाम् ॥
१. राव—क०
२. ष्यतेजसी–क०
३. पिबति परि–क०
४. तिः स्पृह–क०
५. वहं त–क०

न ब्रह्म वेत्ति[1] चतुरोऽपि विचिन्त्य बुध्या
तस्मिन्नुदेति भव एष ततोऽतिदूरे ॥
ज्योतिः परं हि गगनादिनिवासवेश्म
तत् स्वे महिम्नि परिपूर्णमपेतपारम्[2] ॥ २० ॥

[3]नेदिष्ठमस्ति परतत्त्वमितो दविष्ठं
गेया गुणाः स्वविभवाय मुहुर्मुरारेः[4] ॥
अन्तर्बहिर्वसति हृन्निलयः स ईशो
[5]यन्त्रस्थितानिव जनान्भ्रमयत्यजस्रम् ॥ २१ ॥

शास्त्रोदितेषु सकलेष्वपि[6] साधनेषु
साधो ! य उक्तमखिलैरभियुक्तवर्गैः ॥
नामावलम्ब्य कलिकल्मषनाशहेतुं
सेतुं भवाब्धिमतरं भवभावनस्य ॥ २२ ॥

उत्तरानुत्तरधियो निशम्य स महात्मनः ॥
यथागतं भर्तृहरिर्गतः किञ्चिन्न चोक्तवान् ॥ २३ ॥

बालसिन्धोः समाकर्ण्य कथामेतामथाङ्गदः ॥
एतत्तव पुरो जातमिति शातयुतोऽब्रवीत् ॥ २४ ॥

एवमित्युदिते तेन मुदिते तस्य मानसे[7] ॥
समाधिरासीत्सप्ताहं[8] [9]तप्ताहङ्कृतिनाशनः ॥ २५ ॥

---

१. वेति—क०
२. पार—क०
३. नेक्षिष्—क०
४. मुरारे—क०
५. यं प्रस्थिता—क०
६. सकलोथपि—क०
७. मानसं—क०
८. त्सत्याहं—ख०
९. तमाहं—क०

सपादयामेऽष्टमवासरे[1] स
गते समुत्थाय जगाद बालम् ॥
सुधाभिरासिञ्च जनस्य कर्णौ
वर्णौघरूपाभिरये[2][3] सुमेधः[4] ? ॥ २६ ॥

संस्मृत्य हन्त ? करुणावरुणालयं तं
बालो जगाद न समाधिमगाधमापत् ॥
तेनापि सप्त गमिता नमितास्तु यामाः
प्रोत्थाय नानककथाः कथयाम्बभूव ॥ २७ ॥

आवाभ्यां सह तत्राथ कियद्दूरं गते यतौ ॥
पुनर्भर्तृहरिर्गोपीचन्द्रयुक्तः समागमत् ॥ २८ ॥

मुण्डमातृक ? पाखण्ड ? वितण्डावादपण्डित ? ॥
आयासि चण्ड ? कुत्रात्र ? ध्वनयन् ज्ञानडिण्डिमम् ॥ २९ ॥

प्रत्यक्षेण जरारुजामृतियुतो जीवोप्यनीशः परं
कर्मोर्मिप्रचलीकृतश्च नरकस्वर्गादिभोगं वहन् ॥
तादात्म्यं वपुषा चिरन्तनमिदं गीर्भिस्त्वया दुस्तरं
वाचो नानक ? किं ब्रवीषि ? वितथा ब्रह्मास्मि वादोद्धुराः ॥ ३० ॥

एवं भर्तृहरिः स्माह कोपमादीपयन्[5] यतेः ॥
स तु स्मेरस्तमित्यूचे विज्ञानविमलान्तरः ॥ ३१ ॥

माता मतिर्मम जटा यदि वासनाख्या-
स्तत्याज सत्यमभवत्खलु तेन मुण्डा ॥

---

१. यामेवम–क०
२. घरूया–क०
३. यु—क०
४. मेधा–क०
५. मादीपयते:—क०

चेतः पिता मम मृतश्च [1]पितामहो मेऽ-
हङ्कार उग्रमनलं प्रविवेश बोधम् ।। ३२ ।।

प्रत्यक्षं न क्षमते सदोषतासम्भवात्कचित्प्रमितौ ।।
कामलयाकुलमीक्षणमवेक्षते[2] शङ्खमतिपीतम् ।। ३३ ।।

देहेन्द्रियमनःप्राणबुद्धिधर्मान्वितः पुमान् ।।
भासमानोऽपि तप्ता यः पिण्डवत् तद् विलक्षणः ।। ३४ ।।

तादात्म्यमज्ञानकृतं प्रतीहि
कथं भवेत् चिज्जडयोर्ऋतं तत् ।।
सता प्रकाशेन परेश्वरेण
जीवो न भिन्नः खलु तत्स्वभावः[3] ।। ३५ ।।

विक्षेपणीमावरणीं च शक्तिं
रजस्तमोत्थामभिभूतमेव ।।
मायाश्रिता दर्शयति प्रपञ्चं
स्वतः प्रकाशं पिदधाति[4] तत्त्वम् ।। ३६ ।।

नीलेन्तःकरणे सुषुप्तिसमये जीवः स्वयं भाषय-
त्यज्ञानं च सुखं च केवलमसावानन्दबोधात्मकः ।।
तस्माज्जागरितः स्मरत्यनुभवान्नाज्ञासिषं किञ्चन ?
सुप्तोहं सुखमन्यथा स्मृतिरियं संस्कारशून्या कथम् ? ।। ३७ ।।

प्रयाति लिङ्गोपहितः स्वर्गं नरकमेव वा ।।
घटाकाशस्य गमनमिवोपाधिकृतं च तत् ।। ३८ ।।

१. पितामपृत—क०
२. मवेलते—क०
३. स्वभाव—क०
४. तराम्—क०

अहं देह इति त्यक्तकामदेह इति स्फुटम् ॥
प्रतियन् किं न जानासि ? देहादिभ्यो विलक्षणम् ॥ ३९ ॥

प्रत्यक्षतः कैरवबान्धवस्य
प्रतीयते कैरवभासमानम् ॥
[1]विम्बं मह[2]ज्ज्यौतिषशास्त्रदृष्ट्या
विपश्चितां तन्महिमप्रतीतिः ॥ ४० ॥

तत्त्वं पदयोर्लक्ष्यं शुद्धमखण्डञ्च चैतन्यम् ॥
सम्बन्धत्रयसहितं तत्त्वमसीत्येकमभिधत्ते ॥ ४१ ॥

उपक्रमाद्यैरवधारितार्था
बलीयसी "तत्त्वमसि"[1] श्रुतिर्या ॥
न [3]बाध्यते सा खलु लोकसिद्ध–
भेदानुवादिश्रुतिभिः कथञ्चित् ? ॥ ४२ ॥

रक्तोयं न तु मेचको भवति धीः पाकेन रक्ते घटे
[4]तस्मिन्नेन परं विशेषणगतं भेदं गृहीत्वा यथा ॥
भेदग्राहि तु "नाहमीश्वर" इति प्रत्यक्षमेतादृशं
जीवानामवधो[5] हि धर्मनिलयामालम्बमानं भिदाम् ॥ ४३ ॥

योगो भर्तृहरे ? प्राप्तस्त्वया को नाम कीर्तय ? ॥
रोगोहं ममताख्योयं न गतो यच्चिरन्तनः[6] ॥ ४४ ॥

---

1. तत्त्वमसीत्यस्य महावाक्यस्य द्विधा व्याख्यानम् । सा चेयं श्रुतिः लोकसिद्धभेदानुवादिश्रुतिभिर्नबाध्यते कथञ्चिदित्यन्वयः ॥

१. बिम्बे–ख०
२. भहत्–क०
३. बाध्यते–क०
४. घटेस्मिन्नेव–क०
५. मवधो–क०
६. चिरन्तन–क०

कर्णयोः पाटनं[1] मुद्रिकाधारणं
वक्षसि स्थापनं वाद्यशृङ्गस्य च ॥
भूतिचर्चाकृतिस्तं तु मालाधृतिं[2]–
दण्डयात्रस्थितिर्योग इत्याकृतिः ॥ ४५ ॥

गते भर्तृहरौ गोपीचन्दयुक्ते च ते [3]वयम् ॥
[4]अगच्छाम कियद् दूरं कनीफासिद्ध आगतः ॥ ४६ ॥

हसन्नानको मर्दनेनेति पृष्टः
कुतो हस्यते ? योगिवर्यो जगाद ॥
अयं जेतुमायाति गोरक्षशिष्यो
गलं पीडयास्यै[5]त्यवोचत् स हृष्टः ॥ ४७ ॥

नानकेन गदिते नत मर्दन ?
प्राणपीडनकरः कलिः किल ॥
[6]वाग्विलासकलहस्तु योगिनां
धीमतामिव जपाजयप्रदः ॥ ४८ ॥

अवोचत्कनीफाः कुतोऽत्रागतोसि ?
यतीशस्तमूचे [7]प्रभोर्दर्शनार्थम् ॥

---

1. नानककनीफयोः सम्बादः ४६ तः ५७ यावत् ।
१. पारनमुद्रिका–ख०
२. मालाधृतिः–क०
३. वये–क०
४. आगच्छाम–क०
५. स्ये–क०
६. वाग्वि०–ख०
७. प्रभो दर्श–क०

[1]प्रभुर्दृष्टपूर्वः कदाचित्त्वयेति[2] ?
स आहस्म तं नानको[3]ऽब्रूत हृष्टः[4] ॥ ४९ ॥

कनीफाः किं नामा ? क इति ? तमपृच्छद्यतिवरं
स ऊचे [5]चित्रात् भोऽद्भुतविविधकर्मास्मि च यते ? ॥
अखण्डं मे ज्योतिर्विभुसकलमेतन्मम कृति[6]
विलासः सर्वो मे भवति शिवशक्तिव्यतिकरात्[7] ॥ ५० ॥

ओंकारवाच्यः श्रुतिमौलिमान्यः
[8]सर्वेशिताऽकुण्ठितसर्वशक्तिः ॥
यो ज्ञानमात्रो निजरूपदाता
नाथोऽथवा मे दयितः स आत्मा ॥ ५१ ॥

कनीफा बभाषे गुरुस्ते न कश्चित्
[9]प्रपद्यस्व गोरक्षदीक्षां द्रुतं तत् ॥
[10]श्रुतिं [11]पाटयापाटवध्वंसहेतुं
मतं योगिवर्यस्य विद्वन् ? गृहाण[12] ॥ ५२ ॥

---

१. प्रभुं—क०
२. त्वयन्ति—क०
३. नानके—क०
४. दृष्टः—क०
५. चित्राह्वो—ख०
६. न्प्रमवृतिः—क०
७. करान्—क०
८. सर्वेशिताः—क०
९. पयचस्व—क०
१०. श्रुति—क०
११. पाटवा—क०
१२. विद्वनाहाण—क०

तमूचे यतिर्योगिना पाटनीयः
[1]पटोऽज्ञानरूपः स्वरूपापिधाता ॥
हृदा धारणा धारणीया न तन्तु-
र्न भृङ्गेण चार्थः श्रुतेऽनाहताख्ये ॥ ५३ ॥

न वस्तिर्न धौतिर्न[2] नौलिः कपालं
न या [3]खेचरी नापि वज्रोलिकाख्या[4] ॥
विरक्तिर्भवेत् सत्यसन्तोषशौचं
स्वरूपावबोधश्च सिद्धिं नयन्ति ॥ ५४ ॥

मलैर्देहतः पातितैः किं कृतं ? भो ?
न [5]रागादयश्चेद्विमुञ्चन्ति चित्तम् ॥
न सिद्धीः श्रयन् इन्द्रजालेपि लभ्याः
कृतार्थो न चेद् जन्ममृत्यू[6] ततार ॥ ५५ ॥

[7]मन्मना भव मद्भक्त इत्याद्युपदिशन् गुरुः ॥
मम सर्वत्र जागर्ति गुरुणान्येन मे कृतम् ॥ ५६ ॥

गतः कनीफास्तमुवाच मर्दनो
व्रजाधुनाग्रे यतिरुक्तवानिदम् ॥
इहास्व किं नु त्वरसे विलोकय ?
क्रमागतानां कुतुकं तु योगिनाम् ॥ ५७ ॥

---

१. पयाज्ञान—ख०
२. धोति—ख०
३. खेचरीया—क०
४. वज्जोलि—क०
५. रागादश्च—क०
६. ज्जन्मृत्यूत—क०
७. मन्प्रना—ख०

आदेशो नानकेत्यूचे हनीफास्तत आगतः ॥
नानकोऽवददादेशो निराकारस्य केवलः ॥ ५८ ॥

हनीफास्तमिदं स्माह कोऽहं पूर्वं कथं यतिः ? ॥
कुत्राभवमिति ब्रूहि ? सिद्धोऽसि यदि नानक ? ॥ ५९ ॥

सोऽब्रूत कङ्कणस्य सूनुः [1]सप्तदशाब्दकः ॥
राजा त्वं मृगयारण्ये मृगं हत्वा तु तोषिथ ॥ ६० ॥

प्रादुर्बभूव गोरक्षस्तत्र त्वं तं न्यमन्त्रयः[2] ॥
सोवदन्निर्दयस्यान्नं मलिनं नाहमद्मि[3] भोः ? ॥ ६१ ॥

हत्वा प्रसीदसि यथा हरिणं वराकं
त्वां च प्रसत्स्यति निहत्य तथैष[4] हन्त ? ॥
हिंसा विहाररसिकाः स्वकृतेर्विपाके
सीदन्ति वीतशरणा मरणार्तिभाजः ॥ ६२ ॥

बीजं विकीर्णमिव पूर्णमथोर्वरायां
वैराग्यमङ्कुरमधाद्[5] हृदि ते वचस्तत् ॥
मृत्युर्नयेत कुरु मे तदिति त्वयोक्तः[6]
स स्थाणुपिप्पलतले विततार दीक्षाम् ॥ ६३ ॥

हनीफा बभाषे यदि त्वीदृशोऽसि
वदाखेटखेला विधेया समं कैः ? ॥

---

१. दशात्मकः—क०
२. तन्निमन्त्रयः—क०
३. मद्म्रि—क०
४. ततैष—क०
५. द्वतिते—क०
६. त्वयोतः—क०

मृगाः के निपात्याश्च कस्मिन्नु[1] ? तीर्थे
प्रगृह्योपनेया गृहं के ? यतीन्द्रम् ॥ ६४ ॥

सोऽत्रादीन्मृगया समं मृगयुभिः सद्भिर्विधेया सखे ?
रागादीन् हरिणान्विशस्य[2] विषये तीर्थे गृहीत्वा मृगम् ॥
चित्ताख्यं स्वगृहं नयेत्परचितिं गां वासनाख्यां निजां
[3]बध्नीयात्परिधावनैकरसिकामाखेटशौण्डो यमी ॥ ६५ ॥

गतो हनीफाः प्रणिपत्य गोपी-
चन्द्रः समागाद् गुरुणा नियुक्तः ॥
आदेश इत्याख्यदसाववादी-
दादेश एको जगदीश्वरस्य ॥ ६६ ॥

किं नामा ? किश्च[4] वर्णः ? किं रूपस्त्वं ? किमर्थमायातः[5] ? ॥
गोरक्षनाथमुपसर गृहाण दीक्षां कृतार्थतामश्च ॥ ६७ ॥

गोपीचन्द्रेणेत्थङ्कथितः स जगाद यमिमुख्यः ॥
आयान्तु सर्वसिद्धा भ्रान्तिं तेषामपाकुर्वे ॥ ६८ ॥

ओङ्कारनामा गतवर्णजाति-
र्नोरूपको[6]ऽहं तमसः पुरस्तात् ॥
वैकुण्ठनाथस्य विलोकनार्थ-
मिहागतस्तस्य गुरोर्निदेशात् ॥ ६९ ॥

---

१. कस्मिन्न–क०
२. विणास्य–क०
३. वध्नीया–क०
४. किं वर्णः—ख०
५. माप्यक्तः–क०
६. रूपकं–क०

[1]को ज्ञानी ? को ध्यानी ?
क: स्नानी ? सत्तमे तीर्थे ॥
को मलिनः ? को विमलः ?
केन जनैः प्राप्यते पन्थाः? ॥ ७० ॥

ऊर्ध्वं किं ? किमधस्तात् ?
प्रकाशते दीपकः केन? ॥
रसनां विना जयः कः ?
चल गोरक्षस्य सन्निधित्वं च ॥ ७१ ॥

गोपीचन्द्रेणैवं
पुनरपि पृष्टः स निजगाद ॥
ज्ञानी गुरुकृतनिष्ठो
ध्यानी विषयैरबाधितध्यानः ॥ ७२ ॥

स्नानी गुरुचरणाम्बुज–
तीर्थे यः क्षालयेच्चित्तम् ॥
मलिनो निर्गुरुरुक्तो
गुरुवाक्यैः शोधितो विमलः ॥ ७३ ॥

---

1. प्रस्नाः ? उत्ताराणि

क. कि नामा ? ओङ्कारनामा ।
ख. को वर्णः ? गतवर्णः ।
ग. कि रूपम् ? नोरूपम् ।
घ. कथमिहागतः ? वैकुण्ठनाथस्य दर्शनाय ।
ङ. कः स्नानी ? गुरुकृतनिष्ठः ।
च. को ध्यानी ? विषयैरबाधितः ।
छ. कः स्नानी ? गुरुचरणे चित्तक्षात्रमः ।
ज. को मलिनः ? गुरुणा अनुक्तः ।
झ. को विमलः ? गुरुशोधितः ।

उपदेशेन गुरूणां
मोक्षपुरस्याधि गम्यते पन्थाः ॥
ऊर्ध्वमधस्मादाज्ञा[1]-
[2]मैशीं विदधतः प्रकाशते दीपः ॥ ७४ ॥

अजपाजपतश्चित्ते
श्रीशं [3]स्मरतो भव भववच्छेदी[4] ॥
रसनां विना जपः स्याद्
गोपीचन्द्रेष्टदः सोऽयम् ॥ ७५ ॥

त्वं चलपुरः[5] शनैरहमागच्छामीति तेनोक्तः ॥
किं दृष्टमिति ? [6]वदन्तं गोपीचन्द्रो गतो गुरुं स्माह ॥ ७६ ॥

स तत्ववेत्ता स्वयमाजिहीते
योगीश्वरो नानकनामधेयः ॥
अथागतो भर्तृहरिः पुनस्त-
[7]माहेशमाह[8] च वदन् विनोदात् ॥ ७७ ॥

त्वमागतः[9] किं पुनरागतोसि ?
तपस्विना तेन स पृष्ट ऊचे ॥
आहूतवान्नानक ? भो ? भवन्तं
गोरक्षनाथस्तदितः प्रयाहि ॥ ७८ ॥

---

१. अधस्तात्—क०
२. मैंणि—क०
३. स्मरता—क०
४. स्मरतात्रच्छेदी—क०
५. चपुरः—क०
६. वदगोपीच—क०
७. आहेश—क०
८. आहूय च—क०
९. भागताः—क०

[1]कर्णौ पाटय मुद्रिके धर तयोः [2]कन्थां दधानो गुरुं
भस्मोद्धूलनधूसराखिलवपुः पत्रं च दण्डं वहन् ॥
हालास्वादनश्रृङ्गवादनपरः[3] श्रीभैरवानुग्रहा-
दष्टैश्वर्यनिधिः प्रशाधि [4]जगतीं सम्राडिवाज्ञोत्सुकाम् ॥ ७९ ॥

मतमेतद् युक्तिभुक्ति भुक्तीनां साधनं महत्[5] ॥
इयन्तं मार्गमायातो न रिक्तस्त्वं पुनर्व्रज ॥ ८० ॥

असंसृष्टो दुःखैर्मृतिजननरोगादिजनितैः[6]
सुभोगान् भुञ्जानः सुरपुरगतान्योगविभवात् ॥
कृतार्थोऽस्याः सौख्ये न तु मुखरमिथ्या प्रलपिते
मृगो धावन् धावन् कलयति स मृगतृष्णाम्भसि[7] मृतिम् ॥ ८१ ॥

इत्थं भर्तृहरेर्वाणीमाकर्ण्य यमि पुङ्गवः ॥
उवाच वदतांश्रेष्ठोऽद्वैतवादवदावदः ॥ ८२ ॥

गुरूपदेशेन विभूष्य कर्णौ
मुद्रा दधानो मनसो मनोज्ञाम् ॥
कन्थां च शीतोष्णसहिष्णुताख्यां
परिष्कृतो निःस्पृहता विभूत्या ॥ ८३ ॥

पक्त्वा विवेकानलतः कषायान्
रागादिकान् जन्मसुखं गुडं च ॥

---

१. णौ पारय–क०
२. कन्थादधा–क०
३. स्वादत–क०
४. जगती–क०
५. सहृत्–क०
६. जमन–क०
७. तृष्णाभभसि–क०
८. वध्यावला॰कलय–क०
९. यत्का–क०